मुत्तुस्वामि दीक्षितर्
कृति समाहारम्

Compiled and typeset by

P. P. NARAYANASWAMI

A total of 481 kṛtis

arranged in alphabetical order

(according to Sanskrit alphabet)

©July 2002

1 akhilANDEshvari rakSha mAM

अखिलाण्डेश्वरि रक्ष माम्

रागं: जुजावन्ति (२८) ताळं: आदि

पल्लवि

अखिलाण्डेश्वरि रक्ष मां आगमसंप्रदायनिपुणे श्री

अनुपल्लवि

निखिललोकनित्यात्मिके विमले

निर्मले श्यामळे सकलकळे

चरणम्

लम्बोदरगुरुगुहपूजिते लम्बालकोज्ज्वविते हसिते

वाग्देवताराधिते वरदे वरशैलराजनुते शारदे

जम्भारिसम्भाविते जनार्दननुते जुजावन्तिरागनुते

झल्लीमद्दळझर्झरवाद्यनादमुदिते ज्ञानप्रदे

◇ ◇ ◇ ◇ ◇

2 akhilANDEshvaryai namaste

अखिलाण्डेश्वर्यै नमस्ते

रागं: आरभि (२९) ताळं: अदि

पल्लवि

अखिलाण्डेश्वर्यै नमस्ते

अणिमादिसिद्धीश्वर्यै नमस्ते

अनुपल्लवि

निखिलागमसन्नुतवरदायै निर्विकारायै नित्यमुक्तायै

संसारभीतिभञ्जनायै शरच्चन्द्रिकाशीतळायै

सागरमेखलायै त्रिपुरायै

चरणम्

त्रैलोक्यमोहनचक्रेश्वर्यै प्रकटयोगिन्यै

नळिन्यै परन्धामप्रकीर्तिन्यै

सर्वाशापरिपूरकचक्रेश्वर्यै गुप्तयोगिन्यै

सर्वसंक्षोभणचक्रेश्वर्यै गुप्ततरयोगिन्यै

सर्वसौभाग्यचक्रेश्वर्यै संप्रदाययोगिन्यै

सर्वार्थसाधकचक्रेश्वर्यै कुलोत्तीर्णयोगिन्यै

सर्वरक्षाकरचक्रेश्वर्यै निगर्भयोगिन्यै

सर्वरोगहरचक्रेश्वर्यै रहस्ययोगिन्यै

सर्वानन्दमयचक्रेश्वर्यै परापरादिरहस्ययोगिन्यै

श्रीचिदानन्दनाथगुरुगुहायै साधुहृदयसदृशवशिन्यै

◇ ◇ ◇ ◇ ◇

3 akhilANDEshvaro rakShatu

अखिलाण्डेश्वरो रक्षतु

रागं: शुद्धसावेरि (१) ताळं: रूपकम्

पल्लवि

अखिलाण्डेश्वरो रक्षतु मां

हरिहयादिपूजितस्सततम्

समष्टिचरणम्

अखिलाण्डेश्वरिसहितानन्दयुतो

आश्रितजनकल्पतरो आरक्तवर्णशोभितो

सुखतरो अखण्डैकरसपूर्णो

अखिलभुवनसाक्षिणो सच्चिदानन्दरूपिणो

सद्गुरुगुहप्रबोधिनो

◇ ◇ ◇ ◇ ◇

4 agastIshvaram

अगस्तीश्वरम्

रागं: ललित (१५) ताळं: मिश्र चापु

पल्लवि

अगस्तीश्वरं अराधयेऽहं हरं सच्चिदानन्दवल्लीशम्

अनुपल्लवि

जगज्जीवेशाकरं जननविलयकरं

नगजाह्ळादकरं नन्दीशं शङ्करम्

चरणम्

जलनिधिपानार्थं कलशजेनार्चितं

जलजनाभादिनुतं जाह्नवीधरं सततम्

कलिकल्मषापहं कमनीयविग्रहं

सुललितगुरुगुहजनकं रक्षितधनिकम्

जलरुहाप्तचन्द्राग्निदृशं जटाजूटमीशाद्रीशं

वलरिपुवन्दितजगदीशं वाञ्छितार्थदायकमनिशम्

◇ ◇ ◇ ◇ ◇

5 a”ngArakamAshrayami

अङ्गारकमाश्रयाम्यहम्

रागं: सुरटि (२८) ताळं: रूपकम्

पल्लवि

अङ्गारकमाश्रयाम्यहं विनताश्रितजनमन्दारं
मङ्गळवारं भूमिकुमारं वारं वारम्

अनुपल्लवि

शृङ्गारकमेषवृश्चिकराश्यधिपतिं
रक्ताङ्गं रक्ताम्बरादिधरं शक्तिशूलधरम्
मङ्गळं कम्बुगळं मञ्जुळतरपदयुगळं
मङ्गळदायकमेषतुरङ्गं मकरोत्तुङ्गम्

चरणम्

दानवसुरसेवितमन्दस्मितविलसितवक्त्रं
धरणीप्रदं भ्रातृकारकं रक्तनेत्रम्
दीनरक्षकं पूजितवैद्यनाथक्षेत्रं
दिव्यौघादिगुरुगुहकटाक्षानुग्रहपात्रम्
भानुचन्द्रगुरुमित्रं भासमानसुकळत्रं
जानुस्थहस्तचित्रं चतुर्भुजमतिविचित्रम्

◇ ◇ ◇ ◇ ◇

6 anantabAlak.rShNa

अनन्तबालकृष्ण

रागं: ईशमनोहरि (२८) ताळं: आदि

पल्लवि

अनन्तबालकृष्ण मामव मुकुन्द श्रीहरे

वनजमुखाम्बुजपदसुमते दीनावन नगधरशौरे

समष्टिचरणम्

धनञ्जयसारथे दयानिधे कृपां कुरु

मनोमयकोशात्मकामरगुरुगुहानन्द

मायामयगोकुलवासनिरञ्जन श्री

◇ ◇ ◇ ◇ ◇

7 annapUrNe vishAlAkShi

अन्नपूर्णे विशालाक्षि

रागं: साम (२९) ताळं: आदि

पल्लवि

अन्नपूर्णे विशालाक्षि रक्ष अखिलभुवनसाक्षि कटाक्षि

अनुपल्लवि

उन्नतगर्ततीरविहारिणि ओंकारिणि दुरितादिनिवारिणि
पन्नगाभरणराज्ञि पुराणि परमेश्वरविश्वेश्वरभास्वरि

चरणम्

पायसान्नपूरितमाणिक्यपात्रहेमदर्वीविधृतकरे
कायजादिरक्षणनिपुणतरे काञ्चनमयभूषणाम्बरधरे
तोयजासनादिसेवितपरे तुम्बुरुनारदादिनुतवरे
त्रयातीतमोक्षप्रदचतुरे त्रिपदशोभितगुरुगुहसादरे

◇ ◇ ◇ ◇ ◇

8 abhayAmbA jagadambA

अभयाम्बा जगदम्बा

रागं: कल्याणि (६५) ताळं: आदि

पल्लवि

अभयाम्बा जगदम्बा रक्षतु

आत्मरूपप्रतिबिम्बा मदम्बा

अनुपल्लवि

इभवदनश्रीगुरुगुहजननी ईशमायूरनाथरञ्जनी

अभयवरदपाणी अलिवेणी आश्रितमावाणी कल्यणी

चरणम्

भक्तनागलिङ्गपरिपालिनी भासमाननवरत्नमालिनी

व्यक्तसमस्तजगद्विशालिनी व्यधिकरणहरणनिपुणशूलिनी

रक्तशुक्रमिश्रप्रकाशिनी रविकोटिकोटिसङ्काशिनी

भुक्तिमुक्तिमानसनिवासिनी भावरागतालविश्वासिनी

भुक्तिफलप्रददक्षमृडानी भक्तिप्रदनिपुणतरभवानी

शक्तिसंप्रदायकशर्वाणी भुक्तिमुक्तिवितरणरुद्राणी

◇ ◇ ◇ ◇ ◇

9 abhayAmbAnAyaka varadAyaka

अभयाम्बानायक वरदायक

रागं: केदारगौळ (२८) ताळं: आदि

पल्लवि

अभयाम्बानायक वरदायक आत्मरूपप्रकाशकावाव

अनुपल्लवि

उभयात्मक प्रपञ्चव्यापक ओंकारस्वरूपावकाशक
शुभकर शशोशेखर करुणाकर सुन्दर शङ्कर भक्तवशंकर

चरणम्

नीलकण्ठपूजित निर्विकल्प नीलकण्ठ भव सत्यसङ्कल्प
कालकाल सकलविश्वविकल्पजालमूल कोटिब्रह्मकल्प
कपालमाल शूलधर गुरुगुहजाललील फाललोचन
लोकपाल वरदानशील शार्दूलचेल करुणालवाल रतिलोल

◇ ◇ ◇ ◇ ◇

10 abhayAmbAnAyaka harisAyaka

अभयाम्बानायक हरिसायक

रागं: आनन्दभैरवि (२०) ताळं: आदि

पल्लवि

अभयाम्बानायक हरिसायक आत्मरूपप्रकाशक अवाव

अनुपल्लवि

उभयात्मकप्रपञ्चप्रकाश धीङ्कारस्वरूपावकाश
शुभकरकावेरीतीरस्थित सुन्दरगौरीमायूरनाथ

चरणम्

नागलिङ्गभक्ताभीष्टप्रद नादबिन्दुकलारूपास्पद
आगमादिसन्नुत पल्लवपद आनन्दभैरवीयुतपद
भोगमोक्षवितरणधुरीणतर भूसुरादिसंसेवित शङ्कर
त्यागराज गुरुगुहसङ्गवकर तापत्रयहर दयासुधाकर

◇ ◇ ◇ ◇ ◇

11 abhayAmbAyAm

अभयाम्बायाम्

रागं: सहान (२२) ताळं: त्रिपुट

पल्लवि

अभयाम्बायां भक्तिं करोमि

सच्चिदानन्दरूपायां स्वस्वरूपायां श्री

समष्टिचरणम्

विभवादिवितरणनिपुणमन्त्रिण्यां

विजयकारणनिपुणतरदण्डिन्याम्

वियदादिभूतकिरणमालिन्यां

विकल्पहरणनिपुणशूलिन्याम्

अभेदप्रतिपादितायां आदिगुरुगुहवेदितायां

सभेशमोदितनटनायां सायुज्यप्रदचरणायाम्

◇ ◇ ◇ ◇ ◇

12 abhayAmbikAyAH

अभयाम्बिकायाः

रागं: केदारगौळ (२८) ताळं: झम्प

पल्लवि

अभयाम्बिकायाः अन्यं न जाने

अज्ञानध्माने अपरोक्षज्ञाने

अनुपल्लवि

इभराजगत्याः ईश्वर्याः जगत्याः

नभोमणिगत्याः नादलयगत्याः

चरणम्

बालादिनामधेयप्रकाशिन्याः

कालादितत्वान्तप्रकाशिन्याः

मूलादिद्वादशान्तप्रकाशिन्याः

स्थूलादिमौनान्तप्रकाशिन्याः

त्रैलोक्यमूलप्रकृत्याःस्वशक्त्याः

सालोक्यसामीप्यसारूप्यमुक्त्याः

मालिनीमन्त्रमालादितन्त्रोक्त्याः

शूलिनीगुरुगुहस्वानुभवगत्याः

◇ ◇ ◇ ◇ ◇

13 abhayAmbikAyai

अभयाम्बिकायै

रागं: यदुकुलकाम्भोजि (२८) ताळं: रूपकम्

पल्लवि

अभयाम्बिकायै अश्वारूढायै
अभयवरप्रदायै नमस्ते नमस्ते

अनुपल्लवि

सुभगाकारायै सुरुचिरनटनभेदायै
शोभितरदनायै शुद्धमानसायै
हिरण्यमणिकुण्डलायै हिमाचलसदनायै

चरणम्

सकलमन्त्रयन्त्ररूपायै सकलायै
चन्द्रशेखरप्रियायै पञ्चमकारायै
गूढगुल्फायै गुरुगुहस्वरूपायै
गर्वभण्डखण्डायै गमपदादिनुतपदायै
कावेरीतीरायै कमलेशसेवितायै

◇ ◇ ◇ ◇ ◇

14 abhirAmIm

अभिरामीम्

रागं: भूषावति (६४) ताळं: रूपकम्

पल्लवि

अभिरामीं अखिलभुवनरक्षकीमाश्रये

समष्टिचरणम्

इभवदनश्रीगुरुगुहजननीं ईशामृतघटेश्वरमोहिनीं
अभयवरप्रदायिनीं मार्कण्डेयायुष्प्रद-
यमभयापहारिणीं विशुद्धिचक्रनिवासिनीम्

◇ ◇ ◇ ◇ ◇

15 amba nIlAyatAkShi

अम्ब नीलायताक्षि

रागं: नीलाम्बर् (२९) ताळं: आदि

पल्लवि

अम्ब नीलायताक्षि करुणाकटाक्षि

अखिललोकसाक्षि कटाक्षि

अनुपल्लवि

बिम्बाधरि चित्प्रतिबिम्बाधरि बिन्दुनादवशङ्करि शङ्करि

अम्बुजारमणसोदरि आदरि अम्बरि कादम्बरि नीलाम्बरि

चरणम्

शिवराजधानीक्षेत्रवासिनि स्मितजनविश्वासिनि

शिवकायारोहणेशोल्लासिनि चिद्रूपविलासिनि

नवयोगिनीचक्रविकासिनि नवरसदरहासिनि

सुवर्णमयविग्रहप्रकाशिनि सुवर्णमयहासिनि

भुवनोदयस्थितिलयविनोदिनि भुवनेश्वरि क्षिप्रप्रसादिनि

नवमाणिक्यवल्लकीवादिनि भवगुरुगुहवेदिनि सम्मोदिनि

◇ ◇ ◇ ◇ ◇

16 ambikAyAH abhayAmbikAyAH

अम्बिकायाः अभयाम्बिकायाः

रागं: केदारम् (२९) ताळं: आदि

पल्लवि

अम्बिकायाः अभयाम्बिकायाः तव दासोऽहं

आदिजगदम्बिकायाः

अनुपल्लवि

शम्बरारिहरिशशिकुबेरप्रमुखोपासितनवयोगिन्याः

सांख्यातारकमनस्कराजयोगिन्याः शिवभोगिन्याः

बिम्बप्रतिबिम्बरूपिण्याः बिन्दुमण्डलवासिन्याः स्वरूपिण्याः

चरणम्

यमनियमाद्यष्टाङ्गयोगविषयादिनिग्रहकरण-

मूलाधारमणिपूरकाद्यब्जभेदनस्फुरकुण्डलिनी-

सहस्रदळब्रह्मरन्ध्रस्थकमलान्तर्गतशिवसम्मेळन-

गळितपरमामृतबिन्दुसेचनसमुज्जृम्भित-

नाडीमुखविकासकरणनिजानुभूतियोगिन्याः

अमोघवरशिवसारूप्यानन्दानुभवप्रदायिन्याः

अप्रमेयगुरुगुहादिजनन्याः ब्रह्मादिपञ्चककारिण्याः

17 aruNAcalanAtham

अरुणाचलनाथम्

रागं: सारङ्गा (६५) ताळं: रूपकम्

पल्लवि

अरुणाचलनाथं स्मरामि अनिशं

अपीतकुचाम्बासमेतम्

अनुपल्लवि

स्मरणात्कैवल्यप्रदचरणारविन्दं

तरुणादित्यकोटिसंकाशचिदानन्तं

करुणारसादिकन्दं शरणागतसुरबृन्दम्

चरणम्

अप्राकृततेजोमयलिङ्गं अत्यद्भुतकरधृतसारङ्गं

अप्रमेयमपर्णाब्जभृङ्गं आरूढोत्तुङ्गवृषतुरङ्गम्

विप्रोत्तमविशेषान्तरङ्गं वीरगुरुगुहतारप्रसङ्गं

स्वप्रदीपमौलिविधृतगङ्गं स्वप्रकाशजितसोमाग्निपतङ्गम्

◇ ◇ ◇ ◇ ◇

18 arddhanArIshvaram

अर्द्धनारीश्वरम्

रागं: कुमुदक्रिय (५१) ताळं: रूपकम्

पल्लवि

अर्द्धनारीश्वरं आराधयामि सततं
अत्रिभृगुवसिष्टादिमुनिबृन्दवन्दितं श्री

अनुपल्लवि

अर्धयाम अलंकारविशेषप्रभावं
अर्धनारीश्वरीप्रियकरं अभयकरं शिवम्

चरणम्

नागेन्द्रमणिभूषितं नन्दितुरगारोहितं
श्रीगुरुगुहपूजितं कुमुदक्रियारागनुतम्
आगमादिसन्नुतं अनन्तवेदघिषितं
अमरेशादिसेवितं आरक्तवर्णशोभितम्

◇ ◇ ◇ ◇ ◇

19 akShayali”ngavibho

अक्षयलिङ्गविभो

रागं: शङ्कराभरणम् (२९) ताळं: मिश्र चापु

पल्लवि

अक्षयलिङ्गविभो स्वयम्भो
अखिलाण्डकोटिप्रभो पाहि शंभो

अनुपल्लवि

अक्षयस्वरूप अमितप्रताप आरूढवृषवाह जगन्मोह
दक्षशिक्षण दक्षतरसुरलक्षण विधिविलक्षण लक्ष्यलक्षण
बहुविचक्षण सुधाभक्षण गुरुकटाक्षवीक्षण

चरणम्

बदरीवनमूलनायिकासहित भद्रकाळीश भक्तविहित
मदनजनकादिदेवमहित मायाकार्यकलनारहित
सदय गुरुगुहतात गुणातीत साधुजनोपेत शङ्कर नवनीत-
हृदयविभात तुम्बुरुसङ्गीत ह्रींकारसंभूत हेमगिरिनाथ
सदाश्रितकल्पकमहीरुहपदाम्बुज भव रथगजतुरग-
पदातिसंयुतचैत्रोत्सव सदाशिव सच्चिदानन्दमय

◇ ◇ ◇ ◇ ◇

20 avyAjakaruNAkaTAkShi

अव्याजकरुणाकटाक्षि

रागं: सालङ्गनाट (१५) ताळं: त्रिपुट

पल्लवि

अव्याजकरुणाकटाक्षि अनिशं मामव कामाक्षि

समष्टिचरणम्

रव्यादिनवग्रहोदये रसालङ्गनाटकक्रिये
दिव्यालंकृताङ्गाश्रये दीनावनगुरुगुहप्रिये
सव्यापसव्यमार्गस्थे सद नमस्ते शुकहस्ते

◇ ◇ ◇ ◇ ◇

21 Añjaneyam

आञ्जनेयम्

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

आञ्जनेयं सदा भावयामि अप्रमेयं मुदा चिन्तयामि
अञ्जनानन्दनं वानरेशं वरं पञ्चवक्त्रं सुरेशादिवन्द्यम्
गुरुगुहहितं शान्तं सदासेवितश्रीरामपादपङ्कजं
सञ्जीविपर्वतकरं मुखाब्जं सदा रामचन्द्रदूतं भजे

◇ ◇ ◇ ◇ ◇

22 AdiprIshvaram

आदिपुरीश्वरम्

रागं: आरभि (२९) ताळं: आदि

पल्लवि

आदिपुरीश्वरं सदा भजेऽहं
त्रिपुरसुन्दरीसमेतवरगुरुगुहजनकं वन्दितमुनिसमूहम्

समष्टिचरणम्

विधिहरिपूजितत्यागराजाङ्गं आदित्यकोटिप्रकाशलिङ्गं
नन्दिपूजितस्वयम्भुलिङ्गं नागकवचधरसैकतलिङ्गम्

◇ ◇ ◇ ◇ ◇

23 AnandanaTanaprakAsham

आनन्दनटनप्रकाशम्

रागं: केदारम् (२९) ताळं: मिश्र चापु

पल्लवि

आनन्दनटनप्रकाशं चित्सभेशं
आश्रयामि शिवकामवल्लीशम्

अनुपल्लवि

भानुकोटिकोटिसंकाशं
भुक्तिमुक्तिप्रददहराकाशम्
दीनजनसंरक्षणचणं दिव्यपतञ्जलि-
व्याघ्रपाददर्शितकुञ्जिताब्जचरणम्

चरणम्

शीतांशुगङ्गाधरं नीलकन्धरं
श्रीकेदारादिक्षेत्राधारम्
भूतेशं शार्दूलचर्माम्बरं चिदम्बरं
भूसुरत्रिसहस्रमुनीश्वरं विश्वेश्वरम्
नवनीतहृदयं सदयगुरुगुहतातमाद्यं
वेदवेद्यं वीतरागिणमप्रमेयाद्वैतप्रतिपाद्यं
सङ्गीतवाद्यविनोदताण्डवजातबहुतरभेदचोद्यम्

24 AnandAm.rtakarShaNi

आनन्दामृतकर्षणि

रागं: अमृतवर्षणि (६६) ताळं: आदि

पल्लवि

आनन्दामृतकर्षणि अमृतवर्षिणि

हरादिपूजिते शिवे भवानि

समष्टिचरणम्

श्रीनन्दनादि संरक्षिणि श्रीगुरुगुहजननि चिद्रूपिणि

सानन्दहृदयनिलये सदये सद्यस्सुवृष्टिहेतवे त्वाम्

सन्ततं चिन्तये अमृतेश्वरि सलिलं वर्षय वर्षय वर्षय

◇ ◇ ◇ ◇ ◇

25 AnandeshvareNa

आनन्देश्वरेण

रागं: आनन्दभैरवि (२०) ताळं: मिश्र चापु

पल्लवि

आनन्देश्वरेण संरक्षितोऽहं

चिदानन्दरूपोऽस्मि ब्रह्मानन्दरूपोऽस्मि

अनुपल्लवि

ज्ञानप्रदानगुरुगुहरूप-

चिदानदनाथस्वरूपप्रकाशेन

चरणम्

अवयवत्रयातीतेन नित्येन

अवस्थात्रयसाक्षिणाऽतिशुद्धेन

भवपञ्चकोशव्यतिरिक्तेन बुद्धेन

शिवसच्चिदानन्दरूपेण मुक्तेन

श्रवणमननिदिध्यासनसमाधिनिष्टापरोक्षानु-

भवस्वमात्रावशेषितप्रकाशमानमहेश्वरेण

◇ ◇ ◇ ◇ ◇

26 AryAM abhayAmbAm

आर्यां अभयाम्बाम्

रागं: भैरवि (२०) ताळं: त्रिपुट

पल्लवि

आर्यां अभयाम्बां भजरे रे चित्त सन्ततं

अविद्याकार्यकलनां त्यज रे

आदिमध्यान्तरहितां शिवसहिताम्

अनुपल्लवि

सूर्याग्निचन्द्रमण्डलमध्यवासिनीं

सुखतरप्रवर्त्तिनीं स्वेतरनिवासिनीम्

आचार्यशिष्यानुग्रहकरणशक्तिप्रदापारकरुणां

चर्यादिचतुष्टयवितरणसमर्थतरचरणां अरुणाम्

चरणम्

नन्दनवनोत्पादनपुष्पमालिकां

वन्दनालयादिप्रस्थापनदिव्य-

चन्दनाकर्षणस्थलशुद्धिकरण-

वन्दनस्तोत्रादिपठनभक्तसेवानाम्

मन्दधीहरणचर्यायुतमानवानां धर्ममय-

स्वच्छन्दशिवसालोक्यदायकचतुरतरहरनटभैरवीं

मुकुन्दसोदरीं महात्रिपुरसुन्दरीमानन्दलहरीम्

◇ ◇ ◇ ◇ ◇

27 IshAnAdi

ईशानादिशिवाकारमञ्चे

रागं: सहान (२२) ताळं: रूपकम्

पल्लवि

ईशानादिशिवाकारमञ्चे

शिवकामेश्वरवामाङ्कस्थे नमस्ते नमस्ते गौरी-

समष्टिचरणम्

श्रीशारदासंसेवितपार्श्वयुगळे

शृङ्गारकळे विनतश्यामळाभगळे

दुराशापहधुरीणतरसरसिजपदयुगळे

मुरारिगुरुगुहादिपूजितपूर्णकळे सकळे

पाशाङ्कुशेक्षुकार्मुकपञ्चसुमबाणहस्ते

देशकालवस्तुरूपदिव्यचक्रमध्यस्थे

◇ ◇ ◇ ◇ ◇

28 ucchiShTagaNapatau

उच्छिष्टगणपतौ

रागं: काशीरामक्रिय (५१) ताळं: आदि

पल्लवि

उच्छिष्टगणपतौ भक्तिं कृत्वोन्नतपदवीं

व्रज रे रे हृदय

अनुपल्लवि

सच्च्छब्दवाच्यस्वरूपिणि शबळीकृतब्रह्मस्वरूपिणि

चिच्छक्तिस्फूर्तिस्वरूपिणि चिदानन्दनाथस्वरूपिणि

चरणम्

नारीयोनिमुखास्वादने नग्नरामक्रियामोदने

भेरिवीणावेणुवादने भेदाज्ञानध्वान्तसूदने

शौरिनुते नतगुरुगुहमदने सूरिजनयुतश्रीपुरसदने

दूरीकृतमहादुरितकदने गौरीशनन्दने गजवदने

◇ ◇ ◇ ◇ ◇

29 ekadantaM bhajeham

एकदन्तं भजेऽहम्

रागं: बिलहरि (२९) ताळं: मिश्र चापु

पल्लवि

एकदन्तं भजेऽहं एकानेकफलप्रदम्

अनुपल्लवि

पाकशासनाराधितं पामरपण्डितादिनुतपदम्

चरणम्

कैलासनाथकुमारं कार्तिकेयमनोहरं
हालास्यक्षेत्रवेगवतीतटविहारं हरम्
कोलाहलगुरुगुहसहितं कोटिमारलावण्यहितं
मालाकङ्कणादिधरणं माषावल्लभाम्बारमणम्

◇ ◇ ◇ ◇ ◇

30 ekAmranAthAya

एकाम्रनाथाय

रागं: वीरवसन्तम् (२४) ताळं: रूपकम्

पल्लवि

एकाम्रनाथाय नमस्ते एकानेकफलदाय

अनुपल्लवि

पाकशासनादिदेववन्दिताय वरदाय

मूकमुख्यवाक्प्रदाय मूलकन्दमुक्तिदाय

चरणम्

कामाक्षिमोहिताय कामितफलनिपुणाय

कुमारगुरुगुहात्मजाय करविधृतकुरङ्गाय

कामजनकपूजिताय कमनीयकन्धराय

काञ्चीपुरिविलसिताय कलिकल्मषविनाशाय

◇ ◇ ◇ ◇ ◇

31 ekAmranAthAya namaste

एकाम्रनाथाय नमस्ते

रागं: मुखारि (२०) ताळं: रूपकम्

पल्लवि

एकाम्रनाथाय नमस्ते नमस्ते श्री

समष्टिचरणम्

पाकशासनादिसकलदेवबृन्दसन्नुताय

परशिवतत्वबोधितपरमशान्तस्वरूपाय

मूकमुख्यवाक्प्रदाय मूलकन्दमुक्तिदाय

कामाक्षीसमेताय गणपतिगुरुगुहसुताय

◇ ◇ ◇ ◇ ◇

32 ekAmranAtheshvareNa

एकाम्रनाथेश्वरेण

रागं: चतुरङ्गिणि (६६) ताळं: आदि

पल्लवि

एकाम्रनाथेश्वरेण संरक्षितोऽहं श्री

अनुपल्लवि

मूकमुख्यवाक्प्रदनिपुणेन मुनिगणादिगुरुगुहसन्नुतेन
पाकशासनादिपूजितवरपञ्चाक्षरस्वरूपेण

चरणम्

काञ्चीपुरविलसितप्रभावेन पञ्चभूतात्मकेन शिवेन
वाञ्छितार्थप्रदेन चतुरङ्गबलेश्वरीमोहिताकारेण

◇ ◇ ◇ ◇ ◇

33 ekAmranAtham

एकाम्रनाथं भजेऽहम्

रागं: गमकक्रिया (५३) ताळं: आदि

पल्लवि

एकाम्रनाथं भजेऽहं एकानेकफलप्रदं श्री

अनुपल्लवि

ओंकाररूपं शिवं ओषधिमूलं वरं

कालकालं हरं कर्मभेदहरं

ज्ञानरूपसुतं गुरुगुहनुतम्

चरणम्

पञ्चाक्षरमन्त्ररूपं प्रसन्नरूपं

प्रपञ्चातीतसद्योजातादिपञ्चमुखं सुमुखं

प्रकटितकामकोटिपीठस्थितं

प्रसिद्धमूकादिनुतकामाक्षीसहितम्

◇ ◇ ◇ ◇ ◇

34 ekAmreshanAyakIm

एकाम्रेशनयकीम्

रागं: चामरम् (५६) ताळं: अदि

पल्लवि

एकाम्रेशनयकीं ईश्वरीं भज रे रे मानस

अनुपल्लवि

मूकमुख्यवाक्प्रदायिनीं मुक्तिप्रदगुरुगुहपालिनीम्

चरणम्

काञ्चीनगरनिवासिनीं कैवल्यप्रदायिनीं नलिनीं
कलिकल्मषनाशिनीं प्रपञ्चप्रकाशिनीं भक्तविश्वासिनीम्
वाञ्छितफलदायिनीं सदानन्दविलासिनीं शम्भुमोहिनीं
पञ्चदशाक्षरीं प्रसिद्धकामेश्वरीं कञ्जलोचनीम्

◇ ◇ ◇ ◇ ◇

35 ekAmreshanAyike

एकाम्रेशनायिके

रागं: शुद्धसावेरि (१) ताळं: आदि

पल्लवि

एकाम्रेशनायिके शिवे श्रीकामाक्षि पाहि माम्

अनुपल्लवि

एकाम्रेशगृहेश्वरि शङ्करि शातोदरि सङ्गक्तवशंकरि

चरणम्

कामजनकमोहितपूर्णफले कामकले विमले करकमले

पामरजनपालिनि गुरुगुहजननि शुद्धसावेरिनुतनन्दिनि

◇ ◇ ◇ ◇ ◇

36 ehi annapUrNe

एहि अन्नपूर्णे

रागं: पुन्नागवराळि (८) ताळं: आदि

पल्लवि

एहि अन्नपूर्णे सन्निदेहि सदा पूर्णे सुवर्णे

अनुपल्लवि

पाहि पञ्चाशद्वर्णे श्रियं देहि रक्तवर्णे अपर्णे

चरणम्

काशीक्षेत्रनिवासिनि कमललोचनविशालिनि
विश्वेशमनोल्लासिनि जगदीशगुरुगुहपालिनि
विद्रुमपाशिनि पुन्नागवराळिप्रकाशिनि
षड्त्रिंशत्तत्वविकासिनि सुवासिनि
भक्तविश्वासिनि चिदानन्दविलासिनि

◇ ◇ ◇ ◇ ◇

37 kañjadaLAyatAkShi

कञ्जदळायताक्षि

रागं: कमलामनोहरि (३३) ताळं: आदि

पल्लवि

कञ्जदळायताक्षि कामाक्षि
कमलामनोहरि त्रिपुरसुन्दरि

अनुपल्लवि

कुञ्जरगमने मणिमण्डितमञ्जुळचरणे
मामव शिवपञ्जरशुकि पङ्कजमुखि
गुरुगुहरञ्जनि दुरितभञ्जनि निरञ्जनि

चरणम्

राकाशशिवदने सुरदने रक्षितमदने रत्नसदने
श्रीकाञ्चनवसने सुरसने शृङ्गाराश्रयमन्दहसने
एकानेकाक्षरि भुवनेश्वरि एकानन्दामृतझरि भास्वरि
एकाग्रमनोलयकरि श्रीकरि एकाम्रेशगृहेश्वरि शङ्करि

◇ ◇ ◇ ◇ ◇

38 kanakasabhApatim

कनकसभापतिम्

रागं: माळवश्री (२२) ताळं: अदि

पल्लवि

कनकसभापतिं भज रे मानस

कमनीयचिदम्बरपुरीविलसितम्

समष्टिचरणम्

सनकसनन्दनादिविनुतपदं शिवकामेश्वरीमनोल्लासकरं

दिनकरचन्द्राग्निलोचनं दीनार्तिहरं गुरुगुहमुदितम्

◇ ◇ ◇ ◇ ◇

39 kanakAmbari

कनकाम्बरि

रागं: कनकाम्बरि (१) ताळं: रूपकम्

पल्लवि

कनकाम्बरि कारुण्यामृतलहरि

कामाक्षि मामव कामेश्वरि

अनुपल्लवि

दिनकरचन्द्रतेजःप्रकाशकरि देवि महात्रिपुरसुन्दरि शङ्करि

चरणम्

त्रैलोक्यमोहनादिचक्रेश्वरि त्रैपदब्रह्ममहिषि भास्वरि

सालोकादिमुक्तिप्रदानकरि सदाशिवकरि गुरुगुहोदयकरि

मूलादिनवाधारेश्वरि शुभकरि नीलालकधरि नित्यानन्दकरि

लीलाविश्वोत्पत्तिस्थितिलयकरि बाला परमेश्वरि पञ्चदशाक्षरि

◇ ◇ ◇ ◇ ◇

40 kamalAmbA saMrakShatu

कमलाम्बा संरक्षतु माम्

(प्रथमावरणकीर्तनम्)

रागं: आनन्दभैरवि (२०) ताळं: तिश्र त्रिपुट

पल्लवि

कमलाम्बा संरक्षतु मां हृत्कमलानगरनिवासिनी अम्ब

अनुपल्लवि

सुमनसाराधिताब्जमुखी सुन्दरमनःप्रियकरसखी
कमलजानन्दबोधसुखी कान्तातारपञ्जरशुकी

चरणम्

त्रिपुरादिचक्रेश्वरी अणिमादिसिद्धीश्वरी
नित्यकामेश्वरी क्षितिपुरत्रैलोक्यमोहनचक्रवर्तिनी
प्रकटयोगिनी सुररिपुमहिषासुरादिमर्दिनी
निगमपुराणादिसंवेदिनी
त्रिपुरेशी गुरुगुहजननी त्रिपुरभञ्जनरञ्जनी
मधुरिपुसहोदरी तलोदरी त्रिपुरसुन्दरी महेश्वरी

◇ ◇ ◇ ◇ ◇

41 kamalAmbAM bhaja re

कमलाम्बां भज रे

(द्वितीयावरणकीर्तनम्)

रागं: कल्याणि (६५) ताळं: आदि

पल्लवि

कमलाम्बां भजरे रे मानस कल्पितमायाकार्यं त्यज रे

अनुपल्लवि

कमलावाणीसेवितपार्श्वां कम्बुजयग्रीवां नतदेवां
कमलापुरसदनां मृदुगदनां कमनीयरदनां कमलवदनाम्

चरणम्

सर्वाशापरिपूरकचक्रस्वामिनीं परमशिवकामिनीं
दूर्वासार्चितगुप्तयोगिनीं दुःखध्वंसिनीं हंसिनीम्
निर्वाणनिजसुखप्रदायिनीं नित्यकल्याणीं कात्यायनीं
शर्वाणीं मधुपविजयवेणीं सद्गुरुगुहजननीं निरञ्जनीम्
गर्वितभण्डासुरभञ्जनीं कामाकर्षिण्यादिरञ्जनीं
निर्विशेषचैतन्यरूपिणीं उर्वीतत्वादिस्वरूपिणीम्

◇ ◇ ◇ ◇ ◇

42 kamalAmbikAyAstava

कमलाम्बिकायास्तव भक्तोऽहम्

(षष्ट्यावरणकीर्तनम्)

रागं: पुन्नागवराळि (८) ताळं: रूपकम्

पल्लवि

कमलाम्बिकायास्तव भक्तोऽहं

शङ्कर्याः श्रीकर्याः सङ्गीतरसिकायाः श्री

अनुपल्लवि

सुमशरेक्षुकोदण्डपाशाङ्कुशपाण्याः

अतिमधुरतरवाण्याः शर्वाण्याः कल्याण्याः

रमणीयपुन्नागवराळिविजितवेण्याः श्री

चरणम्

दशकलात्मकवह्निस्वरूपप्रकाशान्तर्दशार-

सर्वरक्षाकरचक्रेश्वर्याः त्रिदशादिनुत-

कचवर्गद्वयमयसर्वज्ञादिदशशक्तिसमेत-

मालिनीचक्रेश्वर्याः त्रिदशविंशद्वर्ण-

गर्भिणीकुण्डलिन्याः दशमुद्रासमाराधितकौळिन्याः

दशरथादिनुतगुरुगुहजनकशिवबोधिन्याः

दशकरणवृत्तिमरीचिनिगर्भयोगिन्याः श्री

43 kamalAmbikAyai

कमलाम्बिकायै

(चतुर्थावरणकीर्तनम्)

रागं: काम्भोजि (२८) ताळं: अट

पल्लवि

कमलाम्बिकायै कनकांशुकायै
कर्पूरवीटिकायै नमस्ते नमस्ते

अनुपल्लवि

कमलाकान्तानुजायै कामेश्वर्यै अजायै
हिमगिरितनुजायै ह्रींकरपूज्यायै
कमलानगरविहारिण्यै खलसमूहसंहारिण्यै
कमनीयरत्नहारिण्यै कलिकल्मषपरिहारिण्यै

चरणम्

सकलसौभाग्यदायकाम्भोजचरणायै
संक्षोभिण्यादिशक्तियुतचतुर्थावरणायै
प्रकटचतुर्दशभुवनभरणायै
प्रबलगुरुगुहसंप्रदायान्तःकरणायै
अकळङ्करूपवर्णायै अपर्णायै सुपर्णायै
सुकरधृतचापबाणायै शोभनकरमनुकोणायै

चिकुरविजितनीलघनायै चिदानन्दपूर्णघनायै

◇ ◇ ◇ ◇ ◇

44 kamalAmbike

कमलाम्बिके

(नवावरणध्यानकीर्तनम्)

रागं: तोडि (८) ताळं: रूपकम्

पल्लवि

कमलाम्बिके आश्रितकल्पलतिके चण्डिके
कमनीयारुणांशुके करविधृतशुके मामव

अनुपल्लवि

कमलासनादिपूजितकमलपदे बहुवरदे
कमलालयतीर्थवैभवे शिवे करुणार्णवे

चरणम्

सकललोकनायिके सङ्गीतरसिके
सुकवित्वप्रदायिके सुन्दरि गतमायिके
विकळेबरमुक्तिदाननिपुणे अघहरणे
वियदादिभूतकिरणे विनोदचरणे अरुणे
सकळे गुरुगुहकरणे सदाशिवान्तःकरणे
अकचटतपादिवर्णे अखण्डैकरसपूर्णे

◇ ◇ ◇ ◇ ◇

45 kamalAsanAdivandita

कमलासनवन्दित

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टुस्वर साहित्यम्

कमलासनवन्दितपादाब्जे कमनीयकरोदयसाम्राज्ये
कमलानगरे सकलाकारे कमलनयनधृतजगदाधारे
कमले विमले गुरुगुहजननि कमलापतिनुतहृदये माये
कमलशशिविजयवदनेऽमेये कमलेन्द्राणीवाग्देवीश्री-
गौरीपूजितहृदयानन्दे कमलाक्षि पाहि कामाक्षि
कामेश्वरवरसति कल्याणि ॥

◇ ◇ ◇ ◇ ◇

करिकळभमुखम्

रागं: सावेरि (१५) ताळं: रूपकम्

पल्लवि

करिकळभमुखं ढुंढिगणेशं भज रे रे चित्त
कावेरीतटस्थितं सावेरीरागनुतम्

अनुपल्लवि

हरिहयादिसकलदेवताराधितपदाम्बुजं
गिरिजातनुजं विजितमनसिजं गुरुगुहाग्रजम्

चरणम्

मूलाधारचतुर्दळपङ्कजमध्यस्थं
मोदकहस्तं मुनिजनहृत्कमलस्थम्
फालचन्द्रं सुमुखं करुणासान्द्रं
पाशाङ्कुशधरं पद्मकरं सुन्दरम्
नीलग्रीवसुकुमारं नीरदशोभाहरं
पालितभक्तं धीरमपारं वारं वारम्

◇ ◇ ◇ ◇ ◇

47 kalAvatI

कलावती कमलासनयुवती

रागं: कलावति (३१) ताळं: आदि

पल्लवि

कलावती कमलासनयुवती

कल्याणं कलयतु सरवती

अनुपल्लवि

बलाबलामन्त्रार्णरूपिणी भारती मातृकाशरीरिणी

मलाळिविदारिणी वाग्वाणी मधुकरवेणी वीणापाणी

चरणम्

शरद्ज्योत्स्नाशुभ्राकारा शशिवदना काश्मीरविहारा

परा शारदा पराऽङ्कुशधरा वरदाभयपाशपुस्तककरा

सुरार्चितपदाम्बुजा शोभना श्वेतपङ्कजासना सुरदना

पुरारिगुरुगुहहृदयरञ्जनी मुरारिस्नुषा निरञ्जनी

◇ ◇ ◇ ◇ ◇

काञ्चीशम्

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

काञ्चीशमेकाम्रनायकं नित्यमहं भजे
कामादिषट्चोरवृत्तिमहं त्यजे
पञ्चाक्षररूपमागमान्तसारं
पञ्चास्यमादिकारणं विश्वेश्वरं गुरुगुहम् ॥

◇ ◇ ◇ ◇ ◇

49 kAdambarIpriyAyai

कादम्बरीप्रियायै

रागं: मोहनम् (६५) ताळं: मिश्र चापु

पल्लवि

कादम्बरीप्रियायै कदम्बकाननायै नमस्ते नमस्ते

अनुपल्लवि

माधुर्यवाक्प्रदनिपुणायै मधुकैटभभञ्जनायै

चरणम्

सदाचारप्रवर्तकायै सन्नुतगुरुगुहवैभवायै
विधितोषितसोमसुन्दरेश्वरसम्मोहनकर्यै श्री

◇ ◇ ◇ ◇ ◇

50 kAmakoTipIthavAsini

कामकोटिपीठवासिनि

रागं: सौगन्धिनि (३७) ताळं: आदि

पल्लवि

कामकोटिपीठवासिनि सौगन्धिनि

मामव गुरुगुहजननि रञ्जनि

समष्टिचरणम्

सामगानलोले श्रीबाले सद्गुणशीले कृपालवाले

श्यामळेऽतिकोमळेऽतिललिते

सकलभुवनजननि दुरितभञ्जनि

◇ ◇ ◇ ◇ ◇

51 kAmAkShi kAmakoTi

कामाक्षि कामकोटि

रागं: सुमद्युति (५७) ताळं: रूपकम्

पल्लवि

कामाक्षि कामकोटिपीठवासिनि मामव

अनुपल्लवि

कौमारि कुसुमद्युतिहेमाभरणभूषणि
समस्तसाम्राज्यदायिनि सद्गुरुगुहजननि

चरणम्

कमलेशसोदरि कमलाक्षि नारायणि
नादबिन्दुकलास्वरूपिणि कात्यायनि
कामकलाप्रदर्शिनि कल्याणगुणशालिनि

◇ ◇ ◇ ◇ ◇

52 kAmAkShi mAM pAhi

कामाक्षि मां पाहि

रागं: शुद्धदेशि (२२) ताळं: रूपकम्

पल्लवि

कामाक्षि मां पाहि करुणानिधे शिवे

समष्टिचरणम्

कामकोटिपीठवासिनि गुरुगुहविश्वासिनि
कामादिफलप्रदे विशुद्धिचक्रस्थिते
अतिशुद्धदेशिरागनुते सकले सुरविनुते

◇ ◇ ◇ ◇ ◇

53 kAmAkShi varalakShmi

कामाक्षि वरलक्ष्मि

रागं: बिलहरि (२९) ताळं: आदि

पल्लवि

कामाक्षि वरलक्ष्मि कमलाक्षि जयलक्ष्मि श्री

अनुपल्लवि

कामजनकपूर्णफले सकले कामितार्थदायिनि श्रीफले
कामकले विमले करकमले कामकोटिबिलहरिनुतकमले

चरणम्

दिनकरकोटिप्रकाशकाये देदीप्यमानदिव्यच्छाये
वनजासनादिवन्दितमाये वासुदेवपरब्रह्मजाये
मननध्यानध्यातृध्येये महनीयसाम्राज्यप्रदाये
सनकनन्दनादिभिर्ज्ञेये सरसगुरुगुहसहाये

◇ ◇ ◇ ◇ ◇

54 kAmAkShIM kalyANIm

कामाक्षीं कल्याणीम्

रागं: कल्याणि (६५) ताळं: रूपकम्

पल्लवि

कामाक्षीं कल्याणीं भजेऽहं भजे

अनुपल्लवि

कामकोटिपीठवासिनीं निरञ्जनीम्

चरणम्

सामरस्य संप्रदायकुलोत्तीर्णयोगिनीं
संसारभयभञ्जनीं चिदानन्दविलासिनीम्
कमलेशादिपालिनीं कञ्जदळलोचनीं
कुमारगुरुगुहजननीं सम्पत्करीं धनिनीम्

◇ ◇ ◇ ◇ ◇

55 kAmeshvareNa

कामेश्वरेण

रागं: श्री (२२) ताळं: आदि

पल्लवि

कामेश्वरेण संरक्षितोऽहं गणपतिगुरुगुहादिकारणेन

अनुपल्लवि

कमलेशकृतकन्यकादानेन करुणामृतरसप्रवाहेन
कामेश्वरिपाणिग्रहणेन कामादिमुक्तिकरयशस्केन

चरणम्

अरुणकिरणकोटिप्रकाशेन अणिमाद्यष्टैश्वर्यप्रदेन
भेरीवीणादिगानलोलेन भागवतप्रमुखादिनुतेन
वरलाजहोमादिप्रदक्षिणवसुमिश्रितपुष्पवर्षितेन
पुराणपुरुषपुरुहूतादिपूजितरत्नमण्डपस्थितमुदेन

◇ ◇ ◇ ◇ ◇

56 kAyArohaNesham

कायारोहणेशम्

रागं: देवगान्धारम् (२२) ताळं: रूपकम्

पल्लवि

कायारोहणेशं भज रे रे मानस

कलिकल्मषापहं शिवराजधानिक्षेत्रस्थितम्

अनुपल्लवि

भयापहं दिक्कालकादिविनुतमहेश्वरं

मायामयजगदाधारं गुरुगुहोपचारम्

चरणम्

नीलायताक्षीमनोल्लासकरणं

नित्यशुद्धसत्वगुणं भुक्तिमुक्तिप्रदनिपुणम्

पालितभक्तं पञ्चाननं प्रणतगजाननं

बालचन्द्रशेखरं भवपाशमोचनं त्रिनयनम्

◇ ◇ ◇ ◇ ◇

57 kAlabhairavam

कालभैरवम्

रागं: भैरवम् (१६) ताळं: आदि

पल्लवि

कालभैरवं भजेऽहमनिशं काशीपुरवासं भूतेशम्

अनुपल्लवि

शूलचक्रपाशदण्डहस्तं शोकमोहवारणप्रशस्तम्

चरणम्

नारदादिनुतश्यामगात्रं नागयज्ञसूत्रविचित्रं
क्रूरतरपापदण्डनचतुरं गुरुगुहप्रियकरं दिगम्बरम्
वारिजासनास्यकृन्तनं वाञ्छितार्थफलदानचिन्तनं
धीरतरं विधिकपालधरणं देवराजसेविताब्जचरणम्

◇ ◇ ◇ ◇ ◇

58 kAshIvishAlAkshIm

काशीविशालाक्षीम्

रागं: गमकक्रिया (५३) ताळं: रूपकम्

पल्लवि

काशीविशालाक्षीम् भजेऽहं भजे श्री-

अनुपल्लवि

काशीविश्वेश्वरमनोल्लासकारिणीं
करुणारसलहरीं गुरुगुहविश्वासिनीम्

चरणम्

काशीपुरवासिनीं कामितफलदायिनीं
कलिकल्मषनाशिनीं गन्धर्वघोषितगमकक्रियामोदिनीम्
पाशमोचनीं कपालशूलिनीं पन्नगवेणीम्
दासजनमुकुन्दवरप्रदायिनीम्

◇ ◇ ◇ ◇ ◇

59 kAshIvishveshvara

काशीविश्वेश्वर

रागं: काम्भोजि (२८) ताळं: अट

पल्लवि

काशीविश्वेश्वर एहि मां पाहि
करुणानिधे सन्निधेहि मुदं देहि

अनुपल्लवि

काशीक्षेत्रसदृशाधिकफलदगर्ततीरवास भक्तविश्वास
देशिककटाक्षेण दर्शितदेवतासार्वभौम
महादेव देव देवनुत देवराजपूजित दक्षिण

चरणम्

भवरोगचतुरवैद्यलिङ्गविभो भद्रदायकाम्भोजकरविभो
कुवलयादिपञ्चवदनस्वयभो कुष्टरोगापहगर्ततीर्थशम्भो
रविशशिवह्निनेत्र सुचरित्र विशालाक्षीकलत्र
कविजनादिसन्नुतिपात्र कमनीयगात्र चिन्मात्र
भुवनभरण भूतगणपते भवहर नतविधि श्रीपते
शिव गुरुगुहजनक पशुपते नवमणिविलसितचित्सभापते

◇ ◇ ◇ ◇ ◇

60 kumArasvAminam

कुमारस्वामिनम्

रागं: असावेरि (८) ताळं: आदि

पल्लवि

कुमारस्वामिनं गुरुगुहं नमामि पदसरोरुहमहं श्री

अनुपल्लवि

हिमाद्रिजासुतं सुरपतिनुतं हिरण्यमणिकुण्डलालङ्कृतम्
भ्रमात्मकविश्वकरं सुरवरं भ्रान्तिहरचतुरतरं शुभकरम्

चरणम्

कार्तिकेयं बाहुलेयं काञ्चनमयदेहं शिखिवाहं
कार्तस्वरहारं श्रुतिसारं गर्वितशूरादिसंहारम्
पूर्तिविद्याप्रदं तत्पदं मूर्तिकरं मूलाज्ञानहरं
कीर्तिशालिनं विनतशूलिनं आर्तिभञ्जनमशेषरञ्जनम्

◇ ◇ ◇ ◇ ◇

61 kumbheshvaAya

कुम्भेश्वराय namaste

रागं: कल्याणि (६५) ताळं: मिश्र चापु

पल्लवि

कुम्भेश्वराय नमस्ते
श्रीमङ्गळाम्बासमेताय नमस्ते नमस्ते

अनुपल्लवि

तुम्बुरुनारदसन्नुतचरणाय उत्तुङ्गकमनीयवृषभारोहिताय
अम्बुधिकावेरीतीरस्थितसुखकराय शङ्कराय

चरणम्

कुमारगुरुगुहपूजिताय उमारमणाय
महेश्वराय हेमगिरिपीठस्थिताय
चर्माम्बरशशिशेखराय निर्मलहृदयविलसिताय
नित्यशुद्धबुद्धमुक्ताय नित्योत्सवनिरञ्जनाय

◇ ◇ ◇ ◇ ◇

62 kumbheshvarAya namaste

कुम्भेश्वराय

रागं: केदारम् (२९) ताळं: रूपकम्

पल्लवि

कुम्भेश्वराय नमस्ते श्रीमङ्गळाम्बासहिताय

अनुपल्लवि

मानितगुरुगुहवन्दिताय कुम्भजपूजितपङ्कजचरणाय

चरणम्

अम्बुजासनादिसन्नुतनीलकण्ठाय

कुजबुधादिगृहादिसंहिताय

कुबेरप्रमुखाद्युपासितमुखाम्बुजाय शङ्कराय

◇ ◇ ◇ ◇ ◇

63 kumbheshvareNa

कुम्भेश्वरेण

रागं: कल्याणि (६५) ताळं: आदि

पल्लवि

कुम्भेश्वरेण संरक्षितोऽहं कुम्भजादिमुनिपूजितवरेण

समष्टि चरणम्

कुम्भमासमखामहोत्सवेन कामकोटिपीटयतिनुतेन
इभवदनगुरुगुहानन्देन इन्दुधरमङ्गळाम्बायुतेन

◇ ◇ ◇ ◇ ◇

64 kusumAkaravimAnArUDhAm

कुसुमाकरविमानारूढाम्

रागं: आहिरि (२०) ताळं: अदि

पल्लवि

कुसुमाकरविमानारूढां कुन्दमुकुळरदनां वन्देऽहम्

अनुपल्लवि

भासमानकामेश्वरानन्दां भक्तजनादिमङ्गळप्रदां
वसुकोणदशारपीठस्थितां वारिजलोचनां परदेवताम्

चरणम्

वसुदेवनुतवीथिविटङ्कां वाणीशवन्दितवरशाकां
वासवादिगुरुगुहसन्तोषां विचित्रविथीप्रवेशवेषाम्

◇ ◇ ◇ ◇ ◇

65 kusumAkarashobita

कुसुमाकर

रागं: कुसुमाकरम् (७१) ताळं: रूपकम्

पल्लवि

कुसुमाकरशोभितश्रीपुरगेहं
कुम्भजगुरुगुहनतं भावयेऽहम्

समष्टिचरणम्

हसनजितत्रिपुरमवनतमुरहरं
अब्जशेखरं करुणाकरं हरम्
भसितोद्धूळनभरणं पन्नगवलयाभरणं
असमास्त्रगर्वहरणं अगराजसुतारमणम्

◇ ◇ ◇ ◇ ◇

कृष्णानन्दमुकुन्दमुरारे

रागं: गौळिपन्तु (१५) ताळं: मिश्र चापु

पल्लवि

कृष्णानन्दमुकुन्दमुरारे कृपां कुरु केशव शौरे हरे

अनुपल्लवि

तृष्णारहित गोपीजनवल्लभ त्रिविक्रम
नारायण वासुदेव गोविन्द पद्मनाभ

चरणम्

यादववंशपयोनिधिचन्द्र यमळार्जुनादिभञ्जनोपेन्द्र
माधव मामव विनतविधीन्द्र मायातीत करुणासान्द्र
वेदनुतगौरीपान्तरङ्गादिगुरुगुहमोद
मुरळीनादभेदविनोद पङ्कजपाद मम प्रसीद श्रीधर

◇ ◇ ◇ ◇ ◇

67 kailAsanAthena

कैलासनाथेन

रागं: काम्भोजि (२८) ताळं: मिश्र चापु

पल्लवि

कैलासनाथेन संरक्षितोऽहं कैवल्यप्रदनिपुणतरेण श्री

अनुपल्लवि

कैलासगिरिविहारेण शैलराजात्मजामोहाकारेण

चरणम्

सद्गतिदायकाम्भोजचरणेन चारुशरच्चन्द्रकलाधरेण
सद्गुरुगुहसन्नुतपदेन सत्यज्ञानानन्देन
सनकादिसंशयहरणेन चिदानन्दहृदयस्थितेन

◇ ◇ ◇ ◇ ◇

68 kailAsanAtham

कैलासनाथम्

रागं: वेगवाहिनि (१६) ताळं: आदि

पल्लवि

कैलासनाथं भजेऽहं कामादिवृत्तिं त्यजेऽहम्

अनुपल्लवि

शैलराजात्मजापतिं पशुपतिं शङ्करं भक्तवशंकरम्

चरणम्

वालखिल्यादिपूजितगात्रं वसुप्रदनिपुणतरक्षेत्रं
कालकामहरणचरणनेत्रं कमलेशादिसन्नुतिपात्रम्
नीलकण्ठगुरुगुहपुत्रं नित्यानन्दं परमपवित्रं
शूलपाणिमत्यद्भुतचित्रं स्वप्रकाशजितवह्निशशिमित्रम्

◇ ◇ ◇ ◇ ◇

69 kodanDarAmam

कोदण्डरामम्

रागं: कोकिलारवम् (११) ताळं: आदि

पल्लवि

कोदण्डराममनिशं भजामि कोकिलारवजानकीरमणम्

समष्टिचरणम्

पादजपांसुपालिताहल्यं परमेश्वरगुरुगुहवात्सल्यं
वेदान्तवेद्यमतिकौशल्यं विश्वामित्रहितमकौटिल्यम्

◇ ◇ ◇ ◇ ◇

70 kaumAri gauri

कौमारी गौरी

रागं: गौरीवेळावळि (२३) ताळं: आदि

पल्लवि

कौमारी गौरीवेळावळी गानलोले सुशीले बाले

समष्टिचरणम्

कामाक्षि कनकरत्नभूषणि कल्याणि गुरुगुहसन्तोषिणि
हेमाम्बरि शातोदरि सुन्दरि हिमगिरिकुमारि ईशवशङ्करि

◇ ◇ ◇ ◇ ◇

71 kShitijAramanam

क्षितिजारमणम्

रागं: देवगान्धारि (२९) ताळं: आदि

पल्लवि

क्षितिजारमणं चिन्तये श्रीरामं भवतरणम्

अनुपल्लवि

क्षितिपतिनतचरणं सेवितविभीषणं
क्षितिभरणं श्रितचिन्तामणिमघहरणम्

चरणम्

सकलसुरमहितसरसिजपदयुगळं शान्तं अतिकुशलं
विकसितवदनकमलमतुलितममलं वीरनुतभुजबलम्
शुकसनकमुनिमुदितगुरुगुहविदितं शोभनगुणसहितं
प्रकटितसरोजनयनं पालितभक्तं भवपाशहरणनिपुणम्

◇ ◇ ◇ ◇ ◇

72 ga”nge mAM pAhi

गङ्गे मां पाहि

रागं: जुझूटि (२८) ताळं: खण्ड एकम्

पल्लवि

गङ्गे मां पाहि गिरीशशिरस्थिते
गंभीरगाये गीतवाद्यप्रिये

समष्टिचरणम्

अङ्गजतातमुदे असिवरुणामध्ये
अक्रूरपूजिते अखिलजनानन्दे
सकलतीर्थमूले सद्गुरुगुहलीले
वरजह्नुबाले व्यासादिकृपाले

◇ ◇ ◇ ◇ ◇

73 gajAdIshAdanyam

गजाधीशादन्यम्

रागं: नाटकुरञ्जि (२८) ताळं: मिश्र चापु

पल्लवि

गजाधीशादन्यं न जानेऽहं गुरुस्वरूपावतारिणो

समष्टिचरणम्

निजानन्दानुभवनित्यविद्याप्रबोधिनो

निर्मलहृदयस्थितनिर्गुणरसरूपिणो

अजपाहंसनटनादिनिजभजनतृप्तगुरुगुहरूपिणो

◇ ◇ ◇ ◇ ◇

74 gajAnanayutam

गजाननयुतम्

रागं: वेगवाहिनि (१६) ताळं: चतुरस्र एकम्

पल्लवि

गजाननयुतं गणेश्वरं भजामि सततं सुरेश्वरम्

समष्टिचरणम्

अजेन्द्रपूजितविघ्नेश्वरं गणादिसन्नुतपदपद्मकरं

कुञ्जरभञ्जनचतुरतरकरं गुरुगुहाग्रजं प्रणवाकारम्

◇ ◇ ◇ ◇ ◇

75 gajAmbA nAyako

गजाम्बा नायको

रागं: जुंजूटि (२८) ताळं: मिश्र चापु

पल्लवि

गजाम्बा नायको रक्षतु गुणिजनादिपूजितः सततम्

समष्टिचरणम्

अजेन्द्राद्यमरादिसन्नुत अखिलभुवनादिसेनः

सुजुंजूटिरागपानः सुन्दरगुरुगुहशिवसूनुः

◇ ◇ ◇ ◇ ◇

76 gaNanAyakam

गणनायकम्

रागं: रुद्रप्रिया (२२) ताळं: आदि

पल्लवि

गणनायकं भजेऽहं भजे कमलेशनुतं कामरिपुसुतम्

अनुपल्लवि

अणिमादिसिद्धिदायकं सुमुखम्

चरणम्

वाणीरमणानन्दं वरदं वदने द्विरदं वरबालगुरुगुहम्

◇ ◇ ◇ ◇ ◇

77 gaNapate mahAmate

गणपते महामते

रागं: कल्याणि (६५) ताळं: रूपकम्

पल्लवि

गणपते महामते गौरीकुमार मां पाहि

अनुपल्लवि

अणिमाद्यष्टैश्वर्यप्रद गुरुगुहपूजित वर

चरणम्

सोमसूर्याग्निनेत्र सदाशिवानन्दपुत्र
वामदेवादिभद्र वारिजगम्भीरगात्र
हिमाद्रिजसुदामोद हिरण्मयपीठस्थित
पामरपण्डितनुत वर पङ्कजासनादिनुत

◇ ◇ ◇ ◇ ◇

गणराजेन

रागं: आरभि (२९) ताळं: मिश्र चापु

पल्लवि

गणराजेन रक्षितोऽहं गुणिजनादिनुतपल्लवपदेन

समष्टिचरणम्

अणिमाद्यष्टसिद्धिप्रदेन माणिक्यमकुटादिधरेण
मन्त्रिणीपूजितसुमुखेन मानितगुरुगुहवन्दितेन
दिनकरकोटिप्रकाशेन विनताश्रितमन्दारेण
मनुपूजितपाशाङ्कुशेन काननस्थितब्रह्मचर्येण

◇ ◇ ◇ ◇ ◇

79 gaNeshakumAra

गणेशकुमार

रागं: जुंजूटि (२८) ताळं: चतुरश्र एकम्

पल्लवि

गणेशकुमार पाहि मां गजमुख

समष्टिचरणम्

(मम) मनोरथसिद्धिदायकागमपदादिनुत

भव श्री गुरुगुहहित गजमुख

◇ ◇ ◇ ◇ ◇

गानलोले

रागं: नागवराळि (८) ताळं: मिश्र चपु

पल्लवि

गानलोले बाले पञ्चदशाक्षरि पाहि माम्

समष्टिचरणम्

नानाप्रपञ्चातीते नामरूपात्मके माये
मानितगुरुगुहात्मके चारुचन्द्रहासिते
सनकादिसमाराधिते नागवराळिवेणियुते

◇ ◇ ◇ ◇ ◇

81 girijayA ajayA

गिरिजया अजया

रागं: शङ्कराभरणम् (२९) ताळं: आदि

पल्लवि

गिरिजयाऽजया अभयाम्बिकया

गिरीशजायया रक्षितोऽहम्

अनुपल्लवि

हरिहयादिदेवताराधितया आत्मस्वरूपप्रबोधितया

हरिहरगुरुगुहसम्मोदितया आदिक्षान्तवर्णवेदितया

चरणम्

समयविशेषनिर्याणमुखबीजनिर्बीजदीक्षाविषयकरण

समयाचरणोपयोगपूजासामग्रीसंग्रहान्तःकरण-

समयमतप्रतिपाद्यानुसरणसामान्यविशेषप्रजाचरण-

ममत्वनिराकरणक्रियायुतसद्भक्तानां धर्मार्थरूप-

समत्ववृत्तिवितरणनिपुणतरसाम्राज्यप्रदारुणचरणया

◇ ◇ ◇ ◇ ◇

गीतिचक्ररथस्थितायै

रागं: कन्नड (२८) ताळं: मिश्र चापु

पल्लवि

गीतिचक्ररथस्थितायै गुरुगुहनुतश्यामळायै
नमस्ते नमस्ते

समष्टिचरणम्

गीतामृतानन्दितायै गीर्वाणवन्दितायै
हतविषङ्गसमूहायै कृतलोकोपकारायै
नतभैरवादिसेनायै नवनवविधबाणकरायै

◇ ◇ ◇ ◇ ◇

83 guNijanAdinuta

गुणिजनादिनुत

रागं: गुर्ज्जरि (१५) ताळं: आदि

पल्लवि

गुणिजनादिनुतगुरुगुहोदये गुर्ज्जरिरागप्रियेऽव शिवे

समष्टिचरणम्

मणिमयभूषणि मानवपोषणि मधुरभाषिणि मानसतोषिणि
गणपतिफणिपतिशयनविधिनुते गजरथतुरगपदयुते ललिते

◇ ◇ ◇ ◇ ◇

84 guruguhapadapankaja

गुरुगुहपदपङ्कज

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टुस्वर साहित्यम्

गुरुगुहपदपङ्कजमतिगुप्तमनिशमाश्रये
निरतिशयनिजप्रकाशकनित्यसुखफलप्रदम्
नीरजनाभपुरन्दरमारारिवारिजसंभववेदितव्यं
अत्रिशुकवसिष्टवामदेवादितपोधनवन्दितम् ॥

◇ ◇ ◇ ◇ ◇

85 guruguhabhavAntara”ngiNIm

गुरुगुहभवान्तरङ्गिणीम्

रागं: चतुरङ्गिणि (६६) ताळं: मिश्र चापु

पल्लवि

गुरुगुहभवान्तरङ्गिणीं चतुरङ्गिणीं विचिन्तयेऽहम्

समष्टिचरणम्

अरुणकिरणसुचरणयुगळां हरिहयादिनुतकम्बुगळां
गरुडगमनपूजितबगळां करुणाकरीं शुभमङ्गळाम्

गुरुगुह सरसिज

रागं: शङ्कराभरणम् (२९) ताळं: चतुरस्र एकम्

नोट्टस्वर साहित्यम्

गुरुगुह सरसिजकरपदशुभकरमूर्त्ते
सुरवर शिवसुत भुवनपते
मुरहरहरिहयविधिनुतबहुविधकीर्त्ते
नरपतिनतमुनिसुतसुमते
निरुपम जयकर निरतिशयसुखद
सरस सततमव स्थिततरशक्ते ॥

◇ ◇ ◇ ◇ ◇

87 guruguhasvAmini

गुरुगुहस्वामिनि

रागं: भानुमति (४) ताळं: खण्ड त्रिपुट

पल्लवि

गुरुगुहस्वामिनि भक्तिं करोमि
निरुपमस्वेमहिम्नि परंधाम्नि

अनुपल्लवि

करुणाकरचिदानन्दनाथात्मनि
करचरणाद्यवयवपरिणामात्मनि
तरुणोल्लासादिपूजितस्वात्मनि
धरण्याद्यखिलतत्वातीतात्मनि

चरणम्

निजरूपजितपावकेन्दुभानुमति
निरतिशयानन्दे हंसो विरमति
अजशिक्षणरक्षणविचक्षणसुमति
हरिहयादिदेवतागणप्रणमति
यजनादिकर्मनिरतभूसुरहिते
यमनियमाद्यष्टाङ्गयोगविहिते
विजयवल्लीदेवसेनासहिते

वीरादिसन्नुते विकल्परहिते

◇ ◇ ◇ ◇ ◇

गुरुगुहादन्यम्

रागं: बलहंस (२८) ताळं: झम्प

पल्लवि

गुरुगुहादन्यं न जानेऽहं
गुप्तागमार्थतत्वप्रबोधिनो

अनुपल्लवि

अरुणोदयानन्दकोटिब्रह्माण्डाकार-
शिवादिधरान्ततत्वस्वरूपिणो

चरणम्

सहस्रदळसरसिजमध्यनिवासिनः
सकलचन्द्रभास्करतेजःप्रकाशिनः
सहजानन्दस्थितदासविश्वासिनः
सच्चित्सुखात्मकविश्वविलासिनो
अहरहःप्रबलहंसप्रकाशात्मनो
दहरविद्याप्रदायकपरमात्मनो
जहदजहल्लक्षणया जीवैक्यात्मनो
रहःपूजितचिदानन्दनाथात्मनो

◇ ◇ ◇ ◇ ◇

89 guruguhAya

गुरुगुहाय

रागं: साम (२९) ताळं: आदि

पल्लवि

गुरुगुहाय भक्तानुग्रहाय कुमाराय नमो नमस्ते

अनुपल्लवि

गुरुगुहाय भक्तानुग्रहाय गुणातीताय रूपरहिताय
हरिहरविरिञ्चिरूपाय सच्चिदानादस्वरूपाय शिवाय

चरणम्

सकळागममन्त्रसारज्ञाय सत्सम्पत्प्रदाय सर्वज्ञाय
सकळनिष्कळप्रकाशकाय सामरस्य संप्रदायकाय
विकळेभरकैवल्यदानाय विकल्पहीनाय विज्ञानाय
शुकवामदेववन्दितपदाय शुकवामदेवमुक्तिप्रदाय

◇ ◇ ◇ ◇ ◇

गुरुमूर्ते

रागं: शङ्कराभरणम् (२९) ताळं: रूपकम्

पल्लवि

गुरुमूर्ते बहुकीर्ते सुरसेनाधिपते श्री

अनुपल्लवि

सुरसेवित शिवभावित सुमतेऽनिशमव मां श्री

चरणम्

सरसीरुहभववन्दित सकलागमनुतदेव
सुरपतितनुजाधिपते सुरवर करुणाजलधे
गिरिजात्मज षण्मुखभव गुरुगुह शरवणभव श्री

◇ ◇ ◇ ◇ ◇

91 gokarNeshvara

गोकर्णेश्वर

रागं: सौराष्ट्रम् (१५) ताळं: आदि

पल्लवि

गोकर्णेश्वर पाहि पाहि मां

गोत्रभिदादिपूजितमूर्ते सुकीर्ते

अनुपल्लवि

श्रीकम्बुहेमगिरिकार्मुकधर श्रीपतिशर धरणीधर पुरहर

शोकहर हर शुभनिकराकर कोकनदपद गुरुगुहाकर

चरणम्

बालमण्डनतीर्थतीरवास भारतीशनुत भक्तविश्वास

नीललोहित विश्वविलास नित्यानन्दवल्लीमनोल्लास

पाञ्चालसौराष्ट्रचोळदेशपालसेवित पाद मृकण्डु

बालदीर्घायुरारोग्यप्रद बालशशिधर वरद दक्षिण

◇ ◇ ◇ ◇ ◇

गोपालकृष्णाय नमस्ते

रागं: काम्भोजि (२८) ताळं: आदि

पल्लवि

गोपालकृष्णाय नमस्ते गानलोलाय गुरुगुहनुताय

अनुपल्लवि

गोपीजनमनोल्लासाय गरुडवाहाय गोपतोषाय

चरणम्

द्वारकावासदामोदराय दासजनाभीष्टवरप्रदाय
दारिद्र्यदुःखादिभञ्जनाय द्रौपदीमानसंरक्षकाय
धरणीधराय तत्वातीताय तामरसाक्षपदपङ्कजाय
परमभागवतप्रह्ळादभक्तरक्षणाय पाण्डवहिताय

◇ ◇ ◇ ◇ ◇

93 govardhanagirIsham

गोवर्धनगिरीशम्

रागं: हिन्दोळम् (२०) ताळं: रूपकम्

पल्लवि

गोवर्धनगिरीशं स्मरामि अनिशं
गोपिकादिमनोहरं गर्वितकंसादिहरम्

समष्टिचरणम्

गोविन्दनामसारं गजेन्द्ररक्षणधीरं
कविजनहृन्मन्दारं कनकजितसुशरीरम्
रविशशिनयनविलासं रमणीयमुखाभासं
शिवगणादिविश्वासं श्रीगुरुगुहमनोल्लासम्

◇ ◇ ◇ ◇ ◇

94 govindarAjAya

गोविन्दराजाय

रागं: सुरटि (२८) ताळं: रूपकम्

पल्लवि

गोविन्दराजाय नमस्ते नमस्ते श्री

अनुपल्लवि

गोवर्धनगिरिधराय गोपस्त्रीमनोहराय

चरणम्

देवकीसुकुमाराय दीनार्तिभञ्जनाय
देवराजपूजिताय देशिकनुतवरदाय
देवकनकसभेशहिताय गुरुगुहनुताय
वासवादिवन्दिताय वसुप्रदनिपुणतराय

◇ ◇ ◇ ◇ ◇

95 govindarAjena

गोविन्दराजेन

रागं: मेचबौळि (१५) ताळं: रूपकम्

पल्लवि

गोविन्दराजेन रक्षितोऽहं सदा

अनुपल्लवि

गोवर्धनगिरिधरेण गोपस्त्रीमोहितेन

चरणम्

वसुदेवकुमारेण वासवादिवन्दितेन
कौस्तुभमणिभूषितेन करुणासागरवरेण
भासमानचिदम्बरपुरिविलसितेन
गुरुगुहमोदितमेचबौळिरागेण सन्तोषितेन

◇ ◇ ◇ ◇ ◇

गोविन्दराजमुपास्महे

रागं: मुखारि (२०) ताळं: मिश्र चापु

पल्लवि

गोविन्दराजमुपास्महे नित्यं श्रीगुरुगुहविनुतचिदाकाशगृहे

अनुपल्लवि

देवराजपूजितदिव्यगात्रं दीनार्तिभञ्जननिपुणतरक्षेत्रं
देवकीवसुदेवपुत्रं देवकनकसभेशमित्रं देशिकनुतरमाकळत्रम्

चरणम्

नृपराजस्य कृकलासजन्मापहं
नृपतिं रुक्मिणीसत्यभामाब्जमधुलोलम्
भगवन्तं भक्तकल्पकधरणीरुहं
भद्रप्रदोद्युक्तपाणिसरोरुहम्
उरगशयनं अङ्घ्रिसरसीरुहं आननजलरुहम्
नगधरं गोपिकामोहं नतभागवतादिसमूहं
खगराजतुरगारोहं करुणामृतरसप्रवहम्

◇ ◇ ◇ ◇ ◇

97 gauri girirAjakumAri

गौरि गिरिराजकुमारि

रागं: गौरि (१५) ताळं: रूपकम्

पल्लवि

गौरि गिरिराजकुमारि गानवनमयूरि गंभीरकौमारि

अनुपल्लवि

दूरीकृतदुरितेऽतिललिते दुर्गालक्ष्मीसरस्वतीसहिते
शौरीशविरिञ्चादिमहिते शाम्भवि नमस्ते परदेवते

चरणम्

नवचक्रस्वरूपावतारे नादब्रह्मवाचकतारे
शिवपरमानन्दामृतधारे शृङ्गारादिनवरसाधारे
भवगुरुगुहगणपतिसंसारे भक्तिप्रदवेदागमसारे
पवनधरणयोगविचारे पालितभक्तजनमन्दारे
तव चरणपङ्कजोद्भवतत्वसमष्ट्यागारे
सुवर्णमणिमयादिपञ्चविंशतिप्राकारे
सुधासिन्धुमध्ये चिन्तामण्यागारे
शिवाकारमञ्चे परशिवपर्यङ्कविहारे

◇ ◇ ◇ ◇ ◇

98 gaurIshAya namaste

गौरीशाय नमस्ते

रागं: आरभि (२९) ताळं: त्रिपुट

पल्लवि

गौरीशात्य नमस्ते श्रीगुरुगुहादिसन्नुतवराय

अनुपल्लवि

शौरिविधीन्द्रादिनुताय शङ्करीप्राणनाथाय
सूरिजनोपासिताय शूलायुधधरशोभितकराय

चरणम्

शुकसनकादिदेवहिताय सुन्दरमायूरनाथाय
निर्मलहृदयविहाराय नित्यशुद्धबुद्धमुक्ताय
सकलनिष्कळरूपाय चर्माम्बरधरशशिशेखराय
सुखतरप्रवर्तकाय शुद्धचक्रनिलयाय नित्याय

◇ ◇ ◇ ◇ ◇

चन्द्रं भज मानस

रागं: असावेरि (८) ताळं: मध्यम्

पल्लवि

चन्द्रं भज मानस साधुहृदयसदृशम्

अनुपल्लवि

इन्द्रादिलोकपालेडिततारेशं
इन्दुं षोडशकलाधरं निशाकरं
इन्दिरासहोदरं सुधाकरमनिशम्

चरणम्

शङ्करमौलिविभूषणं शीतकिरणं
चतुर्भुजं मदनच्छत्रं क्षपाकरम्
वेङ्कटेशनयनं विराण्मनोजननं
विधुं कुमुदमित्रं विधिगुरुगुहवक्त्रम्
शशाङ्कं गीष्पतिशापानुग्रहपात्रं
शरच्चन्द्रिकाधवळप्रकाशगात्रम्
कङ्कणकेयूरहारमकुटादिधरं
पङ्कजरिपुं रोहिणीप्रियकरचतुरम्

चन्द्रशेखरम्

रागं: मार्गहिन्दोळम् (२०) ताळं: आदि

पल्लवि

चन्द्रशेखरं सदा भजेऽहं शाम्भवीमनोहरं शङ्करम्

अनुपल्लवि

इन्द्रादिदेवसन्नुतपदं चिन्तितफलप्रदगुरुगुहनुतम्

चरणम्

अष्टादशवाद्यादिप्रियं अतिशुद्धमद्दळवाद्यप्रियं
सङ्गीतशास्त्रादिसंयुतं सन्मार्गहिन्दोळरागनुतम्
अष्टसिद्धिदायकं मुकुन्दं अष्टपाशहरतीर्थवैभवं
आनन्दकन्दं सोमास्कन्दं अजपानटनानन्दवैभवम्

◇ ◇ ◇ ◇ ◇

101 cidambaranaTarAjam

चिदम्बरनटराजम्

रागं: केदारम् (२९) ताळं: आदि

पल्लवि

चिदम्बरनटराजमश्रयेऽहं

शिवकामीपतिं चित्सभापतिम्

समष्टिचरणम्

चिदम्बरविहारं शङ्करं चिदानन्दकरं गुरुगुहवरं

केदारेश्वरं विश्वेश्वरं कमलापतिनुतपदं शशिधरम्

◇ ◇ ◇ ◇ ◇

102 cidambaranaTarAjamUrtim

चिदम्बरनटराजमूर्तिम्

रागं: तनुकीर्ति (६) ताळं: मिश्र चापु

पल्लवि

चिदम्बरनटराजमूर्तिं चिन्तयाम्यतनुकीर्तिम्

समष्टिचरणम्

मदम्बाशिवकामीपातिं मदनजनकमहितपशुपतिम्

वदनकमलगुरुगुहविनुतिम्

◇ ◇ ◇ ◇ ◇

103 cidambareshvaram

चिदम्बरेश्वरम्

रागं: धुनिभिन्नषड्जम् (९) ताळं: आदि

पल्लवि

चिदम्बरेश्वरं चिन्तयामि शिवानन्दगङ्गाधरं मृगधरम्

अनुपल्लवि

चिदानन्तनटनप्रकाशं शिवकामवल्लीमनःप्रियकरम्

चरणम्

वासुकिप्रमुखाद्युपासितं वासुदेवगुरुगुहादिवन्दितं
भास्करशशिशेखरं त्रिनेत्रं भिन्नषड्जरागनुतप्रसिद्धम्

◇ ◇ ◇ ◇ ◇

चिन्तय माकन्तमूलकन्दम्

रागं: भैरवि (२०) ताळं: रूपकम्

पल्लवि

चिन्तय माकन्दमूलकन्दं चेतः श्रीसोमास्कन्दम्

अनुपल्लवि

सन्ततं अखण्डसच्चिदानन्दं साम्राज्यप्रदचरणारविन्दम्

चरणम्

मङ्गळकरमन्दहासवदनं माणिक्यमयकाञ्चीसदनं
अङ्गसौन्दर्यविजितमदनं अन्तकसूदनं कुन्दरदनं
उत्तुङ्गकमनीयवृषतुरङ्गं भैरवीप्रसङ्गं पृथिवीलिङ्गम्

◇ ◇ ◇ ◇ ◇

105 cintaye mahAli"nga

चिन्तये महालिङ्गमूर्तिम्

रागं: परजु (१५) ताळं: आदि

पल्लवि

चिन्तये महालिङ्गमूर्तिं चिद्रूपस्पूर्थिं सुकीर्तिम्

अनुपल्लवि

सन्ततं मध्यार्जुनपुरवासं बृहत्कुचाम्बासहवासं
अन्तरङ्गभक्तजनानामतिसमीपऋजुमार्गदर्शितं
अन्तकान्तकं आधितारकं हत्यादिपापहरं पुरहरम्

चरणम्

पाकशासनादिदेवबृन्दं पालितदासजनादिमुकुन्दं
शोकादिहरणपदारविन्दं शुभकरं करुणारसकन्दम्
श्रीकमलापुरसोमास्कन्दं चिदम्बरेश्वरनटनानन्दं
श्रीकाळीशभैरवस्पन्दं शिवस्वामिशैलगुरुगुहस्कन्दम्

◇ ◇ ◇ ◇ ◇

चिन्ययेऽहं सदा

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

चिन्तयेऽहं सदा चित्सभानायकं
चिन्तितार्थदायकं जीवेश्वरभेदापहम्
चिन्तामणिस्वरूपं ताण्डवेश्वरं
शान्तं मुनिमहितं सगुरुगुहं शङ्करम्
सन्ततं साम्बमीशं मुधा भावयेऽ-
नन्तकोटिब्रह्माण्डनाथं विमलम्
आदिमध्यान्तवर्जं निराधारमाकाशनादान्तस्थं
सुन्दरं सुधांशुमौलिं शिवं भ्रान्तिवारणनिपुणम्
भानुकोटिभास्वरं दन्तिचर्माम्बरं धनदहितं
भारतीकान्तहरिनुतं करधृतमृगमेकान्तहृदये
शिवकामसुन्दरीपतिम् ॥

◇ ◇ ◇ ◇ ◇

107 cetaH shrIbalak.rShNam

चेतःश्रीबालकृष्णम्

रागं: जुजावन्ति (२८) ताळं: रूपकम्

पल्लवि

चेतःश्रीबालकृष्णं भज रे

चिन्तितार्थप्रदचरणारविन्दं मुकुन्दम्

अनुपल्लवि

नूतननीरदसदृशशरीरं नन्दकिशोरं

पीतवसनधरं कम्बुकन्धरं गिरिधरम्

पूतनादिसंहारं पुरुषोत्तमावतारं

शीतलहृदयविहारं श्रीरुक्मिणीदारम्

चरणम्

नवनीतगन्धवाहवदनं मृदुगदनं

नलिनपत्रनयनं वटपत्रशयनं

नवचम्पकनासिकं अतसीसुमभासकं

नतेन्द्रादिलोकपालकं मृगमदतिलकम्

नवतुलसीवनमालं नारदादिमुनिजालं

कुवलयादिपरिपालं गुरुगुहनुतगोपलम्

◇ ◇ ◇ ◇ ◇

108 chAyAvatIm

छायावतीम्

रागं: छायावति (१७) ताळं: आदि

पल्लवि

छायावतीमानन्दवल्लीं चारुतरतञ्जपुरीश्वरीं भजेऽहम्

समष्टिचरणम्

मायामयविश्वोत्पत्तिकरीं मारजनकसोदरीं सुन्दरीं

कायिकवाचिकमानसत्रिविधकरणोपासितगुरुगुहजननीम्

◇ ◇ ◇ ◇ ◇

109 jagadIsha guruguha

जगदीश गुरुगुह

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

जगदीशगुरुगुहहरिविधिविनुतं
देहेन्द्रियविलक्षणमानन्दलक्षणम्
नित्यशुद्धं बुद्धं मुक्तं सत्यनिर्वि-
कल्पनिष्प्रपञ्चमानन्दमज्ञ श्री ॥

◇ ◇ ◇ ◇ ◇

जगदीशमनोहरि

रागं: ईशमनोहरि (२८) ताळं: रूपकम्

पल्लवि

जगदीशमनोहरि जय करुणारसलहरि

जयकरि त्रिपुरसुन्दरि

समष्टिचरणम्

नगराजप्रियकुमारि नादान्तविहारि गौरि

भगवति हरिहरगुरुगुहपालिनि अखिलाण्डेश्वरि

◇ ◇ ◇ ◇ ◇

111 jambUpate

जम्बूपते

रागं: यमुनाकल्याणि (६५) ताळं: रूपकम्

पल्लवि

जम्बूपते मां पाहि निजानन्दामृतबोधं देहि

अनुपल्लवि

अम्बुजासनादिसकलदेवनमनतुम्बुरुनुत हृदयतापोपशमन
अम्बुधिगङ्गाकावेरीयमुनाकम्बुकण्ठ्यखिलाण्डेश्वरीरमण

चरणम्

पर्वतजाप्रार्थिताब्लिङ्गविभो पञ्चभूतमयप्रपञ्चप्रभो
सर्वजीवदयाकर शम्भो सामजाटवीनिलय स्वयम्भो
शर्व करुणासुधासिन्धो शरणागतवत्सलार्तबन्धो
अनिर्वचनीय नादबिन्दो नित्यमौलिविधृतगङ्गेन्दो
निर्विकल्पकसमाधिनिष्ट शिव कल्पकतरो
निर्विशेषचैतन्य निरञ्जन गुरुगुहगुरो

◇ ◇ ◇ ◇ ◇

112 jayati shivA bhavAni

जयति शिवा भवानी

रागं: भवानि (४४) ताळं: रूपकम्

पल्लवि

जयति शिवा भवानी जगज्जननी निरञ्जनी

समष्टिचरणम्

दयारसप्रवाहिनी दण्डितासुरवाहिनी
भयकृद्भण्डमर्दिनी भासमानकपर्दिनी
जयगुरुगुहरञ्जनी जननादिखेदभञ्जनी

◇ ◇ ◇ ◇ ◇

113 jñAnaprasUnAmbike

ज्ञानप्रसूनाम्बिके

रागं: कल्याणि (६५) ताळं: रूपकम्

पल्लवि

ज्ञानप्रसूनाम्बिके मामव जगदम्बिके

समष्टिचरणम्

दीनजनावनशङ्करि देवि त्रिपुरसुन्दरि
दिनकरचन्द्रतेजःप्रकाशकरि शुभकरि
गुरुगुहजननि काळहस्तीशमनोल्लासिनि

◇ ◇ ◇ ◇ ◇

114 jñAnAmbike

ज्ञानाम्बिके

रागं: सेनाग्रणि (७) ताळं: तिश्र एकम्

पल्लवि

ज्ञानाम्बिके पालय मां श्री ज्ञातृज्ञानज्ञेयस्वरूपिणि

समष्टिचरणम्

सेनाग्रणिप्रमुखोपासिते सितासिते अखिलदेवतासेविते

ज्ञानप्रदगुरुगुहविज्ञानघने घनजघने

दीनावनकोङ्कणेशदिव्यललने शोभने

◇ ◇ ◇ ◇ ◇

115 tArakeshvara

तारकेश्वर

रागं: शङ्कराभरणम् (२९) ताळं: आदि

पल्लवि

तारकेश्वर दयानिधे मां तारयाशु करुणानिधे श्री

अनुपल्लवि

तारानायकशेखर शङ्कर नारायणनुत नादान्तसार
शृङ्गार शिवावतार गुरुगुहतारोपदेशप्रकाशित

चरणम्

सूर्यकोटिसङ्काशशरीर सोमसुन्दर हसित मार-
कार्यकारणविश्वाधार कनकाङ्गदकेयूरहार
चर्यादिचतुष्टयचातुर्यहृदयविहार श्रितमन्दार
तुर्यातीत चिदानदाचार्य अभयाम्बिकाधर श्री

◇ ◇ ◇ ◇ ◇

तिरुवटीश्वरम्

रागं: गमकक्रिया (५३) ताळं: रूपकम्

पल्लवि

तिरुवटीश्वरं नमामि सन्ततं चिन्तयामि श्री

समष्टिचरणम्

मारकोटिस्वरूपिणं मरकतमणिभूषणं

चम्पकवल्लीरमणं चम्पकपुष्पाभरणं

सम्पत्प्रदाननिपुणं सुगुरुगुहाण्तःकरणम्

◇ ◇ ◇ ◇ ◇

117 tyAgarAja pAlaya

त्यागराज पालय

रागं: गौळ (१५) ताळं: आदि

पल्लवि

त्यागराज पालयाशु मां नित्यानन्दकर

सोमास्कन्द वीथिविटङ्क

समष्टिचरणम्

नागराजमणिभूषालङ्कृत नगराजसुतार्धाङ्ग गौळाङ्ग
भोगादिप्रद श्रीनगरस्थित भूसुरादिनुतवल्मीकलिङ्ग
श्रीगुरुगुहपूजितवृषतुरङ्ग श्रितजनरक्षणनिपुणान्तरङ्ग
भोगियुतचरण करधृतकुरङ्ग योगिविदिताजपानटनरङ्ग

◇ ◇ ◇ ◇ ◇

118 tyAgarAja mahadhvajAroha

त्यागराज महध्वजारोह

रागं: श्री (२२) ताळं: आदि

पल्लवि

त्यागराज महध्वजारोहतारकब्रह्मस्वरूपमाश्रये
गणेशगुरुगुहभक्तभैरवसोममयं श्री

अनुपल्लवि

आगमसिद्धान्तप्रतिपाद्यं आनन्दचन्द्रशेखरवेद्यं
नागस्वरमद्दळादिवाद्यं नामरूपातीतमनाद्यम्
यागशालाद्युत्सवचोद्यं यमाद्यष्टाङ्गयोगमाद्यं
भोगरागभेदरोगवैद्यं बोधामृतमहानैवेद्यम्

चरणम्

सृष्टिस्वरूपवसन्तवैभवमष्टध्वजेन्द्रविमानभूत-
समष्टिगजवृषभकैलासवाहमाश्लेषमहारथस्थितम्
विशिष्टहरं कृष्णगन्धधरणं शिष्टसेविताजपानर्तनं
अष्टपाशहरतीर्थप्रभावं अनुग्रहात्मकपाददर्शनम्
इष्टफलप्रदकल्याणसुन्दरेशनाममाचार्यप्रभावं
अष्टसिद्धिदायकाम्बिकोत्सवमारूढचण्डेश्वरं शिवम्

◇ ◇ ◇ ◇ ◇

119 tyAgarAjayogavaibhavam

त्यागराजयोगवैभवम्

रागं: आनन्दभैरवि (२०) ताळं: रूपकम्

पल्लवि

त्यागराजयोगवैभवं सदाशिवं

त्यागराजयोगवैभवं सदाश्रयामि

त्यागराजयोगवैभवं अगराजयोगवैभवं

राजयोगवैभवं योगगवैभवं वैभवं भवं वम्

समष्टिचरणम्

नागराजविनुतपदं नादबिन्दुकलास्पदं

योगिराजविदितपदं युगपद्भोगमोक्षप्रदम्

योगरूढनामरूपविश्वसृष्ट्यादिकरणं

युगपरिवृत्याब्दमासदिनघटिकाद्यावरणम्

श्रीगुरुगुहगुरुं सच्चिदानदभैरवीशं

शिवशक्त्यादिसकलतत्वस्वरूपप्रकाशम्

शं प्रकाशं स्वरूपप्रकाशं

तत्वस्वरूपप्रकाशं सकलतत्वस्वरूपप्रकाशं

शिवशक्त्यादिसकलतत्वस्वरूपप्रकाशम्

120 tyAgarAjAdanyam

त्यागराजादन्यं न जाने

रागं: दर्बार् (२२) ताळं: आदि

पल्लवि

त्यागराजादन्यं न जाने

गुरुगुहादिसमस्तदेवतास्वरूपिणः श्री

अनुपल्लवि

रागादिवृत्तिरहितस्वानुभोगानन्दस्फूर्तिविशेषात्

भूगन्धवाहवह्निजलगगनपुष्पवद्यज्वमयमूर्तेः श्री

चरणम्

सत्वरजस्तमोगुणातीतसत्यज्ञानानन्दरूपिणो

द्वित्वादिभेदनकर्तनपरमाद्वैतस्वात्मानन्दरूपिणो

त्रित्वपरिच्छेदराहित्यत्रैपदपरमाद्वैतरूपिणो

तत्वंपदार्थशोधनशेषिततत्पदलक्ष्यार्थस्वरूपिणो

तत्वसमष्टिव्यष्टिरूपलयतारकब्रह्मरूपात्मनो

तत्वं स्वातिरिक्तासहनतत्सक्तमानरूपात्मनः श्री

◇ ◇ ◇ ◇ ◇

121 tyAgarAjAya namaste

त्यागराजाय नमस्ते

रागं: बेगड (२९) ताळं: रूपकम्

पल्लवि

त्यागराजाय नमस्ते नमस्ते

कात्यायनीपते पशुपते सिंहासनपते

अनुपल्लवि

वागीशाद्यखिलदेववन्दितपदपङ्कजाय

योगीश्वरमानससंयुक्तवदनवारिजाय

भोगमोक्षदानवामभागस्थितशैलजाय

योगगुरुगुहात्मजाय त्यागध्वजाय अजाय

चरणम्

मुकुन्दादिपूजितसोमास्कन्दमूर्तये

मुचुकुन्दादिभक्तजनमनोरथपूर्तये

मुकुरबिम्बप्रतिबिम्बितमुखस्फूर्तये

मुनिपक्षिमृगकीटादिमुक्तिप्रदकीर्तये

सकलागममन्त्रतन्त्रसारज्ञानुरक्तये

अकथादित्रिरेखात्मकाधारप्रवृत्तये

सकलनिष्कळस्वरूपसच्चित्सुखव्याप्तये

विकल्पभेदयुक्तये विटङ्करूपशक्तये

◇ ◇ ◇ ◇ ◇

122 tyAgarAje

त्यागराजे

रागं: सारङ्गा (६५) ताळं: झम्प

पल्लवि

त्यागराजे कृत्याकृत्यमर्पयामि विदेहकैवल्यं यामि

अनुपल्लवि

भोगयोगात्मके भुक्तिमुक्त्यात्मके
त्यागरागात्मके तत्वंपरात्मके

चरणम्

प्रकृतिपुरुषात्मके पञ्चभूतात्मके
प्रकृतिविकृतात्मके पञ्चीकृतात्मके
सुकृतिहृदयात्मके सूर्यचन्द्रात्मके
विकृतिभेदात्मके विश्वेश्वरात्मके
सुकृतिपूर्णात्मके सुरगुरुगुहात्मके
सकृदसकृदात्मके सच्चित्सुखात्मके श्री

◇ ◇ ◇ ◇ ◇

123 tyAgarAjena

त्यागराजेन संरक्षितोऽहम्

रागं: साळगभैरवि (२२) ताळं: आदि

पल्लवि

त्यागराजेन संरक्षितोऽहं दयासुधासागरेण श्री

अनुपल्लवि

यागशालादिमहोत्सवेन यतिवराद्युपासितेन भवेन
भोगभोग्यप्रपञ्चोत्भवेन भुक्तिमुक्तिप्रदपरमशिवेन

चरणम्

श्रीरमणादिपूजितचरणेन सृष्ट्यादिपञ्चकृत्यकरणेन
हारकटकमकुटादिभरणेन हाटकक्षेत्राधिकरणेन
वीरखड्गखेडादिधरणेन विकल्पविरहितान्तःकरणेन
मारकालत्रिपुरादिहरणेन महादेवगुरुगुहस्मरणेन

◇ ◇ ◇ ◇ ◇

124 tyAgarAjo virAjate

त्यागराजो विराजते

रागं: अठाण (२८) ताळं: रूपकम्

पल्लवि

त्यागराजो विराजते महाराजराज श्री
त्यागराजो विराजते श्रीमत्त्यागराजो विराजते

अनुपल्लवि

वागर्थमयभुवनराजो हरिवाञ्छितार्थप्रदराजो
हरश्रीगुरुगुहगणेशराजो संसेवितराजाधिराजो अजो
नागरखण्डाख्यपुराणप्रतिपादितराजो
योगिनीगणराजो योगिराजराजः श्री

चरणम्

कलिराहित्यनगरवासो नीलोत्पलनायिकासहवासो
अतिललितहंसलास्योल्लासो अखिलागमशिरोनुतविलासो
अतिविलसितहाटकावभासो अनेकलीलाविचित्रविकासो
रक्तोत्पलकुसुमादिविश्वासो परिपालितहरिहयादिदासो
निर्मलहृदयराजहंसो महापरमहंसो
विकल्पतत्वप्रशंसः शशिकलावतंसः श्री

◇ ◇ ◇ ◇ ◇

125 tyAgarAjaM bhaja re

त्यागराजं भज रे

रागं: यदुकुलकाम्भोजि (२८) ताळं: मिश्र चापु

पल्लवि

त्यागराजं भज रे रे चित्त तापत्रयं त्यज रे रे चित्त

अनुपल्लवि

योगिराजहृदयाब्जनिलयं भोगिराजनुतचरणकिसलयं
नागराजमणिवलयं रजतागराजं मुखकुवलयम्

चरणम्

पौलोमीशादिदिक्पालपूजितगात्रं
नीलोत्पलाम्बानुकूलतरकलत्रम्
त्रैलोक्यगुरुगुहतातं त्रिनेत्रं
सालोकादिकैवल्यप्रदचरित्रम्
नीलकण्ठमनेकफलदं शूलपाणिमशोकशुभदं
मूलभूतममूल्यवरदं कालकालमखण्डसुखदम्

◇ ◇ ◇ ◇ ◇

126 tyAgarAjaM bhajeham

त्यागराजं भजेऽहम्

रागं: नीलाम्बरि (२९) ताळं: रूपकम्

पल्लवि

त्यागराजं भजेऽहं सततं

अहं सततं त्यागराजं भजेऽहम्

समष्टिचरणम्

योगि नारायणाद्युपासितं प्रभासितं

योगभोगवितरणनिपुणतरकरं दयाकरम्

नागरखण्डाख्यपुराणप्रतिपाद्यमनाद्यं

नामरूपमयचोद्यं नारदगुरुगुहवेद्यम्

◇ ◇ ◇ ◇ ◇

127 tyAgeshaM bhaja

त्यागेशं भज रे

रागं: रुद्रप्रिय (२२) ताळं: आदि

पल्लवि

त्यागेशं भज रे रे मानस तापार्तिं त्यज रे रे मानस

समष्टिचरणम्

योगीशविहितं भोगीशमहितं श्रीगुरुगुहविदितं सुरमुदितं
सिंहासनपतिं पशुपतिम्

◇ ◇ ◇ ◇ ◇

त्रिपुरसुन्दरि नमोस्तु ते

रागं: देवमनोहरि (२२) ताळं: आदि

पल्लवि

त्रिपुरसुन्दरि नमोस्तु ते दीनजनाभीष्टदायिनि श्री

अनुपल्लवि

त्रैपदपरब्रह्मरूपिणि तत्पदलक्ष्यार्थस्वरूपिणि

चरणम्

वेदशास्त्रादिविनुतस्फूर्ते विधिगुरुगुहादिपूजितमूर्ते
कामितफलप्रदनिपुणकीर्ते कमनीयकामकलाप्रदर्शिते
माधवसोदरि महिषासुरादिमर्दनि महादेवमनोहरि
महाकैलासवासप्रियकरि महाकामेश्वरि सम्पत्करि

◇ ◇ ◇ ◇ ◇

त्रिपुरसुन्दरि शङ्करि

रागं: साम (२९) ताळं: रूपकम्

पल्लवि

त्रिपुरसुन्दरि शङ्करि गुरुगुहजननि मामव

समष्टिचरणम्

त्रिपुरादिचक्रेश्वरि साम्राज्यप्रदकरि
सामगानप्रियकरि सच्चिदानन्दसुखकरि
त्रिपुरसुरादिभञ्जनि श्रीपुरवासनिरञ्जनि
वेदशास्त्रविश्वासिनि विधिपूजितविनोदिनि

◇ ◇ ◇ ◇ ◇

130 trilocanamohinIm

त्रिलोचनमोहिनीम्

रागं: भैरवि (२०) ताळं: आदि

पल्लवि

त्रिलोचनमोहिनीं त्रिपुराणीं त्रिपुरसुन्दरीं सदा भजेऽहम्

समष्टिचरणम्

त्रिलोकजननीं त्र्यम्बकरमणीं त्रितापहाररिणीं त्रिपदरूपिणीं
सालोक्यादिमुक्तिदायिनीं सद्गुरुगुहसन्तोषकारिणीम्

◇ ◇ ◇ ◇ ◇

131 daNDanAthayA

दण्डनाथया रक्षितोऽहम्

रागं: खमास् (२८) ताळं: आदि

पल्लवि

दण्डनाथया रक्षितोऽहं दैत्यकुलादिजितचतुरया श्री

समष्टिचरणम्

भण्डसोदरविशुक्रहरया बुधनुतगिरिचक्ररथस्थितया

चण्डोच्चण्डसेनाराज्या चण्डिकेशनुतगुरुगुहधरया

◇ ◇ ◇ ◇ ◇

132 daNDAyudhapANim

दण्डायुधपाणिम्

रागं: आनन्दभैरवि (२०) ताळं: रूपकम्

पल्लवि

दण्डायुधपाणिं दण्डितदैत्यश्रेणिं
दयानिधिं भज रे हृदय सततं सुरविनुतं

अनुपल्लवि

चण्डांशुशतकोटिसंकाशं जगदीशमखण्डरूपं
अण्डजमणिमण्डलमयकुण्डलादिमण्डिताङ्गसुकुमारम्
खण्डिततारकशूरं पण्डिततर नववीरं चण्डिकेशावतारम्

चरणम्

मन्दस्मितवदनारविन्दं मातुलगोविन्दं
शरणागतसुरबृन्दं बहुमानितमुनिबृन्दं
परिपालितमुचुकुन्दं प्रणतविरिञ्चिमुकुन्दम्
अधरमधुरमकरन्दं मृदुतरवचनमनिन्दं
मायामूलकन्दं स्कन्दं शन्दं पृथिव्यात्मकगन्धम्
गगनात्मकसुमगन्धं वायुमयधूपगन्धं
वह्निमयदीपबृन्दं अमृतात्मकरसबृन्दम्
श्रीगुरुगुहमानन्दं सुन्दरकरचरणारविन्दं

रथगजतुरगवृन्दं सत्यज्ञानानन्दमतिस्वच्छन्दम्

◇ ◇ ◇ ◇ ◇

133 dakShiNAmUrte

दक्षिणामूर्ते

रागं: शङ्कराभरणम् (२९) ताळं: झम्प

पल्लवि

दक्षिणामूर्ते विदळितदासार्ते श्री
चिदानन्दपूर्ते सदा मौनकीर्ते

अनुपल्लवि

अक्षयसुवर्णवटवृक्षमूलस्थिते रक्ष मां सनकादिराजयोगिस्तुते
रक्षितसङ्गते शिक्षितदुर्युक्ते अक्षरानुरक्ते अविद्याविरक्ते

चरणम्

निखिलसंशयहरणनिपुणतरयुक्ते निर्विकल्पसमाधिनिद्राप्रसक्ते
अखंडैकरसपूर्णारूढशक्ते अपरोक्षनित्यबोधानन्दमुक्ते
सुखतरप्रवृत्ते स्वाज्ञाननिवृत्ते स्वगुरुगुहोत्पत्ते स्वानुभोगतृप्ते

◇ ◇ ◇ ◇ ◇

दाक्षायणि

रागं: तोडि (८) ताळं: रूपकम्

पल्लवि

दाक्षायणि अभयाम्बिके वरदाभयहस्ते नमस्ते श्री

अनुपल्लवि

दीक्षासन्तुष्टमानसे दीनावनहस्तसारसे
कांक्षितार्थप्रदायिनि कामतन्त्रविधायिनि
साक्षिरूपप्रकाशिनि समस्तजगद्विलासिनि

चरणम्

सकलनिष्कळस्वरूपतेजसे सकललोकसृष्टिकरणभ्राजसे
सकलभक्तसंरक्षणयशसे सकलयोगिमनोरूपतत्वतपसे
प्रबलगुरुगुहोदये पञ्चाननहृदालये
भरतमतङ्गादिनुते भारतीशपूजिते

◇ ◇ ◇ ◇ ◇

135 dAsharathe

दाशरथे

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

दाशरथे दीनबन्धो दानवभीकर दामोदर
केशव मामव सीताधव केयूरहार रघुवीर
कोमलपादाब्ज कोदण्डराम श्यामळविग्रह संपूर्णकाम
नामकीर्त्तने सदामोद नारदवीणाह्ळादाह्ळाद ॥

◇ ◇ ◇ ◇ ◇

136 divAkaratanujam

दिवाकरतनुजं शनैश्चरम्

रागं: यदुकुलकाम्भोजि (२८) ताळं: चतुरश्र एकम्

पल्लवि

दिवाकरतनुजं शनैश्चरं धीरतरं सन्ततं चिन्तयेऽहम्

अनुपल्लवि

भवाम्बुनिधौ निमग्नजनानां भयङ्करं अतिक्रूरफलदं
भवानीशकटाक्षपात्रभूतभक्तिमतामतिशयशुभफलदम्

चरणम्

कालाञ्जनकान्तियुक्तदेहं कालसहोदरं काकवाहं
नीलांशुकपुष्पमालावृतं नीलरत्नभूषणालंकृतम्
मालिनीविनुतगुरुगुहमुदितं मकरकुम्भराशिनाथं
तिलतैलमिश्रितान्नदीपप्रियं दयासुधासागरं निर्भयम्
कालदण्डपरिपीडितजानुं कामितार्थफलदकामधेनुं
कालचक्रभेदचित्रभानुं कल्पितच्छायादेवीसूनुम्

◇ ◇ ◇ ◇ ◇

137 dInabandho

दीनबन्धो

रागं: शङ्करभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

दीनबन्धो दयासिन्धो सुधीमणे मे मुदं देहि सदा देहि
जानकीनायकाम्भोजानन साधुसंरक्षणा-
पाङ्गाखिलदेवतासार्वभौमादिवन्द्य ॥

◇ ◇ ◇ ◇ ◇

देवि जगदीश्वरि

रागं: भैरवि (२०) ताळं: रूपकम्

पल्लवि

देवि जगदीश्वरि दीनजनावनशङ्करि

अनुपल्लवि

देवराजपूजिते देशकालप्रवर्तिते
भावरागताळयुते भैरविभार्गविविनुते

चरणम्

महादेवमोहिते मामव ललिते वरदे
महात्रिपुरवासिते महनीयसंपदे
महापापविमोचिते मानितगुरुगुहमहिते
मङ्गळवरप्रदे वशिन्यादिवाग्देवते

◇ ◇ ◇ ◇ ◇

139 dharmasaMvarddhani

धर्मसंवर्धनि

रागं: मध्यमावति (२२) ताळं: रूपकम्

पल्लवि

धर्मसंवर्धनि दनुजसंमर्दिनि
धराधरात्मजे अजे दयया मां पाहि पाहि

अनुपल्लवि

निर्मलहृदयनिवासिनि नित्यानन्दविलासिनि
कर्मज्ञानविधायिनि काङ्क्षितार्थप्रदायिनि

चरणम्

माधवसोदरि सुन्दरि मध्यमावति शङ्करि
माधुर्यवाग्विजृम्भिणि महादेवकुटुम्बिनि
साधुजनचित्तरञ्जनि शाश्वतगुरुगुहजननि
बोधरूपिणि निरञ्जनि भुवनेशदुरितभञ्जनि
पादजविश्वविलासिनि पञ्चनदीशोल्लासिनि
वेदशास्त्रविश्वासिनि विधिहरिहरप्रकाशिनि

◇ ◇ ◇ ◇ ◇

नन्दगोपाल

रागं: यमुनाकल्याणि (६५) ताळं: आदि

पल्लवि

नन्दगोपाल मुकुन्द गोकुलनन्दन्न यमुनातीरविहार

अनुपल्लवि

मन्दरगिरिधर मामव माधव मुरलीधर मधुसूधन हरे

चरणम्

मन्दहासवदन मञ्जुळचरण अरविन्दलोचन आश्रितरक्षण
पीताम्बरधर पन्नगशयन कलिकल्मषहरण करुणापूरण
वन्दितमुनिबृन्द गुरुगुहानन्द वैकुण्ठस्थितानन्द-
कन्द गोवर्धनोद्धार गोपस्त्रीजार गोविन्द

◇ ◇ ◇ ◇ ◇

141 nabhomanIcandrAgni

नभोमणिचन्द्राग्निनयनम्

रागं: नभोमणि (४०) ताळं: मिश्र चापु

पल्लवि

नभोमणिचन्द्राग्निनयनं नगजासहितबृहदीश्वरं
नमाम्यहं सततं सततम्

समष्टिचरणम्

शुभोदयकरणनिपुणङ्घ्रिं शुद्धस्फटिकसंकाशं
शरभेन्द्रसंसेवितचरणं राजशेखरं भयहरणं
ऋभुप्रभृतिमुनिहृत्सदनं त्रिभुवनकरणमदनमथनम्

◇ ◇ ◇ ◇ ◇

नमस्ते परदेवते

रागं: देवराञ्जि (१५) ताळं: तिश्र एकम्

पल्लवि

नमस्ते परदेवते शिवयुवते कामाक्षि नमस्ते नमस्ते

समष्टिचरणम्

समस्तविश्वोदयस्थितिलयमूलप्रकृते
साधुजनचित्तवृत्ते सङ्गीतशास्त्रयुक्ते
विमलगुरुगुहोत्पत्ते विनोदकरसम्पत्ते
समस्तदेवरञ्जितसच्चिदानन्दमूर्ते

◇ ◇ ◇ ◇ ◇

143 namo namaste gIrvANi

नमो नमस्ते गीर्वाणि

रागम् गीर्वाणि (४३) : ताळं: मिश्र चापु

पल्लवि

नमो नमस्ते गीर्वाणि नादबिन्दुकलाश्रेणि

समष्टिचरणम्

सुमनोपासितकल्याणि सुरासुरनुते ब्रह्माणि
उमापतिरमापतिविदिते कुमारगुरुगुहसंमुदिते

◇ ◇ ◇ ◇ ◇

नरसिम्हाऽऽगच्छ

रागं: मोहनम् (६५) ताळं: चापु

पल्लवि

नरसिम्हाऽऽगच्छ परब्रह्मपुच्छ स्वेच्छ स्वच्छ

अनुपल्लवि

हरिहरब्रह्मेन्द्रादिपूजितात्यच्छ

परमभागवतप्रह्लादभक्त्यच्छ

चरणम्

धीरतरघटिकाचलेश्वर सौरतरहेमकोटीश्वर

वीरवर मोहनविभास्वर मार वरमानवहरीश्वर

मुरहरनगधर सरसिजकर परमपुरुष पवनजशुभकर

सुरुचिरकरिगिरिवरद विचर सरसगुरुगुहहृदयसहचर

◇ ◇ ◇ ◇ ◇

145 naraharimAshrayAmi

नरहरिमाश्रयामि

रागं: जयशुद्धमाळवि (१८) ताळं: त्रिपुट

पल्लवि

नरहरिमाश्रयामि सततं नारदादिमुनिविनुतं श्री

समष्टिचरणम्

परामभागवतप्रह्लादवरदं जयशुद्धमाळवी-

कुरुपाञ्चालादिविहारं गुरुगुहमोदितमतिधीरम्

◇ ◇ ◇ ◇ ◇

नर्मदाकावेरी

रागं: नामदेशि (५०) ताळं: त्रिपुट

पल्लवि

नर्मदाकावेरीतीरनिलये मणिवलये कलये

समष्टिचरणम्

धर्मसंवर्धनि धनिनि दनुजसंमर्दिनि जननि
निर्मदगुरुगुहविश्वासिनि निर्मल हृदयाब्जनिवासिनि
कर्मज्ञानयोगरूपिणि धर्मादिपुरुषार्थदायिनि

◇ ◇ ◇ ◇ ◇

147 navaratnamAlinIm

नवरत्नमालिनीम्

रागं: गमकक्रिया (५३) ताळं: खण्ड एकम्

पल्लवि

नवरत्नमालिनीं नतजनपालिनीं

नमाम्यहं निजगुरुगुहाद्याराधिनीम्

समष्टिचरणम्

भवानीशभक्तजनदुःखध्वंसिनीं

भगमालीनकुलीभिः पूजितजननीम्

नवविधविषाद्याभिचारादिनाशिनीं

नवमणिरथारोहितयुद्धरङ्गिणीम्

◇ ◇ ◇ ◇ ◇

नवरत्नविलासविभवप्रदे

रागं: नवरत्नविलासम् (२०) ताळं: आदि

पल्लवि

नवरत्नविलासविभवप्रदे नतशुभप्रदे बहुवरदे जय जय

समष्टिचरणम्

भवरोगपरिहारिणि शर्वाणि भवमोहनकररूपिणि भवानि
नवचक्रबिन्दुपीठनिवासिनि नारायणि गुरुगुहविश्वासिनि

◇ ◇ ◇ ◇ ◇

149 nAgagAndhArI

नागगान्धारीरागनुते

रागं: नागगान्धारि (२०) ताळं: आदि

पल्लवि

नागगान्धारीरागनुते नगजानन्दिते मामव

अनुपल्लवि

नागराजविनुते सुरहिते वागीशादिगुरुगुहवन्दिते
भागवतादिनुतपरदेवते परमतत्वार्थबोधिते शिवे

चरणम्

परमशान्तस्वरूपाकारे पादपङ्कजे पद्मकरे
निरतिशयसुखकरे सुरुचिरे सशरचापपाशाङ्कुशधरे

◇ ◇ ◇ ◇ ◇

150 nAgali”ngaM namAmi

नागलिङ्गं नमामि

रागं: मोहनम् (६५) ताळं: आदि

पल्लवि

नागलिङ्गं नमामि सततं नामरूपप्रपञ्चातीतलिङ्गम्

अनुपल्लवि

नागराजमणिभूषितलिङ्गं श्रीनगरस्थितवल्मीकलिङ्गम्

चरणम्

आगमवेदान्तसारलिङ्गं आदिमध्यान्तरहितलिङ्गं
मूलभूतकारणात्मलिङ्गं नीलकण्ठस्वयंप्रकाशलिङ्गम्
नागेन्द्रादिविनुतशङ्करलिङ्गं नारदादिनुतनन्दितुरङ्गं
वागीशवरगुरुगुहवन्दितसुन्दरशिवमोहनकरलिङ्गम्

◇ ◇ ◇ ◇ ◇

151 nAgali”ngaM bhajeham

नागलिङ्गं भजेऽहम्

रागं: शङ्कराभरणम् (२९) ताळं: आदि

पल्लवि

नागलिङ्गं भजेऽहं अनादिलिङ्गं भजेऽहम्

अनुपल्लवि

नागवल्लीप्रसङ्गं नगजार्धाङ्गं नन्दितुरङ्गं
आगमशास्त्रपुराणप्रसङ्गं अविद्याभङ्गं अतिधवळाङ्गम्

चरणम्

स्थूलसूक्ष्मकारणात्मलिङ्गं सुखप्रदायकसुन्दरलिङ्गं
मूलभूतप्राकृतलिङ्गं मुनिगणाष्टनागार्चितलिङ्गम्
नीलकण्ठगुरुगुहान्तरङ्गं नित्यशुद्धकरविधृतकुरङ्गं
कालहरं शिरोविधृतगङ्गं करुणापाङ्गं विजितानङ्गम्

◇ ◇ ◇ ◇ ◇

152 nAgAbharaNam

नागाभरणम्

रागं: नागाभरणम् (३०) ताळं: आदि

पल्लवि

नागाभरणं नगजाभरणं नमामि भयहरणं भवतरणम्

समष्टिचरणम्

भोगिराजशयनार्चितचरणं भुक्तिमुक्तिदप्रपञ्चभरणं
योगिराजगुरुगुहप्रकाशं त्यागराजरूपं बृहदीशम्

◇ ◇ ◇ ◇ ◇

153 niShAdAdi

निषादादि

रागं: निषादम् (६०) ताळं: मिश्र चापु

पल्लवि

निषादादिदेशाधिपतिनुतनीलकण्ठेश पालय माम्

समष्टिचरणम्

वृषभवाहन विश्वमोहन

विषयवासनादिविदारण वीरगुरुगुहोदयकारण

◇ ◇ ◇ ◇ ◇

नीरजाक्षि कामाक्षि

रागं: हिन्दोळम् (२०) ताळं: रूपकम्

पल्लवि

नीरजाक्षि कामाक्षि नीरदचिकुरे त्रिपुरे

अनुपल्लवि

शारदारमानयने सारसचन्द्रानने
वारिजपादे वरदे तारय मां तत्वपदे

चरणम्

गौरीहिन्दोळद्युतिहीरमणिमयाभरणे
शौरिविरिञ्चिविनुतशिवशक्तिमयनवावरणे
नारीमण्याद्यर्चितनवनाथान्तःकरणे
सूरिजनसंसेवितसुन्दरगुरुगुहकरणे

◇ ◇ ◇ ◇ ◇

155 nIlakanTha mahAdeva

नीलकण्ठ महादेव

रागं: वसन्त (१५) ताळं: रूपकम्

पल्लवि

नीलकण्ठ महादेव निखिललोकलसत्प्रताप

अनुपल्लवि

फालचन्द्रशेखर हर पार्वतीमनोहर

चरणम्

धवळितकैलासक्षेत्र सामवेदगीतस्तोत्र

अवनिब्रह्मकपालक्षेत्र कामदहनविलासनेत्र

◇ ◇ ◇ ◇ ◇

नीलकण्ठाय नमो नमस्ते

रागं: नादनामक्रिय (१५) ताळं: मिश्र चापु

पल्लवि

नीलकण्ठाय नमो नमस्ते

निखिलागमसन्नुतवराय नीरजासनादिपूजिताय

अनुपल्लवि

पालितदासजनमुकुन्दाय पन्नगाभरणभूषिताय

चरणम्

बालार्कशशिवह्निनेत्रधराय बालगुरुगुहसेविताय

बालकुचाम्बासहवासाय

बालगीर्वाणगीतनादनामक्रियामोदिताय

श्रीनाथचिदानन्दानन्दसहिताय दक्षिणकाशीस्थिताय

◇ ◇ ◇ ◇ ◇

157 nIlakanTham

नीलकण्ठं भजेऽहम्

रागं: केदारगौळ (२८) ताळं: रूपकम्

पल्लवि

नीलकण्ठं भजेऽहं सततं नीरजासनादिनुतम्

अनुपल्लवि

बालकुचाम्बासहितं बालचन्द्रसेवितं
शीलगुरुगुहपूजितं श्रीकदम्बवननाथम्

चरणम्

अक्षयरूपाखण्डकावेरीतीरोत्तराभिमुखं
पञ्चमुखं रक्षितभक्तप्रमुखं नक्षत्रेशशेखरम्
नामरूपविचित्रतरदक्षतरमीश्वरं केदारगौळप्रियकरं
दक्षिणकाशीपुरं दण्डितकामत्रिपुरं
दक्षाध्वरहरं हरं दयाकरं कमलकरम्

◇ ◇ ◇ ◇ ◇

नीलाङ्गम्

रागं: नीलाम्बरि (२९) ताळं: खण्ड एकम्

पल्लवि

नीलाङ्गं हरिं नित्यं स्मरामि

अनुपल्लवि

नीलाम्बरानुजं निरुपमपदाम्बुजं
नीलकण्ठपिञ्छमौळिं दासाळिम्

चरणम्

कारुण्यसागरं कमनीयकन्धरं मारजयसुन्दरं माधवं नगधरं
सारसकरं वरं सरससुगुणाकरं श्रीरुक्मिणीवरं शृङ्गारशेखरं
वीरं गुरुगुहोपचारं नवनीतचोरं गोपस्त्रीजारं धीरतरम्

◇ ◇ ◇ ◇ ◇

159 nIlAcalanAtham

नीलाचलनाथम्

रागं: सुमद्युति (५७) ताळं: आदि

पल्लवि

नीलाचलनाथं भजेऽहं निखिललोकजगद्प्रसिद्धेश्वरम्

अनुपल्लवि

नीलाम्बिकामनोल्लासकरं निरन्तरं भक्तवशङ्करम्

चरणम्

इन्द्रनीलपर्वतस्थितप्रसिद्धं इन्द्रादिपूजितवरप्रदं
माधवाद्यमरबृन्दसन्नुतं मानितगुरुगुहवन्दितवरम्
चन्द्रशेखरं कृपाकरं गङ्गाधरं शूलादिधरं
अर्जुनतपोमहितपाशुपतास्त्रप्रदं त्रिपुरादिहरम्

◇ ◇ ◇ ◇ ◇

नीलोत्पलाम्बा जयति

रागं: नारायणगौळ (२९) ताळं: मिश्र चापु

पल्लवि

नीलोत्पलाम्बा जयति नित्यशुद्धशुभदायिका श्री

अनुपल्लवि

मूलाज्ञानहरगुरुगुहजननी
फाललोचनी पुराणी पन्नगवेणी नतवाणी

चरणम्

शिवकामेश्वरी शङ्करी शृङ्गाररसकरी
पाशाङ्कुशधरी परमदयाकरी
भवरोगहरनिपुणवरदायिन्यां नारायणगौळरागमोदिन्यां
भुक्तिमुक्तिमच्चित्तं विलयतु

◇ ◇ ◇ ◇ ◇

161 nIlotpalAmbAm

नीलोत्पलाम्बाम्

रागं: नारीरीतिगळ (२०) ताळं: मिश्र चापु

पल्लवि

नीलोत्पलाम्बां भज रे रे चित्त

वीथिविटङ्कत्यागराजान्तरङ्गां श्री

अनुपल्लवि

मूलकूटत्रयकलेबरशोभारुणां मुचुकुन्दादिनुतपङ्कजचरणां

मूलविद्यादाननिपुणां विधिपूजितविनोदकिरणाम्

चरणम्

कमलानगरनिवासिनीं गुरुगुहमार्गरीतिकौळिनीं

कमनीयकामकलाप्रदर्शिनीं कादिहाद्यादिमनुविश्वासिनीम्

सामगानशिरःकम्पिनीं अखिलमहादुरितभञ्जनीं

कोमळकुचकचभराङ्गिणीं मुकुन्दसोदरीं पुराणीम्

◇ ◇ ◇ ◇ ◇

नीलोत्पलाम्बिकया

रागं: कन्नडगौळ (२२) ताळं: आदि

पल्लवि

नीलोत्पलाम्बिकया निर्वाणसुखप्रदया रक्षितोऽहम्

अनुपल्लवि

वल्लीशगुरुगुहपूजितया वरलक्ष्मीवाणीसेवितया
हल्लीशलास्यसन्तुष्टया आरक्तवर्णशोभितकरया

चरणम्

काशीकन्नडगौळदेशादिवासदासजनावनतोषितया
वासवादिवन्दितवागीशवासुदेवाद्याराधितया
श्रीशिवपुराणप्रतिपादितया शिवशङ्करनायिकया श्री

◇ ◇ ◇ ◇ ◇

163 nIlotpalAmbikAyAm

नीलोत्पलाम्बिकायाम्

रागं: पूर्वगौळ (२९) ताळं: रूपकम्

पल्लवि

नीलोत्पलाम्बिकायां भक्तिं करोमि श्री

अनुपल्लवि

नीलोत्पलनायकसमेतायां निखिलागमसन्नुतायां

नीलाम्बरपुष्पमालावृतायाम्

चरणम्

कविजनादिमोदिन्यां कमलेशपालिन्यां

सूर्यकोटिप्रकाशिन्यां सूरिजनोपासितपूर्वगौळप्रकाशिन्याम्

अविद्याविद्यास्वरूपिण्यां आरक्तवर्णरूपिण्यां

इभवदनगुरुगुहादिजनन्याम्

◇ ◇ ◇ ◇ ◇

164 nIlotpalAmbikAyAH

नीलोत्पलाम्बिकायाः परम्

रागं: गौळ (१५) ताळं: रूपकम्

पल्लवि

नीलोत्पलाम्बिकायाः परं नहि रे रे चित्त

अनुपल्लवि

सालोकादिमुक्तिदायिन्याः सुरपतिगुरुगुहसन्नुतचरणायाः
नीलरत्नमणिभूषिण्याः निरञ्जन्याः

चरणम्

स्थूलसूक्ष्मकारणरूपिण्याः बालचन्द्रसेवितवरदायिन्याः
कैलासविलसितकुळकौळमार्गयोगिन्याः

◇ ◇ ◇ ◇ ◇

165 nIlotpalAmbikAyAstava

नीलोत्पलाम्बिकायास्तव

रागं: मायामाळवगौळ (१५) ताळं: मिश्र चापु

पल्लवि

नीलोत्पलाम्बिकायास्तव दासोऽहं श्री

अनुपल्लवि

नीलाम्बरानुजायाः निरुपमपदाम्बुजायाः
नीलकण्ठार्धशरीरिण्याः निखिललोकजनन्याः

चरणम्

मायामाळवगौळादिदेशप्रकाशिन्याः
मातङ्गवदनेन्द्रादिपूजितवरदायिन्याः
मायामयविश्वोत्पत्तिस्थितिलयकारणायाः
माधुर्यामृतधारमहादेवगुरुगुहपाशिन्याः

◇ ◇ ◇ ◇ ◇

166 nIlotpalAmbikAyai

नीलोत्पलाम्बिकायै

रागं: केदारगौळ (२८) ताळं: आदि

पल्लवि

नीलोत्पलाम्बिकायै नमस्ते जगदम्बिकायै

अनुपल्लवि

मूलाधारक्षेत्रस्थितायै मुचुकुन्दवरप्रदायै
मूलमन्त्रात्मिकायै मूलाज्ञानहरगुरुगुहवरदायै

चरणम्

कामसञ्जीविन्यै कमलावाणीसेवितायै
कलिकल्मषनाशिन्यै करुणामृतरसप्रवाहिन्यै
कामेश्वरमोहितकौळिन्यै कामतन्त्रवितरणनलिन्यै
कमलेशपूजितत्रिकोणायै कामितार्थफलप्रदनिपुणायै

◇ ◇ ◇ ◇ ◇

167 nIlotpalAmbike

नीलोत्पलाम्बिके

रागं: छायागौळ (१५) ताळं: रूपकम्

पल्लवि

नीलोत्पलाम्बिके नित्यशुद्धात्मिके मामव

अनुपल्लवि

त्रिलोकजननि त्रिभुवनमोहिनि

त्रैलोक्यचक्रवासिनि सद्गुरुगुहविश्वासिनि

चरणम्

मायाप्रपञ्चातीतस्वरूपिणि

मुचुकुन्दभक्तपालिनि वरदायिनि

छायागौळरागमोदिनि निरञ्जनि

सायुज्यादिदायिनि सच्चिदानन्दरूपिणि

◇ ◇ ◇ ◇ ◇

नी साटि दैवमेन्तुलेदनि

रागं: श्रीरञ्जनि (२२) ताळं: रूपकम्

पल्लवि

नी साटि दैवमेन्तुलेदनि मरुलु कोण्डिरा

नी दानरा नन्नेलरा म्रोक्केर

अनुपल्लवि

वासवाद्यमरुलेल्ल वम्रिस्वरूप

मेत्ति वासुदेवगर्वमनचिवरुसगानमरु

श्रीपुरवास दास चिद्विलास वल्लिकेश जगदीश

मुक्तायि स्वर साहित्यम्

नी मीदने मिगुलवलपु सोलपुगलुपुगोलुपु

मनम्बुतो निजम्बुगा बयलुदेरि होयलुमीरि

चेलिमिकोरि वलचिनानु बिरानबहु वरालोसगु

◇ ◇ ◇ ◇ ◇

169 pa”nkajamukha

पङ्कजमुख

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

पङ्कजमुख शङ्खरहित सङ्कटहर
वेङ्कटगिरिवास नारायणा-
नन्त गोविन्द दामोदरानन्द संरक्षकाश्रित-
वात्सल्य पादाम्भोरुह पाहि मां दीनबन्धो ॥

◇ ◇ ◇ ◇ ◇

170 pañcamAta”ngamukha

पञ्चमातङ्गमुखगणपतिना

रागं: मलहरि (१५) ताळं: रूपकम्

पल्लवि

पञ्चमातङ्गमुखगणपतिना परिपालितोऽहं सुमुखेन श्री

अनुपल्लवि

पञ्चभूतात्मकप्रपञ्चोदयादिकरणव्-

इरिञ्चिहरिरुद्रनुतेन पञ्चवक्त्रशिवसुतेन

चरणम्

वरदाभयपाशसृणिकपालदन्तमोदकमुद्गराक्षमालाकरेण

कमलापुरविहारेण पुरुहूताद्यखिलदेवपूजितविघ्नेश्वरेण

वरगुरुगुहसोदरेण सुरुचिरलम्बोदरेण

करुणार्द्रगौरतरेण कलिमलहरणचतुरेण

◇ ◇ ◇ ◇ ◇

171 pañcabhUtakiraNavalim

पञ्चभूतकिरणावलिम्

रागं: किरणावलि (२१) ताळं: खण्ड एकम्

पल्लवि

पञ्चभूतकिरणावलिं चन्द्रमौलिं
भावयामि गुरुगुहतातं सन्ततम्

समष्टिचरणम्

पञ्चीकृतप्रपञ्चातीतमगणितं फणिराजाभरणं पल्लवजयचरणं
वाञ्छितफलप्रदं बृहन्नायकीशं बृहदीशं जगदीशं स्वयंप्रकाशम्

◇ ◇ ◇ ◇ ◇

पञ्चाशत्पीठरूपिणि

रागं: देवगान्धारम् (२२) ताळं: आदि

पल्लवि

पञ्चाशत्पीठरूपिणि मां पाहि श्री राजराजेश्वरि

अनुपल्लवि

पञ्चदशाक्षरि पाण्ड्यकुमारि पद्मनाभसहोदरि शङ्करि

चरणम्

देवि जगज्जननि चिद्रूपिणि देवादिनुतगुरुगुहरूपिणि
देशकालप्रवर्तिनि महादेवमनोल्लासिनि निरञ्जनि
देवराजमुनिशापविमोचिनि देवगान्धाररागतोषिणि
भावरागताळविश्वासिनि भक्तजनप्रियफलप्रदायिनि

◇ ◇ ◇ ◇ ◇

पन्नगशयन पद्मनाभ

रागं: मध्यमावति (२२) ताळं: आदि

पल्लवि

पन्नगशयन पद्मनाभ परिपालय मां पङ्कजनाभ

अनुपल्लवि

उन्नतपाण्ड्यकेरळनिवास श्रीनिवास चिदानन्दविलास

चरणम्

पायसान्नप्रियकर श्रीकर परशुरामक्षेत्रप्रभाकर
परमभक्तप्रह्लादादिविनुत प्रसिद्धगुरुगुहहितोपकार
मायातीत मन्दरगिरिधर करधृतशङ्खचक्रगदादिधर
तोयजासनादिसंसेवित दामोदर दयाकर वरदकर

◇ ◇ ◇ ◇ ◇

परञ्ज्योतिष्मती पार्वती

रागं: ज्योति (६८) ताळं: आदि

पल्लवि

परञ्ज्योतिष्मती पार्वती परमेश्वरयुवती महाभगवती

समष्टिचरणम्

निरञ्जनी निखिललोकजननी निरङ्कुशकृपाङ्गुतरञ्जनी
निरन्तरं गुरुगुहसंरक्षणी निरंशतत्वलक्षणी विचक्षणी

◇ ◇ ◇ ◇ ◇

175 paradevatA b.rhatkucAmbA

परदेवता बृहत्कुचाम्बा

रागं: धन्याशि (२०) ताळं: आदि

पल्लवि

परदेवता बृहत्कुचाम्बा संरक्षतु मां श्रीजगदम्बा

अनुपल्लवि

शारदारमासन्नुतसकळा शरच्छाम्पेयपुष्पपदयुगळा
वरगुरुगुहजननी चिन्मालिनी स्थिरतरसम्पत्प्रदानधनिनी

चरणम्

चराचरात्मकप्रपञ्चजननी चारुचन्द्रहासिनी सुवासिनी
चिदानन्दमहालिङ्गमोहिनी चिद्रूपिणी भक्तविश्वासिनी
करुणारसप्रवाहिनी कौळिनी कलिकल्मषनाशिनी हंसिनी
कलामालिनी कात्यायनी कञ्जलोचनी भवपाशमोचनी

◇ ◇ ◇ ◇ ◇

176 paradevate namaste

परदेवते नमस्ते

रागं: आनन्दभैरवि (२०) ताळं: आदि

पल्लवि

परदेवते नमस्ते पाहि मां ललिते वरदे

समष्टिचरणम्

सुरसेविते नित्यशुद्धविद्ये सरससदये सङ्गीतप्रिये
सरसिजपदयुगळे सकले गुरुगुहोदये विजये त्रिपुरे

◇ ◇ ◇ ◇ ◇

177 paradevate bhaktapUjite

परदेवते भक्तपूजिते

रागं: हुशानि (२२) ताळं: आदि

पल्लवि

परदेवते भक्तपूजिते भद्रं देहि आशु मां पाहि

समष्टिचरणम्

चिरतरसंपत्प्रदश्रीविद्ये चिदग्निकुण्डोदयशुभनित्ये

हरिहयादिनुतगुरुगुहविदिते हिरण्यमणिमयमन्दिरस्थिते

◇ ◇ ◇ ◇ ◇

परदेवते भक्तभवमोदिनि

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

परदेवते भवभक्तमोदिनि पाहि मां पालिनि
हंसिनि करुणाकरि कमलाक्षि सुन्दरि कामिनि
कौळिनि शङ्करि परिशुद्धचित्तरञ्जनि मालिनि
पादपङ्केरुहपद्मिनि गुरुशिष्यरूपधारिणि
कोमळाकारिणि मन्त्रिणि योगिनि श्री ॥

◇ ◇ ◇ ◇ ◇

179 parandhAmavati

परन्धामवती

रागं: धामवति (५९) ताळं: रूपकम्

पल्लवि

परन्धामवती जयति पार्वती परमेशयुवती

समष्टिचरणम्

परंज्योतिर्विकासिनी परमात्मप्रकाशिनी
निरन्तरं गुरुगुहजननी बृहदीशरञ्जनी

◇ ◇ ◇ ◇ ◇

परमशिवात्मजम्

रागं: यमुनाकल्याण्(६५) इ ताळं: आदि

पल्लवि

परमशिवात्मजं नमामि सततं पालितभक्तं सदा भजेऽहम्

समष्टिचरणम्

सुरसैन्यनाथं वल्लीसनाथं वरशिखिवाहनं वारिजलोचनं
शूरतारकादिहरं शिवकरं क्रूरपापहरं कुमारगुरुगुहम्

◇ ◇ ◇ ◇ ◇

‘

181 parameshvari jagadIshvati

परमेश्वर जगदीश

रागं: चलनाट (३६) ताळं: अदि

पल्लवि

परमेश्वर जगदीश शङ्कर पाहि मां प्रणतार्तिहर श्री

अनुपल्लवि

पुरहर मृगधर सुन्दरेश्वर धर्मसंवर्धनीमनोहर

चरणम्

पञ्चनदीश्वर गङ्गाधरेश्वर पन्नगाभरण भक्तजनावन
पञ्चब्रह्महत्यादिपापहर परशिवतत्वार्थबोधितचतुर
पञ्चनदक्षेत्रप्रभाकर पालितगुरुगुह भवभयहर
वीर क्षेत्रपालविनुतचरण विचित्रयमभयादिनिवारण

◇ ◇ ◇ ◇ ◇

परमेश्वरेण

रागं: पूर्ववराळि (३) ताळं: आदि

पल्लवि

परमेश्वरेण पालितोऽस्म्यहम्

समष्टिचरणम्

परमदयाकरगुरुगुहवरेण पार्वतीमनोल्लासकरणेन
परमशान्तस्वरूपात्मकेन पूर्ववराळिरागमुदितेन

◇ ◇ ◇ ◇ ◇

183 parAshakti Ishvari

पराशक्ति ईश्वरि

रागं: गौरिवेलावलि (२३) ताळं: आदि

पल्लवि

पराशक्ति ईश्वरि जगज्जननि

अनुपल्लवि

परादिचत्वारिवाक्स्वरूपिणि परात्परि पाहि मां शङ्करि

चरणम्

मुरारिप्रमुखाद्युपासिनि मूलमन्त्रयन्त्रस्वरूपिणि
गौरीशसुन्दरेश्वरमोहिनि गुरुगुहजननि गानलोलिनि

◇ ◇ ◇ ◇ ◇

184 parAshaktim

पराशक्तिम्

रागं: रुद्रप्रिय (२२) ताळं: आदि

पल्लवि

पराशक्तिं भजरे पामर

समष्टिचरणम्

परमार्थरूपिणीं पापविमोचनीं भक्तजनपालिनीं भण्ढमर्दिनीम्
गुरुगुहरूपिणीं गुणत्रयरूपिणीं गुरुमण्डलवासिनीं कौळिनीम्

◇ ◇ ◇ ◇ ◇

185 parimaAlra”nganAtham

परिमळरङ्गनाथम्

रागं: हमीर् कल्याणि (६५) ताळं: रूपकम्

पल्लवि

परिमळरङ्गनाथं भजेऽहं वीरनुतं

परिपालितभक्तं पुण्डरीकवल्लीनाथम्

समष्टिचरणम्

हरिमप्राकृताकृतिं मत्स्यादिददशाकृतिं

अन्तरङ्गशयनमब्जनयनं नारायणम्

गुरुगुहविदितं सततं गुणिजनमुदितं सततं

परमेश्वरं रमेश्वरं मेश्वरं ईश्वरम्

◇ ◇ ◇ ◇ ◇

परिमलरङ्गनाथम्

रागं: हमीर् कल्याणि ताळं: रूपकम्

पल्लवि

परिमलरङ्गनाथं भजेऽहं वीरनुतं
परिपालितभक्तं पुण्डरीकवल्लीनाथम्

अनुपल्लवि

हरिं अम्बरीषशीतांशुवेदादिपूजितं
मुरहरं भयहरं नरहरिं धृतगिरिं
सुरनरमुनिजनमुदितं पुरहरगुरुगुहविदितम्

चरणम्

सुगन्धविपिनान्तरङ्गशयनं रविशशिनयनं
शुकशौनकादिहृत्सदनं सरसिजवदनम्
खगराजतुरङ्गं कमनीयशुभाङ्गं
कनकाम्बरकौस्तुभमणिधरं कम्बुकन्धरम्
गगनसदृशमब्जकरं गजराजक्षेमकरं
नगपतिसुतासोदरं नरवरददामोदरम्

◇ ◇ ◇ ◇ ◇

187 parvatarAjakumAri

पर्वतराजकुमारि

रागं: श्रीरञ्जनि (२२) ताळं: आदि

पल्लवि

पर्वतराजकुमारि श्रीपार्वति पाहि मां परमेश्वरि

अनुपल्लवि

सर्वानन्दमयचक्रवासिनि सद्गुरुगुहजननि श्रीरञ्जनि
शर्वाणि शंभुमोहिनि शरच्चन्द्रिकाधवळप्रकाशिनि

चरणम्

कैलासपुरविलसितप्रसिद्धकामेश्वरि कञ्जलोचनि
कविहृदयावेशिनि पाशमोचिनि पाकशासनादिदेवपालिनि
कौळिनि त्रिपुरादिमर्दिनि कन्दर्पजनकापाङ्गवीक्षिणि
कैवल्यप्रदायिनि काव्यालापविनोदिनि मन्दहासिनि

◇ ◇ ◇ ◇ ◇

पर्वतवर्धनि पाहिमाम्

रागं: साम (२९) ताळं: अदि

पल्लवि

पर्वतवर्धनि पाहिमां परशिवतत्वस्वरूपिणि श्री

अनुपल्लवि

पर्वतराजनुतप्रसादिनि प्रसिद्धगुरुगुहवरप्रसादिनि
सर्वपापप्रशमनि शङ्करि सामगानविनोदिनि धनिनि

चरणम्

रामनाथमनोल्लासिनि रामचन्द्रपूजितविलासिनि
कोटितीर्थलावण्यशालिनि कोमळतरचरणयुगळनळिनि
कामजनकविधीन्द्रतोषिणि कनत्कनकताटङ्कभूषणि
कविजनादिनुतसेतुमध्यगन्धमादनपर्वतविहारिणि

◇ ◇ ◇ ◇ ◇

189 pavanAtmaja

पवनात्मजागच्छ

रागं: चलनाट (३६) ताळं: झम्प

पल्लवि

पवनात्मजागच्छ परिपूर्णस्वच्छ
परमात्मपुच्छ पाहि मां जय जय

अनुपल्लवि

नवव्याकरणनिपुण नवविधान्तःकरण
शिवरामहरिकृष्णश्रीगुरुगुहस्मरण

चरणम्

कपटवानरवेष काव्यनाटकतोष
कपियूथपरिपोष कमनीयभाष
अपगताखिलदोष हतराक्षसाशेष
उपनिषत्पदघोष उदितमित्रद्वेष
अभिरूपमणिभूष रिपुजयबलविशेष
जपसमाध्यभिलाष अपरिमितसन्तोष

◇ ◇ ◇ ◇ ◇

पवनात्मजम्

रागं: शङ्कराभरणम् (२९) ताळं: आदि

पल्लवि

पवनात्मजं भज रे चित्त परमशान्तं सुरगुरुगुहमहितम्

समष्टिचरणम्

भुवनत्रयव्यापकमतिललितं भूसुरादिसेवितरामदूतं
श्रवणरामनामप्रभावं शाश्वतसञ्जीविन्यौषदकरम्

◇ ◇ ◇ ◇ ◇

191 pashupatIshvaram

पशुपतीश्वरम्

रागं: शिवपन्तुवराळि (४५) ताळं: आदि

पल्लवि

पशुपतीश्वरं प्रणौमि सततं पालितभक्तं सदा भजेऽहम्

अनुपल्लवि

पश्चिमकाश्मीरराजविनुतं पन्नगाभरणधरं सुशोभितम्

चरणम्

पाकशासनादिदेवबृन्दं पञ्चाननं प्रणतमुनिबृन्दं
परशिवतत्वबोधितानन्दं वरगुरुगुहनुतं सोमास्कन्दम्
शोकहरं शुभफलप्रदकरं परशुमृगधरं शूलादिधरं
शुकशौनकादितोषितशिवपन्तुवराळिरागप्रियमतिचतुरम्

◇ ◇ ◇ ◇ ◇

पामरजनपालिनि

रागं: सुमद्युति (५७) ताळं: रूपकम्

पल्लवि

पामरजनपालिनि पाहि बृहन्नायकि

समष्टिचरणम्

कामितार्थफलदायिनि कारुण्यामृतवाहिनि
कोमळहृदयनिवासिनि गुरुगुहमतिप्रकाशिनि
सीमन्तिनि नतमन्त्रिणि श्रीमहादेवरञ्जनि

◇ ◇ ◇ ◇ ◇

193 pArvatIkumAram

पार्वतीकुमारम्

रागं: नाटकुरञ्जि (२८) ताळं: रूपकम्

पल्लवि

पार्वतीकुमारं भावये सततं शरवणभवगुरुगुहं श्री

समष्टिचरणम्

मार्गसहायप्रियसुतं माधवाद्यमरादिनुतं

माणिक्यमकुटशोभितमानितगुणवैभवम्

◇ ◇ ◇ ◇ ◇

पार्वतीपतिम्

रागं: हंसध्वनि (२९) ताळं: अदि

पल्लवि

पार्वतीपतिं प्रणौमि सततं आश्रितजनमन्दारं शशिधरम्

समष्टिचरणम्

पर्वतराजनुतपदाम्बुजं भद्रप्रदकैलासविराजं
गर्वितत्रिपुरादिहरचतुरं गुरुगुहवन्दितशिवशङ्करम्

◇ ◇ ◇ ◇ ◇

195 pArvatIpate

पार्वतीपते

रागं: शङ्करभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

पार्वतीपते सदा पालयाशु शम्भो
पादसरोजानन्दनटनधीर विभो श्रीप्रभो
गर्वितदानवभीकर शङ्कर देवदेव गोक्षीर भङ्गीतर
वर्णरूपाकार कामाक्षीश एकाम्रपते गुरुगुह ॥

◇ ◇ ◇ ◇ ◇

196 pAravtIshvareNa

पार्वतीश्वरेण

रागं: भूषावति (६४) ताळं: आदि

पल्लवि

पार्वतीश्वरेण रक्षितोऽहं परमार्थतत्वबोधितशिवेन

अनुपल्लवि

पर्वतराजात्मजारमणेन भक्तजनावनगुरुगुहनुतेन

चरणम्

गङ्गाधरेश्वरेण वरेण गन्धर्वसेवितपदाम्बुजेन
सूर्यचन्द्राग्निननयनविलासेन कार्यकारणात्मकप्रवृत्तेन
पङ्कजासनाद्यर्चितपदेन परमशान्तस्वरूपात्मकेन
सङ्कटहरणेन सदाशिवेन नित्यशुद्धबुद्धमुक्तेन श्री

◇ ◇ ◇ ◇ ◇

197 pAlaya mAM parameshvari

पालय मां परमेश्वरि

रागं: तरङ्गिणि (२६) ताळं: रूपकम्

पल्लवि

पालय मां परमेश्वरि कृपाकरि शङ्करि

अनुपल्लवि

नीलमेघश्यामळे सकले सकलकले

चरणम्

सदाशिवमनोहरि सच्चिदानन्दलहरि
सामरस्य निदर्शिनि सदाचारप्रवर्त्तिनि सद्गुरुगुहान्तरङ्गिणि

◇ ◇ ◇ ◇ ◇

198 pAlaya mAM pAravtIsha

पालय मां पार्वतीश

रागं: कन्नड (२८) ताळं: रूपकम्

पल्लवि

पालय मां पार्वतीश भक्तजनावन जगदीश

अनुपल्लवि

मलयध्वजपाण्ड्यराजपूजितपङ्कजचरण
वल्लभेशगुरुगुहसूनो शिव भयहरणनिपुण

चरणम्

गानामृतरसपान कलिकल्मषविनाशन
सनकादिमुदित शम्भो सदानन्दस्वयंभो

◇ ◇ ◇ ◇ ◇

199 pAlaya mAM b.rhaIshvara

पालय मां बृहदीश्वर

रागं: नायकि (२२) ताळं: रूपकम्

पल्लवि

पालय मां बृहदीश्वर पालितभुवनेश्वर

अनुपल्लवि

विलसिततञ्जपुरीश्वर बृहन्नायकीमनोहर

चरणम्

दीनजनावन शङ्कर दिवाकराग्निशशिनेत्र
दानवसुरसेवित वरदाननिपुणमहेश्वर
गानविद्याप्रदेश्वर मानितगुरुगुहसोदर
सन्नुतानन्दकर परमेश्वर शुभकर हर हर

◇ ◇ ◇ ◇ ◇

200 pAlaya mAM b.rhadIshvari

पालय मां बृहदीश्वरि

रागं: तोडि (८) ताळं: रूपकम्

पल्लवि

पालय मां बृहदीश्वरि भक्तजनावनशङ्करि

अनुपल्लवि

बालचन्द्रशेखरि बालापरमेश्वरि

वल्लीशगुरुगुहादिवन्दितवरदाभयकरि

चरणम्

बृहदीश्वरमोहिनि बृहन्नायकि धनिनि

परमहंसस्वरूपिणि परमशान्तप्रकाशिनि

महेन्द्राद्युपासिते ललिते मंगळवरदे

सहस्रदळपद्मस्थिते सदानन्दसहिते

◇ ◇ ◇ ◇ ◇

201 pAhi durge

पाहि दुर्गे

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

पाहि दुर्गे भक्तं ते पद्मकरे विजयचिच्छक्ते
एहि देहि सर्वज्ञे यतिनुतगणपतिगुरुगुहजननि माम् ॥

◇ ◇ ◇ ◇ ◇

202 pAhi mAM jAnakIvallabha

पाहि मां जनकीवल्लभ

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टुस्वर साहित्यम्

पाहि मां जानकीवल्लभ श्रीहरे भारतीशप्रियानन्तमूर्ते
देहि मे संपदं दीनचिन्तामणे देव देवोत्तमानन्दकीर्ते
एहि काकुत्स्थ कोदण्डहस्त ईप्सितार्थप्रदाह्ळादचित्त ॥

◇ ◇ ◇ ◇ ◇

203 pAhi mAM pArvati parameshvarai

पाहि मां पार्वति परमेश्वरि

रागं: मोहनम् (६५) ताळं: रूपकम्

पल्लवि

पाहि मां पार्वति परमेश्वरि श्री

अनुपल्लवि

मोहनसुन्दरस्वरूपिणि शङ्करि

मोदककरगुरुगुहभक्तजनावनशङ्करि

चरणम्

पञ्चाननहृदयेश्वरि परमेश्वरमोहिनि

सर्वेश्वरि सर्वानन्दमयचक्रवासिनि

वाञ्छितार्थफलप्रदायिनि वारिजासनादिनुत-

चरणनळिनि संप्रदायकुलोत्तीर्णयोगिनि

◇ ◇ ◇ ◇ ◇

204 pAhi mAM ratnAcalanAyaka

पाहि मां रत्नाचलनायक

रागं: मुखारि (२०) ताळं: आदि

पल्लवि

पाहि मां रत्नाचलनायक भक्तजनशुभप्रदायक

अनुपल्लवि

मोहजाराळकेशि वरधव मुक्तिप्रद नतविरिञ्चिमाधव
रोहिणीशशिरविवह्निनयन भवरोगहरणनिपुणतरचरण शिव
चरणम्

सद्योजातादिपञ्चमुखारिषड्वर्गरहितहृत्सञ्चार
विद्योदयवियदादिप्रपञ्चकल्पातीत तत्वविचाराऽ-
विद्यात्मक श्रीचक्राकार विचित्रनवरत्नगिरिविहार
गद्यानुविद्धपद्यादिविनुत गङ्गाधरागमसार
अद्याप्यार्यवंशजाततुर्यजातिभृताखण्डकावेरी-
नद्योदकाभिषिक्तशरीर अनादिगुरुगुहकुमार मारहर

◇ ◇ ◇ ◇ ◇

205 pItavarNam

पीतवर्णम्

रागं: शङ्करभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

पीतवर्णं भजे भैरवं भूतवेताळसंसेव्यमानं
पीतवस्त्रं सुवर्णप्रदं वीतरागं गुरुगुहात्मजम् ॥

◇ ◇ ◇ ◇ ◇

पुरहरनन्दन

रागं: हमीर् कल्याणि (६५) ताळं: आदि

पल्लवि

पुरहरनन्दन रिपुकुलभञ्जन शिखीन्द्रवाहन महेन्द्रपालन

समष्टिचरणम्

करुणामृतरससागर तरुणामृतकरशेखर
सुरवैरिकाल पुरवैरिबाल गुरुगुह सरसिजकर स्कन्दलील

◇ ◇ ◇ ◇ ◇

207 pUrNacandrabiMba

पूर्णचन्द्रबिम्बविजयवदने

अष्ट(षड्)रागमालिका ताळं: रूपकम्

पूर्णचन्द्रिका रागः

पूर्णचन्द्रबिम्बविजयवदने कमलाम्बिके

पाहि मां वरदे गुरुगुहजननि श्री

नारायणी रागः

पुण्यजनपूजिते नारायणी जगदम्बिके

सरस्वतीमनोहरि रागः

पूर्णफलप्रदचरणे सरस्वतीमनोहरे

शुद्धवसन्त रागः

पुष्पितशुद्धवसन्ते पुण्डरीकसदृशकरे

केदर रागः

केदारेशसहाये गुरुगुहवेदितहृदये

बिलहरि रागः

भण्डप्राणबिलहरि भक्तजनानन्दकरि

हंसध्वनि रागः

अहर्निशंप्रकाशमानहंसध्वनिविराजिते

अपर्णे कुण्डलिनि नागध्वनिसहिते
ध्वनिसहिते सहिते हिते ते

◇ ◇ ◇ ◇ ◇

208 praNatARtiharAya

प्रणतार्तिहराय नमस्ते

रागं: सामन्त (३०) ताळं: आदि

पल्लवि

प्रणतार्तिहराय नमस्ते वरधर्मसंवर्धनीसहिताय

समष्टिचरणम्

प्रणतगणपतिगुरुगुहताताय प्रसिद्धक्षेत्रपालसेविताय
घृणिशशिवह्निनयनाय नन्दितुरगाय चिदानन्दनाथाय
पञ्चनदक्षेत्रप्रकाशाय पाकशासननुतपदाम्बुजाय

◇ ◇ ◇ ◇ ◇

209 praNatArtiharam

प्रणतार्तिहरम्

रागं: नायकि (२२) ताळं: आदि

पल्लवि

प्रणतार्तिहरं नमामि सततं पञ्चनदक्षेत्रप्रकाशितम्

अनुपल्लवि

गणनायकादिसकलसुरनुतं गीतवाद्यादिमुदितमनन्तम्

चरणम्

वसन्तऋतुमेषमासोत्सवं वीरक्षेत्रपालप्रभावं
वासुदेवनतसप्तस्थानं विचित्रयमभयादिनिवारणम्
वासुकिकार्कोटकादिधरणं वरधर्मसंवर्धनीरमणं
दासजनादिधनधान्यप्रदं धीरतरगुरुगुहपूजितपदम्

◇ ◇ ◇ ◇ ◇

प्रत्यङ्गिराभगवतीम्

रागं: नादनामक्रिय (१५) ताळं: चापु

पल्लवि

प्रत्यङ्गिराभगवतीं सदा नमाम्यहं प्रबलसिंहवाहनारूढाम्

समष्टिचरणम्

नित्यं शिवभक्तवरदां निखिलजनादिनुतनिजपादां
नित्यशुद्धपरमानन्दां निजगुरुगुहमोदकुमुदाम्
शक्त्यादिसमूहाकारां शरभेशमदहरणचतुरां
क्षित्यादितत्वान्तरूपां क्षंकारानन्दविलेपाम्

◇ ◇ ◇ ◇ ◇

211 prasannave”nkatesham

प्रसन्नवेङ्कटेशम्

रागं: वाटीवसन्तभैरवि (१४) ताळं: त्रिपुट

पल्लवि

प्रसन्नवेङ्कटेशं भज रे वाटीवसन्तभैरवीनुतं श्री

समष्टिचरणम्

प्रसिद्धतञ्जनगरस्थितं प्रबलगुरुगुहवेद्यमाद्यं
वसिष्टवामदेवविदितं वरालमेलुमङ्गाश्रितं
रसिकशेखरं कृपाकरं रक्षितभक्तानन्दकरम्

◇ ◇ ◇ ◇ ◇

212 bAlakucAmbike

बालकुचम्बिके

रागं: सुरटि (२८) ताळं: रूपकम्

पल्लवि

बालकुचम्बिके मामव वरदायिके श्री

समष्टिचरणम्

बालेन्दुशेखरि भक्तजनावनशङ्करि

नीलकण्ठमनोरञ्जनि गुरुगुहजननि

नीरजासनादिपोषिणि कदम्बवनवासिनि

◇ ◇ ◇ ◇ ◇

213 bAlak.rShNam bhAvayAmi

बालकृष्णं भावयामि

रागं: गोपिकावसन्तम् (२०) ताळं: आदि

पल्लवि

बालकृष्णं भावयामि बलरामानुजं वसुदेवजम्

अनुपल्लवि

नीलमेघगात्रं स्तुतिपात्रं नित्यानन्दकन्दं मुकुन्दम्

चरणम्

कमललोचनं कर्ममोचनं कपटगोपिकावसन्तं
अमरार्चितचरणं भवतरणं अर्जुनसारथिं करुणानिधिम्
ममतारहितं गुरुगुहविहितं माधवं सत्यभामाधवं
कमलेशं गोकुलप्रवेशं कंसभञ्जनं भक्तरञ्जनम्

◇ ◇ ◇ ◇ ◇

बालगोपाल

रागं: भैरवि (२०) ताळं: आदि

पल्लवि

बालगोपाल पालयाशु मां भक्तवत्सल कृपाजलधे हरि

अनुपल्लवि

नीलनीरदशरीर धीरतर नीरजकर निरुपमानन्दकर
लीलया गोपवेषधर मुरलीधर श्रीधर दामोदर वर

चरणम्

चाणूरमल्लहरणनिपुणतर चरणनिहतशकटासुर मुरहर
माणिक्यमकुटहारवलयधर मत्तेभकुम्भभेदनपटुतर
वाणीशार्चितपीताम्बरधर वैजयन्तीवनमालाधर
आणवादिविजयमानसाकर अपहतकंसासुर नतभूसुर
द्रोणकर्णदुर्योधनादिहर द्रौपदीमानसंरक्षणकर
वैणिकगायकगुरुगुहनुत पुरवैरिविहित गोपिकामनोहर

◇ ◇ ◇ ◇ ◇

215 bAlasubrahmaNyam

बालसुब्रह्मण्यम्

रागं: सुरटि (२८) ताळं: आदि

पल्लवि

बालसुब्रह्मण्यं भजेऽहं भक्तकल्पभूरुहं श्री

अनुपल्लवि

नीलकण्ठहृदानन्दकरं नित्यशुद्धबुद्धमुक्ताम्बरम्

चरणम्

वेलायुधधरं सुन्दरं वेदान्तार्थबोधचतुरं
फालाक्षगुरुगुहावतारं पराशक्तिसुकुमारं धीरम्
पालितगीर्वाणादिसमूहं पञ्चभूतमयमायामोहं
नीलकण्ठवाहं सुदेहं निरतिशयानन्दप्रवाहम्

◇ ◇ ◇ ◇ ◇

बालाम्बिकया

रागं: श्रीरञ्जनि (२२) ताळं: एकम्

पल्लवि

बालाम्बिकया कटाक्षितोऽहं बुधजनादिनुतत्रिकूटवरया

समष्टिचरणम्

नीलमेघजितवेणीयुतया नीलकण्ठगुरुगुहमोदितया
लीलया भण्डकुमारहरया शूलचक्रादिशोभितकरया

◇ ◇ ◇ ◇ ◇

217 bAlAmbikAyAH tava

बालाम्बिकायः तव

रागं: केदारगौळ (२८) ताळं: रूपकम्

पल्लवि

बालाम्बिकायः तव भक्तोऽहं

भगमालिनीनकुलिनीपूजितायाः श्री

समष्टिचरणम्

वेलायुधधरवल्लीशगुरुगुहजनन्याः

कालकालहरवैद्यपतिमोहिन्याः लीलाविग्रहधारिण्याः

◇ ◇ ◇ ◇ ◇

218 bAlAmbikAyAH param

बालाम्बिकायाः परम्

रागं: कानड (२२) ताळं: आदि

पल्लवि

बालाम्बिकायाः परं नहि रे रे चित्त

भारतीरमासेविताया: श्री

अनुपल्लवि

बालेन्दुजितमुखपङ्कजायाः भानुकोटिकोटिलावण्यायाः

चरणम्

भूसुरादिसहस्रमुनीश्वरपूजितपरदेवतायाः

भवरोगहरवैद्यपतीश्वरसुखकर्याः गुरुगुहजनन्याः

भासमानवैद्यपुरीश्वर्याः वाञ्छितफलप्रदेश्वर्याः

फुल्लकल्हारमालादिधारिण्याः निरञ्जन्याः

◇ ◇ ◇ ◇ ◇

219 bAlambikAyai

बालाम्बिकायै

रागं: नाटकुरञ्जि (२८) ताळं: रुपकम्

पल्लवि

बालाम्बिकायै नमस्ते वरदायै श्री

अनुपल्लवि

बालादिनामरूपायै भक्तचित्तकेकीघनाघनायै
बालचन्द्रसेवितायै भारतीशपूजितायै

चरणम्

हाटकाभरणायै हंसनादमुदितायै
हरिद्रान्नरसिकायै गुरुगुहस्वरूपायै
नाटकुरञ्जीरागप्रियानन्दकर्यै
नटेश्वर्यै वैद्यपतिमनोल्लासकर्यै

◇ ◇ ◇ ◇ ◇

220 bAlAmbike pAhi

बालाम्बिके पाहि

रागं: मनोरञ्जनि (५) ताळं: मत्यम्

पल्लवि

बालाम्बिके पाहि भद्रं देहि देहि

समष्टिचरणम्

सालोकादिमुक्तिसाम्राज्यदायिनि

शङ्करनारायणमनोरञ्जनि धनिनि

नीलकण्ठगुरुगुहनित्यशुद्धविद्ये

◇ ◇ ◇ ◇ ◇

221 budham AshrayAmi

बुधमाश्रयामि सततम्

रागं: नाटकुरञ्जि (२८) ताळं: झम्प

पल्लवि

बुधमाश्रयामि सततं सुरविनुतं चन्द्रतारासुतम्

अनुपल्लवि

बुधजनैर्वेदितं भूसुरैर्मोदितं
मधुरकविताप्रदं महनीयसम्पदम्

चरणम्

कुङ्कुमसमद्युतिं गुरुगुहमुदाकृतिं
कुजवैरिणं मणिमकुटहारकेयूरकङ्कणादिधरणम्
कमनीयतरमिथुनकन्याधिपं पुस्तककरं नपुंसकं
किङ्करजनमहितं किल्बिषादिरहितं
शङ्करभक्तहितं सदानन्दसहितम्

◇ ◇ ◇ ◇ ◇

222 b.rhadambA madambA

बृहदम्बा मदम्बा

रागं: भानुमति (४) ताळं: आदि

पल्लवि

बृहदम्बा मदम्बा जयति ब्रह्माण्डस्वरूपजगदम्बा

समष्टिचरणम्

महादेवयुवती भानुमती मद्गुरुगुहजननी निरञ्जनी
महेश्वरी राजराजेश्वरी महात्रिपुरसुन्दरी शङ्करी

◇ ◇ ◇ ◇ ◇

223 b.rhadambikAyai

बृहदम्बिकायै

रागं: वसन्त (१५) ताळं: चापु

पल्लवि

बृहदम्बिकायै नमस्ते नमस्ते

समष्टिचरणम्

बृहदीशमोहितब्रह्माण्डस्वरूपायै

ब्राह्म्यादिशक्तिसंसेवितवैभवायै

बहुविधनामरूपायै ब्रह्मात्मैकस्वरूपायै

भानुकोटिलावण्यायै बालगुरुगुहपूजितायै

◇ ◇ ◇ ◇ ◇

बृहदीशकटाक्षेण

रागं: जीवन्तिका (४८) ताळं: रूपकम्

पल्लवि

बृहदीशकटाक्षेण प्राणिनो जीवन्ति अहमहमित्यात्मरूप

समष्टिचरणम्

महदादिप्रवृत्तेन मायिकादिनिवृत्तेन

सहजानन्दस्थितेन सद्गुरुगुहसन्नुतेन

◇ ◇ ◇ ◇ ◇

225 b.rhadIshvarAya

बृहदीश्वराय

रागं: शङ्कराभरणम् (२९) ताळं: आदि

पल्लवि

बृहदीश्वराय नमस्ते ब्रह्मानन्दाय बलेश्वराय

अनुपल्लवि

बृहन्नायकीमनोल्लासाय भासमानचर्माम्बरधराय

चरणम्

चारुचन्द्रशेखराय वराय चारुस्मितसरसीरुहपदाय
चराचरात्मकप्रपञ्चकाय सद्गुरुगुहसहितसदाशिवाय
करुणारसपूरिताय कैवल्यप्रदाय तञ्जपुरीश्वराय
हरिहयाद्यमरवन्दिताय आरक्तवर्णशोभिताकाराय

◇ ◇ ◇ ◇ ◇

बृहदीश्वरो रक्षतु

रागं: गानसामवराळि (३) ताळं: रूपकम्

पल्लवि

बृहदीश्वरो रक्षतु मां हरिब्रह्मेन्द्रपूजितस्सततम्

समष्टि चरणम्

बृहन्नायकीसहितानन्दयुतो भ्रान्तिस्वरूपप्रपञ्चातीतो
सहजगानसामवराळिविनुतो सदाशिवो विनतगणेशगुरुगुहो

◇ ◇ ◇ ◇ ◇

227 b.rhadIshvaram

बृहदीश्वरं भज रे

रागं: नागध्वनि (२९) ताळं: अदि

पल्लवि

बृहदीश्वरं भज रे रे चित्त ब्रह्मेन्द्रादिपूजितं श्री

अनुपल्लवि

बृहन्नायकीमन:प्रियकरं भक्तजनावनभयहरनिपुणम्

चरणम्

योगिराजाद्यर्चितचरणं युगपद्भोगादिप्रदनिपुणं
नागराजविनुतं नागध्वनिनादबिन्दुकलास्पदं वरनिपुणम्
श्रीगुरुगुहोपचारिणं विचित्रनामरूपप्रपञ्चधारिणं
विश्वसृष्ट्यादिकारणं विशुद्धिचक्रस्थितं विनोदकारिणम्

◇ ◇ ◇ ◇ ◇

बृहदीश्वरीं भजरे

रागं: ललितपञ्चमम् (१४) ताळं: आदि

पल्लवि

बृहदीश्वरीं भज रे चित्त ब्रह्मेन्द्रादिनुतजगज्जननीम्

अनुपल्लवि

बृहदीशमनोल्लासकारिणीं ब्रह्माण्डस्वरूपाकारिणीं
महात्रिपुरसुन्दरीं श्रीकरीं ललितपञ्चमरागोदयकरीम्

चरणम्

नीरजदळनयनीं मृदुचरणीं निरञ्जनीं तञ्जपुरिविहारिणीं
निरतिशयसुखप्रदायिनीं नित्यानन्दगुरुगुहरूपिणीम्

◇ ◇ ◇ ◇ ◇

229 b.rhannAyaki

बृहन्नायकि वरदायकि

रागं: आन्धाळि (२८) ताळं: आदि

पल्लवि

बृहन्नायकि वरदायकि ब्रह्मादिजननि
एहि मुदं देहि मां पाहि

समष्टिचरणम्

अहन्तास्वरूपिणि चिद्रूपिणि आन्धाळिहरणचणप्रतापिनि
सहस्रदळसरसीरुहवासिनि सदानन्दगुरुगुहविश्वासिनि

◇ ◇ ◇ ◇ ◇

बृहस्पते तारापते

रागं: अठाण (२८) ताळं: त्रिपुट

पल्लवि

बृहस्पते तारापते ब्रह्मजाते नमोऽस्तु ते

अनुपल्लवि

महाबलविभो गीष्पते मञ्जुधनुर्मीनाधिपते
महेन्द्राद्युपासिताकृते माधवादिविनुत धीमते

चरणम्

सुराचार्यवर्य वज्रधर शुभलक्षण जगत्रयगुरो
जरादिवर्जिताक्रोध कचजनकाश्रितजनकल्पतरो
पुरारिगुरुगुहसंमोदित पुत्रकारक दीनबन्धो
परादिचत्वारिवाक्स्वरूपप्रकाशक दयासिन्धो
निरामयाय नीतिकर्त्रे निरङ्कुशाय विश्वभर्त्रे
निरञ्जनाय भुवनभोक्त्रे निरंशाय मखप्रदात्रे

◇ ◇ ◇ ◇ ◇

231 brahmavidyAmbike

ब्रह्मविद्याम्बिके

रागं: कल्याणि (६५) ताळं: आदि

पल्लवि

ब्रह्मविद्याम्बिके श्रीश्वेतारण्येशनायिके
श्रीशिवे संरक्ष मां श्री

समष्टिचरणम्

ब्रह्मानन्दगुरुगुहजननी परब्रह्मस्वरूपिणि नळिनि
सोमशेखरशोभितवदने सुरनरमुनिगणसुखकरनयने
कामकले कम्बुजयगळे कल्याणि सकलनिष्कळे

◇ ◇ ◇ ◇ ◇

भक्तवत्सलम्

रागं: वंशवति (५४) ताळं: आदि

पल्लवि

भक्तवत्सलमभिषेकवल्लीयुतं भजेऽहं नित्यम्

अनुपल्लवि

भक्तिमतां चित्तप्रत्यक्षं पाकशासनादिसुराध्यक्षं
भुक्तिमुक्तिप्रदायकदक्षं भूसुराद्यखिलजनसंरक्षम्

चरणम्

दशाकृतिं कृष्णमङ्गळक्षेत्रपतिं लक्ष्मीविवाहोत्सवं
विशालवेदसागरमण्टपं विराजस्य महाविभवप्रदम्
विशिष्टाद्वैतप्रतिपाद्यं विरूपाक्षगुरुगुहसंवेद्यं
विशेषफलप्रदं विधुदुरितनिवृत्तिकरं मुनिजनप्रियकरम्
शशाङ्कगुरुतल्पदोषहरदर्शपुष्करिणीतटपश्चिमभागं
सुशोभितोत्पलावतकस्थितं सुरमयमधुमक्षिकाराधितम्

◇ ◇ ◇ ◇ ◇

233 bhajare re citta

भजरे रे चित्त

रागं: कल्याणि (६५) ताळं: मिश्र चापु

पल्लवि

भजरे रे चित्त बालाम्बिकां भक्तकल्पलतिकाम्

अनुपल्लवि

निजरूपदानदक्षचरणां अरुणां नित्यकल्याणीं शर्वाणीम्

चरणम्

श्रीवाग्भवकूटजातचतुर्वेदस्वरूपिणीं
शृङ्गारकामराजोद्भवसकलविश्वव्यापिनीम्
देवीं शक्तिबीजोद्भवमातृकार्णशरीरिणीं
देवनुत भवरोगहरवैद्यपतिहृदयविहारिणीम्
भावरागताळमोदिनीं भक्ताभीष्टप्रदायिनीं
सेवकजनपालनगुरुगुहरूपमुत्तुकुमारजननीम्

◇ ◇ ◇ ◇ ◇

भारति

रागं: देवमनोहरि (२२) ताळं:रूपकम्

पल्लवि

भारति मद्विषणाजाड्यापहे त्वद्-
भक्तकल्पकमहीरुहे मुखाम्भोरुहे श्री

अनुपल्लवि

कारुण्यसुधालहरि कञ्जजदेवमनोहरि
शारदे वागधीश्वरि शशिकुन्दधवळभास्वरि

चरणम्

वल्लकीपुस्तकाभयवरदकोमलतरकरे
पल्लवाङ्घ्रियुगळमणिप्रकाशमञ्जीरधरे
फुल्लसरसिजाक्षि श्रीपुरस्वपीठान्तरे
वल्लभेशविधिहरिहरवाञ्छितार्थप्रदे वरे
मल्लिकादिसुमार्चिते मायाकार्यवर्जिते
वल्लीशगुरुगुहनुतेऽवादिक्षान्तार्णयुते

◇ ◇ ◇ ◇ ◇

235 bhUShApatim

भूषापतिम्

रागं: भूषावति (६४) ताळं: रूपकम्

पल्लवि

भूषापतिम् मन्जुभाषापतिं भजेऽहम्

अनुपल्लवि

शेषाङ्गःशयननुतं अशेषदेवसन्नुतम्

चरणम्

विराट्स्वरूपाकारं विश्वसृष्टिकर्तारं
पराशराद्युपचारं परमाद्वैतविचारम्
विराजमानशरीरं वेदवेदान्तसारं
धरादिभूताधारं धातारं मणिहारम्
पुरन्दराद्यधिकारं पूर्णफलदातारं
सरोजासनं धीरं सद्गुरुगुहप्रचारम्

◇ ◇ ◇ ◇ ◇

भूषावतीम्

रागं: भूषावति (६४) ताळं: रूपकम्

पल्लवि

भूषावतीं मञ्जुभाषावतीं भजेऽहम्

समष्टिचरणम्

तोषकरशेखरीं दुर्गां बृहन्नायकीं
शेषाद्रीशसोदरीं शिवगुरुगुहप्रियकरीम्

◇ ◇ ◇ ◇ ◇

237 bhogachAyAnATaka

भोगच्छायानाटकप्रिये

रागं: भोगच्छायनाट (३४) ताळं: आदि

पल्लवि

भोगच्छायानाटकप्रिये बोधं देहि बृहदीशजाये

समष्टिचरणम्

श्रीगुरुगुहजननि निरञ्जनि श्रितजनरक्षणि शिवसन्तोषिणि
भोगमोक्षवितरणनिपुणतरे भूसुरादिसन्नुतकमलकरे

◇ ◇ ◇ ◇ ◇

मङ्गळदेवतया

रागं: धन्याशि (२०) ताळं: रूपकम्

पल्लवि

मङ्गळदेवतया त्वया बहुमानितोऽहं श्री

अनुपल्लवि

पुङ्गवकमलालयया भोगभोग्यालयया
जङ्गमस्थावरलोकजननस्थितिलययाऽजया

चरणम्

हरिद्राकुङ्कुमवस्त्रालङ्कृतविग्रहया
दरिद्रदुःखादिमूर्धन्याशिवनिग्रहया
वरदराजगोपालहृदयसरसिजगृहया
वरलक्ष्म्या हरिहयगुरुगुहभक्तानुग्रहया
सुरार्चितपदाम्बुजया सुधासागरात्मजया
सुरविनुतशिवानुजया मायाबीजया विजय i

◇ ◇ ◇ ◇ ◇

239 ma”ngaLadevate

मङ्गळदेवते

रागं: मार्गदेशि (१५) ताळं: आदि

पल्लवि

मङ्गळदेवते परदेवते मङ्गळं भवतु नतदेवते

समष्टिचरणम्

अङ्गजपुरकालवैरिसहित्ते अनाद्यविद्याप्रपञ्चरहिते
पुङ्गवगुरुगुहादिमहिते सत्सङ्गमार्गदर्शिते सुरहिते

◇ ◇ ◇ ◇ ◇

240 ma”ngaLAmbAyai

मङ्गळाम्बायै नमस्ते

रागं: माळवश्री (२२) ताळं: झम्प

पल्लवि

मङ्गळाम्बायै नमस्ते श्रीवाञ्छलिङ्गनिजशक्ते
विलीनचिच्छक्ते श्री

अनुपल्लवि

सङ्गीतसाहित्यसारज्ञसन्नुते मङ्गळालयगुप्तगङ्गातटस्थिते
अनङ्गाद्युपासिते शृङ्गारादियुते

चरणम्

मन्दस्मिताननने माळवश्रीजने इन्दिरालोकने ईश्वराराधने
इन्दीवरासनादीडितशिवाङ्गने सिन्दूरकस्तूरिचन्दनालेपने
कुन्दमुकुळरदने गुरुगुहहृत्सदने
सुन्दरि मृदुगगने सुखतरकरमदने

◇ ◇ ◇ ◇ ◇

241 ma”ngaLam jaya

मङ्गळं जयमङ्गळम्

रागं: वसन्त (१५) ताळं: आदि

पल्लवि

मङ्गळं जयमङ्गळं मामव राजमातङ्गि जय जय

मङ्गळं मङ्गळं मङ्गळम्

चरणम्

गङ्गाधरयुवति परमेश्वरि मङ्गळवरदायिनि जगदीश्वरि

सङ्कटनाशिनि जयमङ्गळं सद्गुरुगुहजननि जयमङ्गळम्

सद्गुरुगुहजननि शुभमङ्गळम्

◇ ◇ ◇ ◇ ◇

242 matsyAvatAra

मत्स्यावतार

रागं: भिन्नपञ्चमम् (३) ताळं: आदि

पल्लवि

मत्स्यावतार मामव मधुसूदन गुरुगुहादिनुत

समष्टिचरणम्

मत्स्यकूर्मादिदशावतार माधुर्यसुधाधार दयाकर
वत्सलाविवाहकारण शुभकर शार्ङ्गधर भिन्नपञ्चमप्रियकर

◇ ◇ ◇ ◇ ◇

243 madhurAmbA jayati

मधुराम्बा जयति

रागं: परजु (१५) ताळं: चापु

पल्लवि

मधुराम्बा जयति मरकताङ्गी जयति

अनुपल्लवि

माधवसोदरि महात्रिपुरसुन्दरि शङ्करि शातोदरि

चरणम्

पाकारिप्रमुखोपासितपल्लवपदकरनळिनीं चिन्तयेऽहं

मूकमुख्यवाक्प्रदायिनीं मुक्तिप्रदगुरुगुहजननीम्

◇ ◇ ◇ ◇ ◇

244 madhurAmbAyAH

मधुराम्बायाः

रागं: बेगड (२९) ताळं: मिश्र चापु

पल्लवि

मधुराम्बायास्तव दासोऽहं मरकतमणिभूषणायाः श्री

अनुपल्लवि

मधुकरवेण्याः मधुरतरवाण्याः

चरणम्

मातृकावर्णरूपिणुयाः मारजनकगुरुगुहमोदिन्याः

कदम्बवनपालिन्याः काव्यकलालापिन्याः

कामकलाप्रदर्शिन्याः कामितार्थप्रदायिन्याः

◇ ◇ ◇ ◇ ◇

245 madhurAmbA samrakShatu

मधुराम्बा संरक्षतु

रागं: देवक्रिय (२८) ताळं: आदि

पल्लवि

मधुराम्बा संरक्षतु मां श्री
मनुत्रिकोणरूपिणी त्रिलोचनी

अनुपल्लवि

वेदवेदान्ततत्वबोधिनी विधिगुरुगुहसंमोदिनी
श्रीदेवक्रियामोदिनी दैत्यहन्त्री दीनरक्षणी

चरणम्

हिमाचलकुमारी सुन्दरी हिरण्यकुण्डलशोभाकरी
हालास्यनाथमनःप्रियकरी हंसनादवशंकरी श्रीकरी
वामाचारप्रियकरी वशिन्याद्याराधितवरदाभयकरी
वाग्वादिन्यादिमातृकासेवितानन्दकदम्बकादम्बरी

◇ ◇ ◇ ◇ ◇

मधुराम्बां भज रे

रागं: स्तवराजम् (४४) ताळं: आदि

पल्लवि

मधुराम्बां भज रे मानस मदनजनकादिगुरुगुहसेवित

अनुपल्लवि

मधुरापुरिनिवासिनीं धनिनीं मनुकुबेरादिमनोल्लासिनीं

चरणम्

मतङ्गतनयां मधुकरवेणीं माधवाद्यभयवरप्रदायिनीं
भक्तविश्वासिनीं सुवासिनीं श्रीस्तवराजनुतिप्रसादिनीम्

◇ ◇ ◇ ◇ ◇

247 madhurAmbikAyAm

मधुराम्बिकायाम्

रागं: देशीसिंहारवम् (५८) ताळं: रूपकम्

पल्लवि

मधुराम्बिकायां सदा भक्तिं करोमि श्री

अनुपल्लवि

चिदानन्दरसिकायां श्रीगुरुगुहसेवितायां
कदम्बवनवासिन्यां कविजननुतयोगिन्याम्

चरणम्

सकलागमविनुतायां सामरस्य विभवायां
कादिविद्यादायिकायां कामेश्वरमोहितायाम्
सकलकलारूपायां सदाशिवपतिव्रतायां
स्थूलसूक्ष्मकारणायां सुखतरप्रवर्तनायाम्

◇ ◇ ◇ ◇ ◇

मरकतलिङ्गम्

रागं: वसन्त (१५) ताळं: अदि

पल्लवि

मरकतलिङ्गं चिन्तयेऽहं माणिक्यवल्ल्यम्बासमेतम्

अनुपल्लवि

गौरीवल्लभगणेशसन्नुतं गुरुगुहपूजितवृषारोहिताम्

चरणम्

महाबिल्ववनमध्यविहारं मालाकपालशूलादिधरं

महनीयसाम्राज्यादिप्रदं मानितवैश्रवणादिवरदम्

◇ ◇ ◇ ◇ ◇

249 marakatavallIm

मरकतवल्लीम्

रागं: काम्भोजि (२८) ताळं: आदि

पल्लवि

मरकतवल्लीं मनसा स्मरामि मदनजनकादिदेवपालिनीम्

समष्टि चरणम्

हरिह्रदयावेशिनीं मोहिनीं हरिहरपुत्रजननीं नलिनीं
क्रूरदैत्यादिबृन्दमर्दिनीं गुरुगुहादिनुतवह्निवासिनीम्

◇ ◇ ◇ ◇ ◇

250 mahAgaNapatim

महागणपतिम्

रागं: नाट (३६) ताळं: चतुरस्र एकम्

पल्लवि

महागणपतिं मनसा स्मरामि वसिष्टवामदेवादिवन्दितम्

समष्टिचरणम्

महादेवसुतं गुरुगुहनुतं मारकोटिप्रकाशं शान्तं
महाकाव्यनाटकादिप्रियं मूषिकवाहनमोदकप्रियम्

◇ ◇ ◇ ◇ ◇

251 mahAgaNapatiM vande

महागणपतिं वन्दे

रागं: तोडि (८) ताळं: रूपकम्

पल्लवि

महागणपतिं वन्दे माधवाद्यमरवृन्दम्

अनुपल्लवि

अहन्तादिरहितं शक्तिसहितं आनन्ददं तमेकदन्तम्

चरणम्

त्रिपुरवधार्यं शिवेन त्र्यम्बकेनार्चितं
उपनिषत्प्रतिपादितं उमामहेश्वरसुतम्
कपिलवसिष्टादिनतं कञ्जजादिभिरीडितं
कपिलं कृष्णपूजितं करिवदनसुशोभितम्
सुपर्णवाहसेवितं सुरगुरुगुहभावितं
कपित्थाम्रपनसजम्बूकदलीफलभक्षितम्

◇ ◇ ◇ ◇ ◇

252 mahAgaNapate

महागणपते

रागं: नटनारायणि (२८) ताळं: आदि

पल्लवि

महागणपते पालयाशु मां मायामयवल्लभापते श्री

समष्टिचरणम्

महानटनारायणीनन्दन मानितदेवदेवकीनन्दन

महेश्वरगुरुगुहभक्तचन्दन मातङ्गवदनेन्द्रादिवन्दन

◇ ◇ ◇ ◇ ◇

253 mahAtripurasundari

महात्रिपुरसुन्दरी

रागं: मध्यमावति (२२) ताळं: रूपकम्

पल्लवि

महात्रिपुरसुन्दरी मामव जगदीश्वरि

समष्टिचरणम्

महेश्वरि माधवसोदरि राजराजेश्वरि
महादेवमोहिनि मद्गुरुगुहजननि
महिषासुरमर्दिनि निरञ्जनि धनिनि

◇ ◇ ◇ ◇ ◇

254 mahAdevena

महादेवेन

रागं: देवमनोहरि (२२) ताळं: आदि

पल्लवि

महादेवेन पालितोस्म्यहं महनीयसाम्रज्यप्रदेन

अनुपल्लवि

महाकैलासगिरिविहारेण मानितगुरुगुहसन्नुतपदेन

चरणम्

पञ्चाक्षरमन्त्रस्वरूपेण पार्वतीमनोल्लासकरणेन
परशिवतत्वबोधितनिपुणेन परमशान्तस्वरूपात्मकेन
पञ्चभूतप्रपञ्चात्मकेन वाञ्छितफलप्रदचतुरतरेण
पञ्चमहापापोपशमनेन पङ्कजासनुतगङ्गाधरेण

◇ ◇ ◇ ◇ ◇

255 mahAlakShmi

महालक्ष्मि करुणारसलहरि

रागं: माधवमनोहरि (२२) ताळं: आदि

पल्लवि

महालक्ष्मि करुणारसलहरि मामव

माधवमनोहरि श्री

अनुपल्लवि

महाविष्णुवक्षस्थलवासिनि महादेवगुरुगुहविश्वासिनि

महापापप्रशमनि मनोन्मणि मारजननि मङ्गळप्रदायिनि

चरणम्

क्षीरसागरसुते वेदनुते क्षितीशादिमहिते शिवसहिते

भारतीरतिशचीपूजिते भक्तियुतमानसविराजिते

वारिजासनाद्यमरवन्दिते नारदादिमुनिबृन्दनन्दिते

नीरजासनस्थे सुमनस्थे सारसहस्ते सदा नमस्ते

◇ ◇ ◇ ◇ ◇

256 mahAli”ngeshvarAya

महालिङ्गेश्वराय

रागं: अठाण (२८) ताळं: आदि

पल्लवि

महालिङ्गेश्वराय नमस्ते श्री मध्यार्जुनपुरिविलसिताय

समष्टिचरणम्

बृहत्कुचाम्बासमेताय क्रूरपञ्चहत्यादिपापशमनाय
ब्रह्मादिगुरुगुहपूजिताय महादेवजगदीश्वरशिवाय

◇ ◇ ◇ ◇ ◇

257 mahAli”ngeshvaram

महालिङ्गेश्वरम्

रागं: परजु (१५) ताळं: आदि

पल्लवि

महालिङ्गेश्वरं मद्यार्जुनमहालिङ्गेश्वरं नमामि

समष्टिचरणम्

महाब्रह्महत्यादिपापहरं कालहरं पुरहरं शङ्करं

बृहत्कुचाम्बारमणं गुरुगुहान्तःकरणं भवभयहरनिपुणम्

◇ ◇ ◇ ◇ ◇

258 mahAsuraM ketum

महासुरं केतुमहं भजामि

रागं: चामरम् (५६) ताळं: रूपकम्

पल्लवि

महासुरं केतुमहं भजामि छायग्रहवरम्

अनुपल्लवि

महाविचित्रमकुटधरं मङ्गळवस्त्रादिधरं
नरपीठस्थितं सुखं नवग्रहयुतं सखम्

चरणम्

केतुं-कृण्वन्-मन्त्रिणं क्रोधनिधिजैमिनं
कुलुत्थादिभक्षणं कोणध्वजपताकिनम्
गुरुगुहचामरभरणं गुणदोषजिताभरणं
ग्रहणादिकार्यकारणं ग्रहापसव्यसञ्चारिणम्

◇ ◇ ◇ ◇ ◇

259 mahiShAsuramardini

महिषासुरमर्दिनि

रागं: गौळ (१५) ताळं: खण्ड चापु

पल्लवि

महिषासुरमर्दिनि मां पाहि मध्यदेशवासिनि

समष्टिचरणम्

महादेवमनोल्लासिनि मावाणीगुरुगुहादिवेदिनि
मारजनकपालिनि सहस्रदळसरसिजमध्यप्रकाशिनि
सुरुचिरनळिनि शुम्बनिशुम्बादिभञ्जनि
इहपरभोगमोक्षप्रदायिनि इतिहासपुराणादि-
विश्वासिनि गौरहासिनि

◇ ◇ ◇ ◇ ◇

260 mahiShAsuramardinIm

महिषासुरमर्दिनीम्

रागं: नारायणि (२९) ताळं: मिश्र चापु

पल्लवि

महिषासुरमर्दिनीं नमामि महनीयकपर्दिनीम्

अनुपल्लवि

महिषमस्तकनटनभेदविनोदिनीं मोदिनीं
मालिनीं मानिनीं प्रणतजनसौभाग्यदायिनीम्

चरणम्

शङ्खचक्रशूलाङ्कुशपाणीं शक्तिसेनां मधुरवाणीं
पङ्कजनयनां पन्नगवेणीं पालितगुरुगुहां पुराणीम्
शङ्करार्धशरीरिणीं समस्तदेवतारूपिणीं
कङ्कणालङ्कृताब्जकरां कात्यायनीं नारायणीम्

◇ ◇ ◇ ◇ ◇

261 mAta”ngi marakatA”ngi

मातङ्गि मरकताङ्गि

रागं: धौतपञ्चमम् (६९) ताळं: रूपकम्

पल्लवि

मातङ्गि मरकताङ्गि मां पालय कृपालये

समष्टिचरणम्

धौतपञ्चमप्रिये त्र्यम्बकमोदितहृदये
शीताद्रिसुते ललिते श्रीशिवगुरुगुहविनुते
पूतचरिते बुधहिते पुरुहूतादिसेविते

◇ ◇ ◇ ◇ ◇

मातङ्गि

रागं: रमामनोहरि (५२) ताळं: रूपकम्

पल्लवि

मातङ्गि श्रीराजराजेश्वरि मामव

अनुपल्लवि

मातङ्गवदनादिगुरुगुहजननि धनिनि
मन्दस्मितमहादेवमनोल्लासिनि नळिनि

चरणम्

रमामनोहरि राकेन्दुशेखरि सुखकरि
रणत्किङ्किणिमेखलाभास्वरि सुन्दरि
वाममार्गप्रियकरि शङ्करि सर्वेश्वरि

◇ ◇ ◇ ◇ ◇

263 mAdhavo mAm pAtu

माधवो मां पातु

दशावतार रागमालिका ताळं: रूपकम्

नाट रागः

माधवो मां पातु मत्स्यावतारो
वेदस्तेयदुष्टहरो वेदादिरक्षणः श्री

गौळ रागः

गोविन्दं नमाम्यहं गुरुगुहनुतकूर्मावतारं
देवराजादिपूजितं दिव्यामृतप्रदम्

श्री रागः

श्रीधरेण रक्षितोऽहं भूमिपालसूकरेण
हितदेवोपकारेण हयासुरहतिनिपुणेन

आरभि रागः

नरसिंहाय नमस्ते प्रह्लादप्रार्थिताय
हिरण्यप्राणहराय हरिहयादिवन्दिताय

वराळि रागः

वामनादन्यं न जानेऽहं नरवररूपिणः
शुक्रबलिराजादिश्रुतिज्ञानप्रबोधिनो

परशुरामस्य दासोऽहं सीतापतिं शरणागतस्य
क्षत्रियकुलभीकरस्य जमदग्निऋषिपुत्रस्य

वसन्त रागः

रामचन्द्रस्वामिनि भक्तिं करोमि
दशरथसुकुमारात्मनि दशवदनभञ्जनात्मनि

सुरटि रागः

बलराम मां कलय भोगीशादिसोदर
मुरळीगानानन्दमुकुन्दादिसदालोल

सौराष्ट्र रागः

श्रीकृष्णं भजरे चित्त श्रीरुक्मिणीपतिं
शिशुपालकंसादिहरं पाण्डवादिरक्षितवरम्

मध्यमावति रागः

कलियुगवरवेङ्कटेशं खलसमूहहतसुरेशं
अलमेलुमङ्गेशं अच्युतादि भजेऽहमनिशम्

◇ ◇ ◇ ◇ ◇

मानसगुरुगुह

रागं: आनन्दभैरवि (२०) ताळं: रूपकम्

पल्लवि

मानसगुरुगुहरूपं भज रे रे
मायामयहृत्तापं त्यज रे रे

अनुपल्लवि

मानवजन्मनि संप्राप्ते सति
परमात्मनि निरतिशयसुखं व्रज रे रे

चरणम्

सत्वगुणोपाधिसहितसदाशिवं स्वाविद्यासमेतजीवोद्भवम्
तत्वं तामसयुतविश्ववैभवं तारकेश्वरमानन्दभैरवम्
नत्वा श्रीगुरुचरणं कृत्वा नामस्मरणं
जित्वा मोहावरणं मत्वा त्वदेकशरणम्

◇ ◇ ◇ ◇ ◇

265 mAmava paTTAbhirAma

मामव पट्टाभिराम

रागं: मणिरङ्गु (२२) ताळं: मिश्र चापु

पल्लवि

मामव पट्टाभिराम जय मारुतिसन्नुत नाम राम

अनुपल्लवि

कोमलधरपल्लवपदकोदण्डराम घनश्यामल
विग्रहाब्जनयन संपूर्णकाम रघुराम कल्याणराम राम

चरणम्

छत्रचामरकरधृतभरतलक्ष्मण-
शत्रुघ्नविभीषणसुग्रीवप्रमुखादिसेवित
अत्रिवसिष्टाद्यनुग्रहपात्र दशरथपुत्र मणिरङ्गवल्याद्यलङ्कृत
नवरत्नमणिमण्टपे विचित्रमणिमयसिंहासने
सीतया सह संस्थित सुचरित्र परमपवित्र
गुरुगुहमित्र पङ्कजमित्रवंशसुधाम्बुधिचन्द्र
मेदिनीपाल रामचन्द्र

◇ ◇ ◇ ◇ ◇

266 mAmava mInAkShi

मामव मीनाक्षि

रागं: वराळि (३९) ताळं: मिश्र चापु

पल्लवि

मामव मीनाक्षि राजमातङ्गि
माणिक्यवल्लकीपाणि मधुरवाणि वराळिवेणि

समष्टिचरणम्

सोमसुन्दरेश्वरसुखस्फूर्तिरूपिणि
श्यामे शङ्करि दिग्विजयप्रतापिनि
हेमरत्नाभरणधारिणि ईशगुरुगुहहृदागारिणि
कामितार्थवितरणधोरिणि कारुण्यामृतपरिपूरणि
कामक्रोधादिनिवारिणि कदम्बकाननविहारिणि

◇ ◇ ◇ ◇ ◇

267 mAmava raghuvIra

मामव रघुवीर

रागं: माहुरि (२८) ताळं: मिश्र चापु

पल्लवि

मामव रघुवीर मर्त्यावतार माधव धीर

अनुपल्लवि

त्वामाहुरीशादयस्तत्वमिति करुणानिधे दीनम्

चरणम्

मामकहृदयनिवास श्रीनिवास मारुतिप्रभृतिदासविश्वास
भूमिजासहवास इहपरभुक्तिमुक्तिवितरणविलास
कामजनक कनकाम्बरधर तामरसाक्षवदनपदकर
पामरपण्डितपावनकरनामधेय गुरुगुहनुत वर

◇ ◇ ◇ ◇ ◇

268 mAyUranAtham

मायूरनाथम्

रागं: धन्याशि (२०) ताळं: मिश्र चापु

पल्लवि

मायूरनाथमनिशं भजामि मायामयधरणीशं त्यजामि

अनुपल्लवि

केयूरहाराद्यलङ्कृतदेहं केकीपूजिताम्रवनगेहं
आयुरारोग्यैश्वर्यदं सायुज्यादिमुक्तिप्रदम्

चरणम्

आदित्यकोटिप्रकाशं नन्दिकेशमप्रमेयमभयाम्बिकेशं
महेशं मेदिन्यादिपञ्चभूतावकाशं मीनध्वजारिं पुरारिम्
वेदनुतगुरुगुहनिवासं भेदयुतविश्वविलासं
मोदरूपमनोविलासं नादमयनवनवोल्लासम्

◇ ◇ ◇ ◇ ◇

269 mAye citkale

माये चित्कले

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टुस्वर साहित्यम्

माये चित्कले जय रमे मङ्गळकर-
रङ्गरमणि मारजननि विष्णुजाये
देहि श्रियं अब्जमालिनि दृश्यविश्वविलासे
एहि वरलक्ष्मि सुन्दरि दीप्यमान-
पादतले पद्मे दिव्यतेजोमयि रक्ष मां
रञ्जनि देवतापूजितश्रीगुरुगुहे ॥

◇ ◇ ◇ ◇ ◇

270 mAye tvaM yAhi

माये त्वं याहि

रागं: तरङ्गिणि (२६) ताळं: आदि

पल्लवि

माये त्वं याहि मां बाधितुं का हि

अनुपल्लवि

ध्याये ध्येये त्वमेहि मुदं देहि मां पाहि

चरणम्

गाये गेये याहि काहि एहि देहि पाहि
उपाये पेये सरसकाये रसकाये सकाये अये
समुदाये गुरुगुहोदये सुधातरङ्गिणि अन्तरङ्गिणि

◇ ◇ ◇ ◇ ◇

271 mArakoTilAvaNya

मारकोटिकोटिलावण्य

रागं: आरभि (२९) ताळं: झम्प

पल्लवि

मारकोटिकोटिलावण्य मां पालय

धीराग्रगण्य वासुकीवलय

अनुपल्लवि

दारुकावनतपोधनतरुणीमोहाकार भिक्षाटनवेषधर शङ्कर

चरणम्

विरक्तानां विदेहकैवल्यदानविचक्षण भक्तानामभयप्रदान

विरिञ्चादिसकलदेवोपास्यमान विभूतिरुद्राक्षाभिमान

परशुमृगाग्निकपालडमरुकं दधान परमाद्वैततात्पर्यसन्धान

परवामदेवादिसकलविराजमान

परमेश्वर गुरुगुहसमान भासमान

◇ ◇ ◇ ◇ ◇

272 mAraratIpriyam

मारतिप्रियम्

रागं: रतिप्रिय (६२) ताळं: आदि

पल्लवि

मारतिप्रियं भक्तप्रियं मङ्गळदेवतेशं भावये

समष्टिचरणम्

भारतीशजनकं नतजनकं भावरागताळस्वरूपकं

जारचोरचतुरगोविन्दराजं पदाब्जं गुरुगुहनुतमजम्

◇ ◇ ◇ ◇ ◇

273 maruvakAdimAlini

मारुवकादिमालिनि

रागं: मारुव (१५) ताळं: आदि

पल्लवि

मारुवकादिमालिनि शूलिनि मामव कल्याणगुणशालिनि

समष्टिचरणम्

चारुस्मितमुखाम्बुजकपालिनि जगज्जीवेशगुरुगुहपालिनि
वारिजनयनविलासिनि कौळिनि
वाञ्छितार्थफलदायिनि हंसिनि

◇ ◇ ◇ ◇ ◇

274 mArgasahAyeshvaram

मार्गसहायेश्वरम्

रागं: काशीरामक्रिय (५१) ताळं: मिश्र चापु

पल्लवि

मार्गसहायेश्वरं भजेऽहं मरकतवल्लीमनोल्लासकरम्

समष्टिचरणम्

दुर्गालक्ष्मीभारतीभिः पूजितं दीनजनादिबृन्दसेवितं
दीर्घायुःप्रदकृपालवालं निर्गुणरसपूर्णशरीरं
नित्यगुरुगुहानन्दवरं विरिञ्चिपुरमध्यविहारं
वीरसिंहतीर्थोपचारम्

◇ ◇ ◇ ◇ ◇

275 mArgahindoLarAgapriye

मार्गहिन्दोळरागप्रिये

रागं: मार्गहिन्दोळम् (२०) ताळं: आदि

पल्लवि

मार्गहिन्दोळरागप्रिये मरकतवल्ली मां कलय

समष्टिचरणम्

मार्गसहायेश्वरप्रणयिनी मधुकैटभदमनी मदशमनी
दुर्गाद्यखिलशक्तिपरिपालिनी दुःखध्वंसिनी गुरुगुहजननी

◇ ◇ ◇ ◇ ◇

276 mInAkShi me mudam

मीनाक्षि मे मुदम्

रागं: गमकक्रिया (५३) ताळं: आदि

पल्लवि

मीनाक्षि मे मुदं देहि मेचकाङ्गि राजमातङ्गि

अनुपल्लवि

मानमातृमेये माये मरकतच्छाये शिवज्याये
मीनलोचनि पाशमोचनि मानिनि कदम्बवनवासिनि

चरणम्

मदुरपुरिनिलये मणिवलये मलयध्वजपाण्ड्यराजतनये
विधुविडम्बनवदने विजये वीणागानदशगमकक्रिये
मधुमदमोदितहृदये सदये महादेवसुन्दरेशप्रिये
मधुमुररिपुसोदरि शातोदरि विधिगुरुगुहवशङ्करि शङ्करि

◇ ◇ ◇ ◇ ◇

277 mucukundavarada

मुचुकुन्दवरद

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

मुचुकुन्दवरद त्यागराज सुन्दरकर
पादारविन्द सरसमन्दहासवदन जय विभो
मुकुन्दपूजिताङ्घ्रधवलसुन्दरतर
नन्दीशनन्दित सुरबृन्दवन्दित गुरुगुहगुरो ॥

◇ ◇ ◇ ◇ ◇

278 murahareNa mukundena

मुरहरेण मुकुन्देन

रागं: शुद्धमुखारि (१) ताळं: रूपकम्

पल्लवि

मुरहरेण मुकुन्देन केशवेन रक्षितोऽहम्

समष्टिचरणम्

पुरन्दरादिपूजितमुनिपुङ्गवसन्नुतेन

परमभागवतप्रणतप्रसिद्धगुरुगुहनुतेन

परमशुद्धमुखारिरागतोषितेन वरेण

◇ ◇ ◇ ◇ ◇

279 mohananATakapriye

मोहननाटकप्रिये

रागं: मोहननाट (९) ताळं: आदि

पल्लवि

मोहननाटकप्रिये ललिते पाहि मां परदेवते

समष्टिचरणम्

महादेवेशमनःप्रियकरि मानितगुरुगुहजननि शङ्करि
महापापप्रशमनि महिषासुरमर्दनि मधुसूदनि श्री

◇ ◇ ◇ ◇ ◇

रक्तगणपतिम्

रागं: मोहनम् (६५) ताळं: आदि

पल्लवि

रक्तगणपतिम् भजेऽहं रत्नसिंहासनपतिं सुरपतिम्

अनुपल्लवि

रक्ताम्बरधरं रागद्वेषादिहरं पार्वतीप्रियकरं मोहनकरम्

चरणम्

परशुरामक्षेत्रप्रभावं पायसान्नहोमादिविभावं
पञ्चकृत्यातीतस्वभावं भक्तजनादिसमूहवैभवम्
सकलकार्यार्थसिद्धिदं स्थिरं वामदेवादिपूजितं वरं
वारिजभववन्दितवल्लभेशं गुरुगुहनुतं परमशिवसुतम्

◇ ◇ ◇ ◇ ◇

281 ra”nganAyakam

रङ्गनायकम्

रागं: नायकि (२२) ताळं: आदि

पल्लवि

रङ्गनायकं भावये रङ्गनायकीसमेतं श्री

अनुपल्लवि

अङ्गजतातमनन्तमतीतं अजेन्द्राद्यमरनुतं सततं
उत्तुङ्गविहङ्गतुरङ्गं कृपापाङ्गं रमान्तरङ्गम्

चरणम्

प्रणवाकारदिव्यविमानं प्रह्लादादिभक्ताभिमानं
गणपतिसमानविष्वक्सेनं गजतुरगपदातिसेनम्
दिनमणिकुलभवराघवाराधनं मामकविदेहमुक्तिसाधनं
मणिमयसदनं शशिवदनं फणिपतिशयनं पद्मनयनम्
अगणितसुगुणगणनतविभीषणं घनतरकौस्तुभमणिविभूषणं
गुणिजनकृतवेदपारायणं गुरुगुहमुदितनारायणम्

◇ ◇ ◇ ◇ ◇

रङ्गपुरविहार

रागं: बृन्दावनसारङ्ग (२२) ताळं: रूपकम्

पल्लवि

रङ्गपुरविहार जय कोदण्डरामावतार रघुवीर श्री

अनुपल्लवि

अङ्गजजनकदेव बृन्दावनसारङ्गेन्द्रवरद रमान्तरङ्ग
श्यामळाङ्ग विहङ्गतुरङ्ग सदयापाङ्ग सत्सङ्ग

चरणम्

पङ्कजास्यकुलजलनिधिसोम वरपङ्कजमुख पट्टाभिराम
पदपङ्कजजितकाम रघुराम वामाङ्गगत-
सीतावरवेष शेषाङ्गशयन भक्तसन्तोष
एणाङ्करविनयन मृदुतरभाष अकळङ्कदर्पण-
कपोलविशेष मुनिसङ्कटहरण गोविन्द
वेङ्कटरमण मुकुन्द सङ्कर्षणमूलकन्द शङ्करगुरुगुहानन्द

◇ ◇ ◇ ◇ ◇

283 rAjagopAlam

राजगोपालम्

रागं: मोहनम् (६५) ताळं: रूपकम्

पल्लवि

राजगोपालं भजेऽहं रमालीलम्

अनुपल्लवि

तेजोमयमोहनकरं दिव्याम्बरादिधरं
गजराजपूजितपदं गुणिजननतगोविन्दम्

चरणम्

नारदादिकृतभजनं नादलययुतसदनं
हरिद्रानदीतीरं हत्यादिपापहरम्
पारिजाततरुमूलं पङ्कजनयनविशालं
गुरुगुहहितवनमालं गोपीजनमालोलम्

◇ ◇ ◇ ◇ ◇

राजराजेन्द्रचोल

रागं: गुण्डक्रिय (१५) ताळं: त्रिपुट

पल्लवि

राजराजेन्द्रचोलप्रतिष्ठितं बृहदीश्वरं भज रे श्री

समष्टिचरणम्

राजाधिराजसमार्चितं रमणीयहृदयविराजितं
राजीवलोचनं गुरुगुहरञ्जितगुण्डक्रियाप्रियं
राजराजेन्द्रचोलधरं राजधरं बृहदीश्वरं भज

◇ ◇ ◇ ◇ ◇

285 rAjIvalocanam

राजीवलोचनम्

रागं: शङ्करभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

राजीवलोचनं रामचन्द्रं रामानुजाग्रं राजेन्द्रं
सद्गुणसान्द्रं कृपापाङ्गं सद्गुरुगुहमुदितं शान्तम्
रावणान्तकं जनकसुतारमणं भक्तभरणं
परमघनश्यामळं श्रीरघुकुलतिलकाभरणम्
भरतशत्रुघ्नसोदरं विभीषणविनुतपदं
सुग्रीवप्रमुखादिनुतपादपङ्कजं कौसल्यात्मजम्
कोदण्डकरं अहल्यादेवीशापविमोचनसुचरित्रं
कौस्थुभधारिणं कैवल्यप्रदं दशरथात्मजं भजेऽहम् ॥

◇ ◇ ◇ ◇ ◇

रामकृष्णेन संरक्षितोहम्

रागं: सहान (२२) ताळं: आदि

पल्लवि

रामकृष्णेन संरक्षितोहं रामायणभागवतप्रियेण

अनुपल्लवि

उमापतिवाणीपतिमहितेन कौसल्यायशोदाबालेन

चरणम्

अयोध्याद्वारकासुसदनेन अमरेशगुरुगुहादिविदितेन
जयसीतालक्ष्मीमोहितेन जननादिमुक्तिप्रदचरणेन
मायामारिचकंसहतेन मानितविभीषणाक्रूरेण
पयोनिधिचन्द्रेण भरतबलरामसोदरेण प्रकटकीर्तनेन

◇ ◇ ◇ ◇ ◇

रामचन्द्रभक्तम्

रागं: गेयहेज्जज्जि (१३) ताळं: आदि

पल्लवि

रामचन्द्रभक्तं भज मानस

राक्षसान्तकं हनुमन्तं श्री

समष्टिचरणम्

आमिषीकृतदिवाकरं गेयहेज्जज्जिरागप्रीतिकरं

सामदानभेददण्डचतुरं सद्गुरुगुहसंमोदितं वरम्

◇ ◇ ◇ ◇ ◇

रामचन्द्रं भावयामि

रागं: वसन्त (१५) ताळं: रूपकम्

पल्लवि

रामचन्द्रं भावयामि रघुकुलतिलकमुपेन्द्रम्

अनुपल्लवि

भूमिजानायकं भुक्तिमुक्तिदायकं
नामकीर्तनतारकं नरवरं गतमायिकम्

चरणम्

साकेतनगरे निवसन्तं साम्राज्यप्रदहनुमन्तं
राकेन्दुवदनं भगवन्तं रमणीयकल्याणगुणवन्तं
काकुस्थं धीमन्तं कमलाक्षं श्रीमन्तं
नाकेशनुतमनन्तं नरगुरुगुहविहरन्तम्

◇ ◇ ◇ ◇ ◇

289 rAmacandraM rAjIvAkSham

रामचन्द्रं राजीवाक्षम्

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टुस्वर साहित्यम्

रामचन्द्रं राजीवाक्षं श्यामळाङ्गं शाश्वतकीर्तिं
कोमलहस्तं कोसलराजं मामकहृत्कमलागारम्
मारुतियुक्तं धीमन्तं मानितभक्तं श्रीमन्तं
कौमारवरं गुरुगुहमित्रं कारुण्यनिधिं दशरथपुत्रम्
भूमिसुतापं भूपतिरूपं कोमलपल्लवपादं मोदं
कामगुरुं सीतारामं कौस्तुभभूषं वन्देऽहम् ॥

◇ ◇ ◇ ◇ ◇

रामचन्द्रस्य दासोऽहम्

रागं: धामवति (५९) ताळं: आदि

पल्लवि

रामचन्द्रस्य दासोऽहं

श्रीसीतानायकस्य गुरुगुहहितस्य

समष्टिचरणम्

सामदानभेदादिचतुरस्य सज्जनपालस्य दुष्टहरस्य

समयाचारसंप्रदायकस्य शबरीमोक्षप्रदस्य वरस्य

◇ ◇ ◇ ◇ ◇

291 rAmacandrAdanyam

रामचन्द्रादन्यम्

रागं: धन्याशि (२०) ताळं: खण्ड चापु

पल्लवि

रामचन्द्रादन्यं न जानेऽहं श्री हरिहरात्मरूपिणो

समष्टिचरणम्

कामजनकात्कठिनसुबाहुमारीचखरदूषणादि-
मदहरणान्तकरूपिणो समस्तसुरसन्नुतशरचापपाणिनः
सरसगुरुगुहसङ्गीततत्वबोधिनः

◇ ◇ ◇ ◇ ◇

292 rAmacandrAya namaste

रामचन्द्राय नमस्ते

रागं: तोडि (८) ताळं: मिश्र चापु

पल्लवि

रामचन्द्राय नमस्ते राजीवलोचनाय वराय

अनुपल्लवि

सामगानलोलाय साधुजनादिपालाय
कोमळतरगुरुगुहनुताय कोटिमारलावण्याय

चरणम्

दशरथराजकुमाराय दण्डकारण्यविहाराय
कौशिककृतमखरक्षकाय कनकमणिमालाधराय
दशग्रीवप्राणहराय दासविभीषणपालकाय
कुशलवसीतासमेताय कपिबृन्दादिमनोहराय

◇ ◇ ◇ ◇ ◇

293 rAmacandreNa

रामचन्द्रेण संरक्षितोऽहम्

रागं: माञ्झि (२०) ताळं: रूपकम्

पल्लवि

रामचन्द्रेण संरक्षितोऽहं सीता-

अनुपल्लवि

रमाभारतीगौरीरमणस्वरूपेण श्री

चरणम्

कामकोटिसुन्दरेण कमनीयकन्धरेण

कोमलघनश्यामेन कोदण्डरामेण

मामकहृदयस्थितेन मारुतिगीतामृतेन

मञ्जीरमणिमण्डितमद्गुरुगुहमानितेन

◇ ◇ ◇ ◇ ◇

राम जनार्दन

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

रामजनार्दन रावणमर्दन रामानुजाग्रज राजविभो
पामरमोचन पङ्कजलोचन भक्तजनप्रिय पालय माम्
भूमिजानायक भुक्तिप्रदायक भूसुरपालन भूमिपते
श्यामळविग्रह शान्त गुरुगुहसंमत श्रीरामचन्द्रप्रभो ॥

◇ ◇ ◇ ◇ ◇

295 rAmanathaM bhajeham

रामनाथं भजेऽहम्

रागं: काशीरामक्रिय (५१) ताळं: रूपकम्

पल्लवि

रामनाथं भजेऽहं रामचन्द्रपूजितम्

अनुपल्लवि

कामितफलप्रददेवं कोटितीर्थप्रभावं

कुमारगुरुगुहविदितं कपिबृन्दादिसन्नुतम्

चरणम्

सेतुमध्यगन्धमादनपर्वतविहारं

सदा पर्वतवर्द्धिनीमनोल्लासकरम्

हस्तामलकनतवरं हाटकमयहारधरं

हत्यादिपापहरं हंसस्सोऽहाकारम्

◇ ◇ ◇ ◇ ◇

296 rAma rAma kalikaluSha

रामराम कलिकलुषविराम

रागं: रामकलि (१५) ताळं: रूपकम्

पल्लवि

राम राम कलिकलुषविराम धराभृल्ललाम

समष्टिचरणम्

श्रीमहिजाकाम सुगुणधाम परन्धाम श्याम
मामव शिवगुरुगुहसुत्राम विबुधविनुतनाम

◇ ◇ ◇ ◇ ◇

297 rAme bharatapAlita

रामे भरतपालित

रागं: ज्योति (६८) ताळं: खण्ड चापु

पल्लवि

रामे भरतपलितराज्यमर्पयामि

राजाधिराजपूजितचरणं नमामि

समष्टिचरणम्

अमरेशादिसकलदेवतामोदने

अन्तरङ्गगुरुगुहानन्दमृदुगदने

समस्तमुनिगणसाधुजनादिवन्दने

सानन्दयुतसीतामनोहरमदने

◇ ◇ ◇ ◇ ◇

रुद्रकोपजात

रागं: रुद्रप्रिय (२२) ताळं: रूपकम्

पल्लवि

रुद्रकोपजातवीरभद्रमाश्रये सदा हृदये

अनुपल्लवि

भद्रकाळीरमणं भवतरणं भद्रप्रदाननिपुणचरणं
रुद्राक्षमालाभरणं क्षुद्रादिनिवारणं भक्तभरणम्

चरणम्

विजितविधिहरिहयं वीराधिवीरमभयं
रजतपर्वताश्रयं रविविधुतेजोमयम्
गजमुखगणेशरक्षं अजवदनदक्षशिक्षं
निजरूपदानदक्षं निजगुरुगुहस्वपक्षम्

◇ ◇ ◇ ◇ ◇

299 reNukAdevi

रेणुकादेवि संरक्षितोऽहम्

रागं: कन्नडबङ्गाळ (१५) ताळं: झम्प

पल्लवि

रेणुकादेवि संरक्षितोऽहमनिशम्

समष्टिचरणम्

वेणुवाद्यादियुतविजयनगरस्थिते
माणिक्यभूषणि मधुररसभाषिणि
बाणसदृशाक्षिणि परशुरामजननि
कोणत्रयवासिनि गुरुगुहविश्वासिनि
कन्नडबङ्गळे गान्धर्वभञ्जनि

◇ ◇ ◇ ◇ ◇

लम्बोदराय नमस्ते

रागं: वराळि (३९) ताळं: खण्ड चापु

पल्लवि

लम्बोदराय नमस्ते श्री

समष्टिचरणम्

कुम्भजपूजिताय इभवदनवरदाय

अभयवरप्रदाय अम्बुजाससननुताय

साम्बशिवात्मजाय जम्बूकदलीफल-

सारभक्षिताय गुरुगुहाग्रजाय

◇ ◇ ◇ ◇ ◇

301 lalitAparameshvari

ललितापरमेश्वरी

रागं: सुरटि (२८) ताळं: आदि

पल्लवि

ललितापरमेश्वरी जयति लक्ष्मीवाणीनुतजगदम्बा

समष्टिचरणम्

कोलाहलकामेश्वरयुवती कोटिमारलावण्यभगवती
कैलासगिरिविहारतोषिणी कैवल्यप्रदगुरुगुहजननी

◇ ◇ ◇ ◇ ◇

302 lalitAmbikAm

ललिताम्बिकाम्

रागं: देवक्रिय (२८) ताळं: आदि

पल्लवि

ललिताम्बिकां चिन्तयाम्यहं श्रीगुरुगुहपूजितपराम्बिकाम्

अनुपल्लवि

त्रिलोकराज्ञीं दीनरक्षिणीं त्रिकोणवासिनीं भण्डमर्दिनीम्

चरणम्

कलारूपिणीं कात्यायनीं कञ्जलोचनीं कनकमालिनीं

पालितमन्त्रिण्यादिसमूहां पशुपतिहृदयानन्दकरमोहाम्

◇ ◇ ◇ ◇ ◇

303 lalitAmbikAyai

ललिताम्बिकायै

रागं: भैरवि (२०) ताळं: मिश्र चापु

पल्लवि

ललिताम्बिकायै लक्षकोट्यण्डनायिकायै

ललनायै नमस्ते नमस्ते

समष्टिचरणम्

बालिकानामरूपायै फालचन्द्रधरायै

जालन्धरपीठायै ज्वलज्ज्वालामालायै

नीललोहितपूजितायै नटभैरवीनर्तनायै

कलानिधिवदनशोभायै काञ्चनमयगुरुगुहनुतायै

◇ ◇ ◇ ◇ ◇

वदान्येश्वरम्

रागं: देवगान्धारि (२९) ताळं: आदि

पल्लवि

वदान्येश्वरं भजेऽहं सदा मदादिवृत्तिं त्यजेऽहं मुदा

अनुपल्लवि

पदारविन्दं आनन्दकन्दं पालितदेवगान्धारबृन्दं
सदार्चितं विनतविधिमुकुन्दं सद्गुरुगुहचिदानन्दं सदा

चरणम्

पशुपाशमोचनं त्रिलोचनं पञ्चाननं प्रणतगजाननं
शिशुबालगोपविदितं मुदितं शिवं बिल्ववनवैभवं भवम्
विशुद्धादिनिलयं मणिवलयं विगतविकल्पकं श्रितकल्पकं
पशुपतिं ज्ञानाम्बिकापतिं परशुमृगधरं नीलकन्धरं
अशुभक्षयकरं अभयवरदकरं अनाद्यविद्याहरं शङ्करम्

◇ ◇ ◇ ◇ ◇

305 vande mInAkShi

वन्दे मीनाक्षि

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

वन्दे मीनाक्षि त्वां सरसिजवक्त्रेऽपर्णे दुर्गे
नतसुरबृन्देऽसक्ते गुरुगुहपालिनि जलरुहचरणे
सुन्दरपाण्ड्यानन्दे माये सूरिजनाधारे
सुन्दरराजसोदरि गौरि शुभकरि सततमहम्

◇ ◇ ◇ ◇ ◇

वरदराज पहि

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टुस्वर साहित्यम्

वरदराज पाहि विभो करिगिरीश विश्वप्रभो
सुरपतिनुत नगधर नवनीतचोर गुरुगुहादिविहित
मुरहर मुकुन्द श्री विहित मुरहर मुकुन्द श्री ॥

◇ ◇ ◇ ◇ ◇

307 varadarAjamupAsmahe

वरदराजमुपास्महे

रागं: सारङ्गं (६५) ताळं: रूपकम्

पल्लवि

वरदराजमुपास्महे वनजासनादिपूजितम्

अनुपल्लवि

मुरळीधरशोभाकरं मुरखरादिदुष्टहरम्

चरणम्

नीलमेघजितशरीरं निरतिशयानन्दकरं
काञ्चीनगरविहारं काळीरक्षितचोरम्
कलिदोषहरतीर्थप्रभावगुरुगुहादिनतं
कपिलशुकादिसन्नुतगरुडवाहारोहम्

◇ ◇ ◇ ◇ ◇

308 varadarAjAvAva

वरदराज

रागं: गङ्गातरङ्गिणि (३३) ताळं: रूपकम्

पल्लवि

वरदराजाऽवाव वाञ्छिताधिकफलप्रद

समष्टिचरणम्

द्विरदराजपरिपालन द्विजाद्यमरपरिपोषण
गरुडतुरङ्गसङ्ग गङ्गातरङ्ग दयापाङ्ग
गुरुगुहान्तरङ्ग भुजङ्गभरिताङ्ग श्रीरङ्ग

◇ ◇ ◇ ◇ ◇

309 varalakShmIm

वरलक्ष्मीं भज

रागं: सौराष्ट्रम् (१५) ताळं: आदि

पल्लवि

वरलक्ष्मीं भज रे रे मानस

वाञ्छितर्थफलप्रदां वरदां वनजपदाम्

समष्टि चरणम्

चराचरात्मकप्रपञ्चजननीं सौराष्ट्रदेशपतिनुतधनिनीं
निरामयमहाविष्णुमानिनीं निरञ्जनीं निखिलाघभञ्जनीम्
सुरार्चितपदाम्बुजविकासिनीं निरालम्बमानसोल्लासिनीं
मुरारिवक्षःस्थलनिवासिनीं पुरारिगुरुगुहचिद्विलासिनीम्

◇ ◇ ◇ ◇ ◇

वरशिवबालम्

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

वरशिवबालं वल्लीलोलं वन्देऽनन्तं
हरिहरमोदं हंसानन्दं हसितमुखम्
गुरुगुहरूपं गुप्ताकारं गोरक्षं तं
सुरपतिसेनं सुब्रह्मण्यं सुरविनुतम्

◇ ◇ ◇ ◇ ◇

311 vallabhAnAyakasya

वल्लभानायकस्य

रागं: बेगड (२९) ताळं: रूपकम्

पल्लवि

वल्लभानायकस्य भक्तो भवामि

वाञ्छितार्थदायकस्य वरमूषिकवाहनस्य

समष्टिचरणम्

पल्लवपदमृदुतरस्य पाशाङ्कुशादिधरस्य

मल्लिकाजातीचंपकहारस्य मणिमालस्य

वल्लीविवाहकारणस्य गुरुगुहपूजितस्य

काळीकलामालिनीकमलाक्षीसन्नुतस्य

◇ ◇ ◇ ◇ ◇

वाग्देवि मामव

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

वाग्देवि मामव कल्याणि वाणि ब्रह्माणि सुताम्रोष्ठि
वनजवदनगुरुगुहमहिते देवसुरपतिविधिविहिते
वर्णमयि विलसितपदकमले वरमधुरकविजनमुदित-
हृदये वक्त्राब्जे नित्यं वरदे व्याससनकशुकमुनिगणमुदिते ॥

◇ ◇ ◇ ◇ ◇

313 vAtApigaNapatim

वातापिगणपतिं भजेऽहम्

रागं: हंसध्वनि (२९) ताळं: आदि

पल्लवि

वातापिगणपतिं भजेऽहं वारणास्यं वरप्रदम् श्री

अनुपल्लवि

भूतादिसंसेवितचरणं भूतभौतिकप्रपञ्चभरणं
वीतरागिणं विनतयोगिनं विश्वकारणं विघ्नवारणम्

चरणम्

पुरा कुम्भसंभवमुनिवरप्रपूजितं त्रिकोणमध्यगतं
मुरारिप्रमुखाद्युपासितं मूलाधारक्षेत्रस्थितम्
परादिचत्वारिवागात्मकं प्रणवस्वरूपवक्रतुण्डं
निरन्तरं निटिलचन्द्रखण्डं निजवामकरविधृतेक्षुदण्डम्
कराम्बुजपाशबीजापूरं कलुषविदूरं भूताकारं
हरादिगुरुगुहतोषितबिम्बं हंसध्वनिभूषितहेरम्बम्

◇ ◇ ◇ ◇ ◇

314 vAmA”nkasthitayA

वामाङ्कस्थितया

रागं: अठाण (२८) ताळं: खण्ड एकम्

पल्लवि

वामाङ्कस्थितया वल्लभयाऽश्लिष्टं
वारणवदनं देवं वन्देऽहम्

अनुपल्लवि

वामनस्वरूपं वरदं सचापं चामरकर्णं शशिशेखरतनयं
नामरूपधरं अभिनवगुरुगुहहृदयम्

चरणम्

अष्टाङ्गयोगवरहठाणवादिजयवसिष्टादितपोधनसेवितगणनाथं
सृष्ट्यादिकारणं श्रितपालनं हेतुदृष्टान्तवर्जितं देवतापूजितं
दुष्टविघ्नहरणं शिष्टभक्तभरणं इष्टफलदचरणं शिष्टहृद्विहरणम्

◇ ◇ ◇ ◇ ◇

315 vArAhIm

वाराहीम्

रागं: वेगवाहिनि (१६) ताळं: चापु

पल्लवि

वाराहीं वैष्णवीं वनवासिनीं सदा वन्देऽहम्

समष्टिचरणम्

वारुणीं मदमत्तचण्डादिखण्डिनीं

जातवेदस्वरूपिणीं मन्दहासिनीम्

करुणाकटाक्षवीक्षणीं गुरुगुहनुतसुगुणशालिनीम्

◇ ◇ ◇ ◇ ◇

316 vAsudevamupAsmahe

वासुदेवमुपास्महे

रागं: माळवापञ्चमम् (१५) ताळं: रूपकम्

पल्लवि

वासुदेवमुपास्महे वसुदेवात्मजं हरिम्

अनुपल्लवि

वासवादिदेवजालवन्दितवैकुण्ठपदं

दासजनानामभीष्टदायकाम्भोजपदम्

चरणम्

कनकाङ्गमादिशेषं कपटदशाकृतिवेषं

अनन्तवेदघोषं अपगतरागद्वेषम्

घनकौस्तुभमणिभूषं गंभीरमृदुभाषं

वनजासनादिपोषं वरगुरुगुहसन्तोषम्

◇ ◇ ◇ ◇ ◇

317 vighneshvaram

विघ्नेश्वरम्

रागं: मलहरि (१५) ताळं: आदि

पल्लवि

विघ्नेश्वरं भजरे मानस विधिगुरुगुहपूजितवरं श्री

अनुपल्लवि

विघ्नवारणविनायकमनिशं वीरादिविनुतविघ्नराजम्

चरणम्

श्वेताम्बरधरं श्वेतार्कपुष्पमालावृतं
पाशाङ्कुशधरं पन्नगाभरणप्रियकरम्
प्रणतभक्तार्तिभञ्जनं चतुरतरं
भूतगणादिसेवितपल्लवपादपङ्कजपद्मकरम्
भूतभौतिकप्रपञ्चाधिभरणं भवपाशमोचनं शुभकरम्

◇ ◇ ◇ ◇ ◇

विनायक

रागं: वेगवाहिनि (१६) ताळं: रूपकम्

पल्लवि

विनायक विघ्ननाशक मां तारय दयानिधे

अनुपल्लवि

अनाथरक्षक आरूढमूषिक दक्षशिक्षक मोदकभक्षक

चरणम्

शिवगुरुगुहविधिपूजित आश्रितजनपरिपालक
देवराजपुरतोषित वेगवाहिनीवर्धित
रविशशिवह्निनेत्र रतिपतिसन्नुत शुभगात्र
पवनात्मजानन्दकर राममित्र वरपवित्र

◇ ◇ ◇ ◇ ◇

319 vishAlAkShIm

विशालाक्षीं विश्वेशीम्

रागं: काशीरामक्रिय (५१) ताळं: त्रिपुट

पल्लवि

विशालाक्षीं विश्वेशीं भज रे रे मानस सदा

समष्टिचरणम्

काशीराज्ञीं कपालिनीं विनोदजालिनीं वारिणीं
पाशमोचिनीं प्रसिद्धिनीं ईशानीं गुरुगुहजननीम्

◇ ◇ ◇ ◇ ◇

विश्वनाथेन

रागं: सामन्त (३०) ताळं: आदि

पल्लवि

विश्वनाथेन रक्षितोऽहं विशालाक्षीसमेतेन

अनुपल्लवि

शाश्वतगुरुगुहसंपूजितेन सामन्तपुष्पमालाधरेण
विश्वोत्पत्तिस्थितिलयकारणेन गर्ततीरप्रभावेन

चरणम्

काशीक्षेत्रस्तितप्रसिद्धेन वसिष्टादिमुनिगणसन्नुतेन
विकल्परोगवैद्यनिपुणेन विमलगणिकानर्तनप्रियेण
आश्रितजनमन्दारेण देवादिनुतपदपङ्कजेन
सङ्गीतशास्त्रादिसंयुतेन समस्तसाम्राज्यप्रदशिवेन

◇ ◇ ◇ ◇ ◇

321 vishvanAtham

विश्वनाथं भजेऽहम्

रागं: नटाभरणम् (१०) ताळं: आदि

पल्लवि

विश्वनाथं भजेऽहं सततं विशालाक्षीशं परमेशम्

समष्टिचरणम्

नश्वरप्रपञ्चाधिष्ठानं नन्दितुरङ्गयानमीशानं

उच्छ्वासाजपानटाभरणं उत्तमगुरुगुहपूजितचरणम्

◇ ◇ ◇ ◇ ◇

322 vishveshvaro

विश्वेश्वरो रक्षतु माम्

रागं: कानड (२२) ताळं: आदि

पल्लवि

विश्वेश्वरो रक्षतु मां विधिगुरुगुहपूजितस्सततम्

समष्टिचरणम्

विशालाक्षीसहितानन्दयुतो विकल्पातीतप्रपञ्चातीतो
शशिरविवह्निलोचनो चतुर्विधपुरुषार्थप्रदनिपुणो

◇ ◇ ◇ ◇ ◇

323 vINApustaka

वीणापुस्तकधारिणीम्

रागं: वेहवाहिनि (१६) ताळं: खण्ड एकम्

पल्लवि

वीणापुस्तकधारिणीमाश्रये वेगवाहिनीं वाणीमाश्रये

अनुपल्लवि

एणाङ्कयुतजटामकुटां तां
एकाग्रचित्तनिध्यातां विधिकान्ताम्

चरणम्

पराद्यखिलशब्दस्वरूपावकाशां पौर्णमीचन्द्रिकाधवळसङ्काशां
करारविन्दां कल्याणदां भाषां कनकचम्पकदामभूषाविशेषाम्
निरन्तरं भक्तजिह्वाग्रवासां निखिलप्रपञ्चसंकोचविकासां
नराधमाननविलोकशोकापहां नरहरिहरगुरुगुहपूजितविग्रहाम्

◇ ◇ ◇ ◇ ◇

वीणाभेरिवेणुवाद्यादि

रागं: आभेरि (२०) ताळं: आदि

पल्लवि

वीणाभेरिवेणुवाद्यादिविनोदिनि मोदिनि रक्ष माम्

समष्टिचरणम्

घोणीवदनादिनुतचरिते गुणरहिते विधिगुरुगुहमहिते
एणीलोचनि पापविमोचनि इन्दिरेशसहोदरि तलोदरि

◇ ◇ ◇ ◇ ◇

325 vIravasanta

वीरवसन्त त्यागराज

रागं: वीरवसन्तम् (२४) ताळं: आदि

पल्लवि

वीरवसन्त त्यागराज मां तारयाशु करुणानिधे जय

अनुपल्लवि

मारजनकपूजित महादेव मानिताजपानटनप्रभाव

चरणम्

दिनकरशशितेजोमयलोचन देवराजमुनिशापविमोचन
वनजवदन कमलानगरसदन वल्मीकेश्वर भक्तजनावन
कनकरत्नसिंहासनाभरण गणपतिगुरुगुहजनक भवतरण
जननात्कैवल्यदायकचरण जननीश्रीकमलाम्बिकास्मरण

◇ ◇ ◇ ◇ ◇

वीरहनुमते नमो नमः

रागं: कर्णाटक कापि (२२) ताळं: रूपकम्

पल्लवि

वीरहनुमते नमो नमः मारुततनय नमो नमः

अनुपल्लवि

सरसीरुहवदन श्रीरामचन्द्रचरण

चरणम्

क्रूरराक्षसादिहरण सर्वविद्यादाननिपुण
परमन्त्रविनाशकरण कपिविनुत गुरुगुहस्मरण

◇ ◇ ◇ ◇ ◇

327 ve”nkaTAcalapate

वेङ्कटाचलपते

रागं: कर्णाटक कापि (२२) ताळं: आदि

पल्लवि

वेङ्कटाचलपते निनु नम्मिति वेगमे ननु रक्षियुमय्या

अनुपल्लवि

पङ्कजासनप्रमुखादि विनुतपदमुनाश्रयिञ्चिनवारिकेल्ल
सङ्कटमुलुदीर्चि संपदलिच्चि
मङ्गळं पोरुन्दिय पुलिवलत्तिल् विळङ्गुम्

चरणम्

श्रीनिवास शेषाचलमुनिंचि शीघ्रमाय् वन्दु
अन्धुनिकाभीष्टदानमोसगि गोकर्णक्षेत्रमुलो
नेलकोनि मृकण्डु मुनिकळ् मुदलान भल्क्तानाम्
अभयवरप्रदानचतुरतररमापते दयानिधे प्रत्यक्षमुगा-
निन्द मानिलत्तिल् निन् महिमै अनेकम्
वानवर् वणङ्गुं वासुदेवने वाञ्छितार्थफलमिच्चु
वरदने दीनरक्षक पीतम्बरधर देवदेव गुरुगुहन् मामनान

◇ ◇ ◇ ◇ ◇

वेङ्कटेश्वरयादवभूपतिम्

रागं: मेघरञ्जनि (१५) ताळं: रूपकम्

पल्लवि

वेङ्कटेश्वरयादवभूपतिमाश्रयेऽहं विशविकल्पापहं
विद्वज्जनकल्पभूरुहं वदनसरसीरुहम्

समष्टिचरणम्

कङ्कशैलमध्यस्थितकार्तिकेयशिवगुरुगुहकरुणाकटाक्षपात्रं
कञ्जदलायतनेत्रं कङ्कणहारकिरीटालङ्कृतसुन्दरगात्रम्
काञ्चनवृष्टिप्रदमेघरञ्जितबहुक्षेत्रं
पङ्कजभवमुखसुरकृतसकलनिष्कळस्तोत्रं
सङ्कल्पविकल्परहितसच्चिदानदमात्रम्

◇ ◇ ◇ ◇ ◇

329 vedapurIshvaram

वेदपुरीश्वरम्

रागं: धन्याशि (२०) ताळं: अदि

पल्लवि

वेदपुरीश्वरं भज रे रे चित्त वेदागमादिसन्नुतवैभवम्

अनुपल्लवि

विधीन्द्रसन्नुतविनोदचरणं विमलगुरुगुहोपचारिणम्

चरणम्

नादबिन्दुकलास्पदं शङ्करं नन्दितुरगारोहितं वरं
चन्द्रशेखरं सदानन्दकरं चर्माम्बरधरं चतुरतरकरम्
माधवाद्यमरबृन्दघोषितं मारकोटिकोटिप्रकाशितं
महेश्वरं त्रिभुवनेश्वरं प्रसिद्धत्रिपुरसुन्दरीसमेतम्

◇ ◇ ◇ ◇ ◇

330 vedAraNyeshvarAya

वेदारण्येश्वराय

रागं: तोडि (८) ताळं: आदि

पल्लवि

वेदारण्येश्वराय नमस्ते

वीणावादनविदुष्यम्बिकासमेताय

अनुपल्लवि

वेदागमविनुतवैभवाय वेदान्तार्थतत्वबोधिताय

चरणम्

सुरासुरसेवितविश्वेशाय सुन्दरगुरुगुहसुपूजिताय
सूर्यचन्द्राग्निलोचनाय परवामदेवादिवन्दितपदाय
मुरारिप्रभृतिदेवसमूहाय मूलकन्दाय मुक्तिप्रदाय
चराचरात्मकप्रपञ्चाय शङ्कराय चतुरतरवराय

◇ ◇ ◇ ◇ ◇

331 vamshavati

वंशवति शिवयुवति

रागं: वंशवति (५४) ताळं: आदि

पल्लवि

वंशवति शिवयुवति पालय मां शांभवि बहुतरमहिमे

समष्टिचरणम्

द्वाविंशत्श्रुतिस्वरूपिणि विनोदकरगुरुगुहस्वरूपिणि
अंशांशस्वरूपप्रकाशिनि हंसिनि दुरितध्वंसिनि जननि

◇ ◇ ◇ ◇ ◇

शक्तिसहितगणपतिम्

रागं: शङ्करभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

शक्तिसहितगणपतिं शङ्करादिसेवितं
विरक्तसकलमुनिवरसुरराजविनुतगुरुगुहम्
भक्ताळिपोषकं भवसुतं विनायकं
भुक्तिमुक्तिप्रदं भूषिताङ्गं रक्तपादाम्बुजं भावयामि ॥

◇ ◇ ◇ ◇ ◇

333 sha”nkhacakragadhApAnim

शङ्खचक्रगदापाणिम्

रागं: पूर्णचन्द्रिक (२९) ताळं: रूपकम्

पल्लवि

शङ्खचक्रगदापाणिं वन्दे
श्रीशार्ङ्गनन्दककौस्तुभधारिणं वन्दे

अनुपल्लवि

पङ्केरुहचरणं पद्मावतीरमणं
सङ्कटापहरणं सदाभक्तभरणम्
कुङ्कुमपङ्किलगात्रं पङ्कजविशालनेत्रं
शङ्करसन्नुतिपात्रं वेङ्कटवरदक्षेत्रम्

चरणम्

गजेन्द्रसंरक्षणं गरुडवाहविचक्षणम्
अजेन्द्रादिविलक्षणम् अमृतसारभक्षणम्
अजामिळप्रभृत्यनेकदासाळिसंतरणम्
भजे पूर्णचन्द्रिकाङ्गगुरुगुहान्तःकरणम्
कुजादिग्रहविहितं विरजानदीतटस्थितम्
सजातीयादिरहितं निजानन्दबोधहितम्

◇ ◇ ◇ ◇ ◇

शङ्करनारायणम्

रागं: नारायणदेशाक्षि (२९) ताळं: आदि

पल्लवि

शङ्करनारायणं भजेऽहं सदाशिवं
नारायणदेशाक्षिरागनुतम्

अनुपल्लवि

शङ्करनारायणीप्रियकरं साधुजनावनसन्तोषकरम्

चरणम्

शैलराजपूजितपदाम्बुजं शार्दूलचर्माम्बरादिधरं
सूर्यचन्द्राग्निननयनं त्रिनयनं शुकशौनकादिगुरुगुहसेवितम्
कैलासगिरिविहारं शङ्करं कपालशूलमालादिधरं
कालहरं त्रिपुरहरं कलिकल्मषापहं कामितफलदकरम्

◇ ◇ ◇ ◇ ◇

335 sha”nkaramabhirAmI

शङ्करमभिरामीमनोहरम्

रागं: मनोहरि (३३) ताळं: रूपकम्

पल्लवि

शङ्करमभिरामीमनोहरं शशिधरममृतघटेश्वरं भजेऽहं

शङ्खाभिषेकगात्रं सच्चिदानन्दमात्रम्

समष्टिचरणम्

पङ्कजासनादिपूजिताब्जपदं भक्तमार्कण्डेयायुःप्रदं

भयङ्करघोररूपधरयमनिग्रहानुग्रहं

पङ्कजमुखगुरुगुहपरिपालं कृपालवालम्

◇ ◇ ◇ ◇ ◇

शङ्करवर

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

शङ्करवर पङ्कजकर शंभो देव पशुपते
ओंकाराकारसुतनो श्रीकाञ्चीनगरपते
एकाम्रेश गुरुगुहादिजनक मां पाहि ॥

◇ ◇ ◇ ◇ ◇

337 sharavaNabhava

शरवणभव

रागं: रेवगुप्ति (१५) ताळं: रूपकम्

पल्लवि

शरवणभवगुरुगुहं षण्मुखं भजेऽहं श्री

अनुपल्लवि

वरदाभयकरं शक्त्यायुधधरकरं

पुरुहूतादिसेवितं भागवतादिसन्नुतम्

चरणम्

पार्वतीकुमारं नवनन्दनादियुतधीरं

नादान्तविहारं नतभक्तजनमन्दारम्

गर्वितशूरादिहरं गणपतिसोदरं वरं

वल्लीदेवसेनानन्दकरं चतुरतरम्

◇ ◇ ◇ ◇ ◇

शरावतीतटवासिनी

रागं: शरावती (२५) ताळं: रूपकम्

पल्लवि

शरावतीतटवासिनी हंसिनी सरस्वती
विधियुवती संरक्षतु मां श्री

समष्टिचरणम्

चराचरात्मकप्रपञ्चरूपिणी शब्दार्थस्वरूपिणी ब्रह्माणी
मुरारिपुरारिगुरुगुहमोदिनी संवेदिनी
मुरळीवीणागानविनोदिनी गीर्वाणी

◇ ◇ ◇ ◇ ◇

339 shAlivATishvaram

शालिवाटीश्वरम्

रागं: देवगन्धरि (२९) ताळं: आदि

पल्लवि

शालिवाटीश्वरं भजेऽहं शालिवाटीनगरविहारं श्री

समष्टिचरणम्

शैलसुताकान्तिमतीलीलं शोकहरधीरं सुरमुनिपालं
वालिपूजितग्रीष्ममहोत्सवं विधीन्द्रादिगुरुगुहनुतवैभवम्

◇ ◇ ◇ ◇ ◇

340 shivakamIpatim

शिवकामीपतिम्

रागं: नाटकुरञ्जि (२८) ताळं: आदि

पल्लवि

शिवकामीपतिं चिन्तयाम्यहं श्रीगुरुगुहपूजितपदाम्भोरुहम्

समष्टिचरणम्

नवकाळीजितनर्तनधीरं नादबिन्दुकलारूपमनिशं

अभिनवपुरन्दरादिसनकादिसन्नुतभानुकोटिसंकाशम्

◇ ◇ ◇ ◇ ◇

341 shivakAmeshvaram

शिवकामेश्वरम्

रागं: आरभि (२९) ताळं: आदि

पल्लवि

शिवकामेश्वरं चिन्तयाम्यहं चिदानदपूजिताम्भोरुहम्

अनुपल्लवि

शिवकामेश्वरीमनोहरं श्रीगुरुगुहभक्तवशंकरम्

चरणम्

नादबिन्दुकलारूपमनिशं नटेश्वरं भानुकोटिसदृशं
नन्दितुरगारोहितं गुरुगुहमहितं चिदम्बरपुरीविलसितम्

◇ ◇ ◇ ◇ ◇

शिवकामेश्वरीम्

रागं: कल्याणि (६५) ताळं: आदि

पल्लवि

शिवकामेश्वरीं चिन्तयेऽहं शृङ्गाररससंपूर्णकरीम्

अनुपल्लवि

शिवकमेश्वरमन:प्रियकरीं शिवानन्दगुरुगुहवशंकरीम्

चरणम्

शान्तकल्याणगुणशालिनीं शान्त्यातीतकलास्वरूपिणीं
माधुर्यगानामृतमोदिनीं मदालसां हंसोल्लासिनीम्
चिदम्बरपुरीश्वरीं चिदग्निकुण्डसंभूतसकलेश्वरीम् श्री

◇ ◇ ◇ ◇ ◇

343 shivakAyArohaneshAya

शिवकायारोहणेशाय

रागं: रुद्रप्रिय (२२) ताळं: रूपकम्

पल्लवि

शिवकायारोहणेशाय नमस्ते श्री

समष्टिचरणम्

शिवराजधानिक्षेत्रस्थितवरदाभयकराय
भुवनत्रयमोहिताय भोगमोक्षवितरणाय
नीलायताक्षीमनोहराय गुरुगुहमुदिताय

◇ ◇ ◇ ◇ ◇

शृङ्गाररसमञ्जरीम्

रागं: रसमञ्जरि (७२) ताळं: रूपकम्

पल्लवि

शृङ्गाररसमञ्जरीं श्रीकामाक्षीं गौरीं
श्रितजनकल्पवल्लरीं चिन्तयेऽहम्

समष्टिचरणम्

अङ्गारकादिग्रहदोषनिवारणकरीं अनङ्गकुसुमादिशक्तिप्रियकरीं
द्विसप्ततिरागाङ्गरागमोदिनीं
मतङ्गभरतवेदिनीं मङ्गळदायिनीं
रसिकपुङ्गवगुरुगुहजननीम्

◇ ◇ ◇ ◇ ◇

345 sh.r”ngArashaktyAyuda

शृङ्गारशक्त्यायुधधर

रागं: रमामनोहरि (५२) ताळं: झम्प

पल्लवि

शृङ्गारशक्त्यायुधधरशरवणस्य
दासोऽहमनिशं धनधान्यप्रदस्य

समष्टिचरणम्

गङ्गामृतपूरितघटाभिषेकस्य
गद्यपद्यादिनुतकोमळतरपदस्य
अङ्गारकादिनवग्रहवन्दितस्य
आदिमध्यान्तरहिताप्रमेयवरस्य
जगदम्बिकादिसकलदेवतामोहित-
जननादिखेदभञ्जनचतुरतरस्य
नगराजसुतानन्दीशनवनन्द्यादि-
भक्तजनान्तःकरणानन्दगुरुगुहस्य

◇ ◇ ◇ ◇ ◇

शृङ्गारदिनवरसाङ्गी

रागं: धवळाङ्गम् (४९) ताळं: खण्ड एकम्

पल्लवि

शृङ्गारदिनवरसाङ्गीबृहदम्बालिङ्गितपुङ्गव धवळाङ्ग श्रियं देहि

समष्टिचरणम्

अङ्गारकादिविनुताङ्गजत्रिपुरारे

गङ्गाधर वृषभतुरङ्ग सत्सङ्ग भयभङ्ग गुरुगुहान्तरङ्ग श्रीमहालिङ्ग

◇ ◇ ◇ ◇ ◇

347 sheshAcalanAyakam

शेषाचलनायकम्

रागं: वराळि (३९) ताळं: रूपकम्

पल्लवि

शेषाचलनायकं भजामि विशेषफलप्रदायकम्

अनुपल्लवि

भाषारमणप्रभृत्यशेषामरनुतकौस्थुभ-
भूषालङ्कृतबहुतरवेषात्मकविग्रहम्

चरणम्

मन्दहासवदनं स्वच्छन्दहृदयसदनं
सुन्दरजितमदनं मुकुन्दं मधुसूदनं
अरविन्दपत्रनयनं गोविन्दमुरगशयनम्
सुरबृन्दसत्कृताध्ययनं नन्दनारायणं
पुरन्दरादिदिक्पालसनन्दनादिमुनिवराळि-
वन्दितमभिनवगुरुगुहनन्दितमनन्तकीर्तिम्

◇ ◇ ◇ ◇ ◇

348 shailarAjakumAri

शैलराजकुमारि

रागं: शैलदेशाक्षि (३५) ताळं: आदि

पल्लवि

शैलराजकुमारि शङ्करि शिवे पाहि मां अम्बिके

समष्टिचरणम्

शैलदेशाक्षिरागप्रिये शङ्करगुरुगुहप्रिये शुकप्रिये
कैलासवासप्रिये सुकृतप्रिये समस्तकैवल्यप्रदे

◇ ◇ ◇ ◇ ◇

शैलेश्वरम्

रागं: सुमद्युति (५७) ताळं: आदि

पल्लवि

शैलेश्वरजं भज रे रे चित्त श्रीवरदगुरुगुहमुदं वारण

समष्टिचरणम्

शैलात्मजा कामाक्षीरमणं शिवकाञ्चीसदनं मृदुगदनं

बिलद्वारान्तमध्यस्थितं बहुकीर्तितभाषारमणनुतम्

◇ ◇ ◇ ◇ ◇

शौरिविधिनुते

रागं: शङ्करामरणम् (२९) ताळं: चतुरस्र एकम्

नोट्टस्वर साहित्यम्

शौरिविधिनुते शाम्भवि ललिते शान्तेऽतीते शङ्करमुदिते
गौरि सुरहितैकाम्रपतियुते कामाक्षि मां पाहि
वीरवरविनुतचरणाम्भोजे धीरतरमलयवरहिमगिरिजे
शूरहरणगुरुगुहमातः संसारतरचरणतरकमले ॥

◇ ◇ ◇ ◇ ◇

351 shyAmaLA”ngi

श्यामळाङ्गि

रागं: श्यामळम् (५५) ताळं: आदि

पल्लवि

श्यामळाङ्गि मातङ्गि नमस्ते शङ्करि सरस्वतीविनुते

समष्टिचरणम्

नामरूपप्रपञ्चविहारिणि नारदादिमुनिहृत्सञ्चारिणि

सोमसुन्दरेशमनोरञ्जनि सुन्दरि मीनाक्षि गुरुगुहजननि

◇ ◇ ◇ ◇ ◇

श्यामळे मीनाक्षि

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

श्यामळे मीनाक्षि सुन्दरेश्वरसाक्षि
शङ्करि गुरुगुहसमुद्भवे शिवेऽव
पामरमोचिनि पङ्कजलोचनि
पद्मासनवाणीहरिलक्ष्मीविनुते शांभवि ॥

◇ ◇ ◇ ◇ ◇

353 shrI abhayAmbA

श्री अभयाम्बा
मङ्गळकृति (मणिप्रवाळम्)

रागं: श्री (२२) ताळं: आदि

पल्लवि

श्री अभयाम्बा निन्नु चिन्तिञ्चिन वारिकि
चिन्तै कवलै येल्लां तीरुमम्मा

अनुपल्लवि

हे अभयकरे वरे ईश्वरि कृपतोनु
एन्दनै रक्षिञ्च इदु नल्ल समयमम्मा

चरणम्

नी अत्यद्भुतशुभगुणमुलु विनि नीवे दिक्कनि नेर नम्मिति
नीरजाक्षि निजरूपसाक्षि नित्यानन्दगुरुगुहकटाक्षि रक्षि

◇ ◇ ◇ ◇ ◇

श्रीकमलाम्बा जयति

(नवमावरणकीर्तनम्)

रागं: आहिरि (२०) ताळं: रूपकम्

पल्लवि

श्री कमलाम्बा जयति अम्बा श्री कमलाम्बा जयति
जगदाम्बा श्री कमलाम्बा जयति
शृङ्गाररसकदम्बा मदम्बा श्री कमलाम्बा जयति
चिद्बिम्बप्रतिबिम्बेन्दुबिम्बा श्री कमलाम्बा जयति
श्रीपुरबिन्दुमध्यस्थचिन्तामणिमन्दिरस्थ-
शिवाकारमञ्चस्थितशिवकामेशाङ्कस्था

अनुपल्लवि

सूकराननाद्यर्चितमहात्रिपुरसुन्दरीं
राजराजेश्वरीं श्रीकरसर्वानन्दमय-
चक्रवासिनीं सुवासिनीं चिन्तयेऽहम्
दिवाकरशीतकिरणपावकादिविकासकरया
भीकरतापत्रयादिभेदनधुरीणतरया
पाकरिपुप्रमुखादिप्रार्थितसुकळेबरया
प्राकट्यपरापरया पालितोदयाकरया

श्रीमात्रे नमस्ते चिन्मात्रे सेवितरमाहरीशविधात्रे
वामादिशक्तिपूजितपरदेवतायाः सकलं जातम्
कामादिद्वादशभिरुपासितकादिहादिसादि-
मन्त्ररूपिण्याः प्रेमास्पदशिवगुरुगुहजनन्याम्
प्रीतियुक्तमच्चित्तं विलयतु ब्रह्ममयप्रकाशिनी
नामरूपविमर्शिनी कामकलाप्रदर्शिनी सामरस्य निदर्शिनी

◇ ◇ ◇ ◇ ◇

355 shrI kamalAmbikayA

श्रीकमलाम्बिकया

(तृतीयावरणकीर्तनम्)

रागं: शङ्कराभरणम् (२९) ताळं: रूपकम्

पल्लवि

श्रीकमलाम्बिकया कटाक्षितोऽहं

सच्चिदानन्दपरिपूर्णब्रह्मास्मि

अनुपल्लवि

पाकशासनादिसकलदेवतासेवितया

पङ्कजासनादिपञ्चकृत्यकृत्भावितया

शोकहरचतुरपदया मूकमुख्यवाक्प्रदया

कोकनदविजयपदया गुरुगुहतत्रैपदया

चरणम्

अनङ्गकुसुमाद्यष्टशक्त्याकारया

अरुणवर्णसंक्षोभणचक्राकारया

अनन्तकोट्यण्डनायकशङ्करनायिकया

अष्टवर्गात्मकगुप्ततरया वरया

अनङ्गाद्युपासितया अष्टदळाब्जस्थितया

धनुर्बाणधरकरया दयासुधासागरया

श्रीकमलाम्बिकायाम्

(सप्तमावरणकीर्तनम्)

रागं: सहान (२२) ताळं: त्रिपुट

पल्लवि

श्री कमलाम्बिकायां भक्तिं करोमि
श्रितकल्पवाटिकायां चण्डिकायां जगदम्बिकायाम्

अनुपल्लवि

राकाचन्द्रवदनायां राजीवनयनायां
पाकारिनुतचरणायां आकाशादिकिरणायाम्
ह्रींकारविपिनहरिण्यां ह्रींकारसुशरीरिण्यां
ह्रींकारतरुमञ्जर्यां ह्रींकारेश्वर्यां गौर्याम्

चरणम्

शरीरत्रयविलक्षणसुखतरस्वात्मानुभोगिन्यां
विरिञ्चिहरीशानहरिहयवेदितरहस्ययोगिन्याम्
परादिवाग्देवतारूपवशिन्यादिविभागिन्यां
चरात्मकसर्वरोगहरनिरामयराजयोगिन्याम्
करधृतवीणावादिन्यां कमलानगरविनोदिन्यां
सुरनरमुनिजनमोदिन्यां गुरुगुहवरप्रसादिन्याम्

357 shrI kamalAmbikAyAH

श्रीकमलाम्बिकायाः परम्

(पञ्चमावरणकीर्तनम्)

रागं: भैरवि (२०) ताळं: झम्प

पल्लवि

श्री कमलाम्बायाः परं नहि रे रे चित्त

क्षित्यादिशिवान्ततत्वस्वरूपिण्याः

अनुपल्लवि

श्रीकण्ठविष्णुविरिञ्चादिजनयित्र्याः

शिवात्मकविश्वकर्त्र्याः कारयित्र्याः

श्रीकरबहिर्दशारचक्रस्थित्याः सेवितभैरवीभार्गवीभारत्याः

चरणम्

नादमयसूक्ष्मरूपसर्वसिद्धिप्रदादिदशशक्त्याराधितमूर्तेः

श्रोत्रादि दशकरणात्मककुळकौळिकादिबहुविधोपासितकीर्तेः

अभेदनित्यशुद्धबुद्धमुक्तसच्चिदानन्दमयपरमाद्वैतस्फूर्तेः

आदिमध्यान्तरहिताप्रमेयगुरुगुहमोदितसर्वार्थसाधकपूर्तेः

मूलादिनवाधारव्यावृत्तदशध्वनिभेदज्ञ-

योगिबृन्दसंरक्षण्याः अनादिमायाविद्या-

कार्यकारणविनोदकरणपटुतरकटाक्षवीक्षण्याः

श्रीकमलाम्बिके अवाव

(अष्टमावरणकीर्तनम्)

रागं: घण्ट (२०) ताळं: आदि

पल्लवि

श्रीकमलाम्बिकेऽवाव शिवे करधृतशुकशारिके

अनुपल्लवि

लोकपालिनि कपालिनि शूलिनि लोकजननि
भगमालिनि सकृदालोकय मां सर्वसिद्धि-
प्रदायिके त्रिपुराम्बिके बालाम्बिके

चरणम्

सन्तप्तहेमसन्निभदेहे सदाऽखण्डैकरसप्रवाहे
सन्तापहरत्रिकोणगेहे सकामेश्वरिशक्तिसमूहे
सन्ततं मुक्तिघण्टामणिघोषायमानकवाटद्वारे
अनन्तगुरुगुहविदिते कराङ्गुलिनखोदय-
विष्णुदशावतारे अन्तःकरणेक्षुकार्मुक-
शब्दादि पञ्चतन्मात्रविशिखाऽत्यन्तरागपाश-
द्वेषाङ्कुशधरकरेऽतिरहस्ययोगिनीपरे

◇ ◇ ◇ ◇ ◇

359 shrI kamalAmbike

श्रीकमलाम्बिके

(मङ्गळ कीर्तनम्)

रागं: श्री (२२) ताळं: खण्ड एकम्

पल्लवि

श्री कमलाम्बिके शिवे पाहिमां ललिते
श्रीपतिविनुते सितासिते शिवसहिते

समष्टिचरणम्

राकाचन्द्रमुखी रक्षितकोलमुखी
रमावाणीसखी राजयोगसुखी
शाकाम्बरि शातोदरि चन्द्रकलाधरि
शङ्करि शङ्करगुरुगुहभक्तवशङ्करि
एकाक्षरि भुवनेश्वरि ईशप्रियकरि
श्रीकरि सुखकरि श्रीमहात्रिपुरसुन्दरि

◇ ◇ ◇ ◇ ◇

श्रीकन्तिमतीम्

रागं: देशीसिम्हारवम् (५८) ताळं: आदि

पल्लवि

श्रीकन्तिमतीं शङ्करयुवतीं श्रीगुरुगुहजननीं वन्देऽहम्

समष्टिचरणम्

ह्रीङ्कारबीजाकारवदनां हिरण्मयशोभासदनां
पाकशासनादिदेवविनुतां परशुरामनतहिमशैलसुताम्
शुकशौनकदिसदाराधितां शुद्धताम्रपर्णीतटस्थितां
शङ्खाद्यष्टोत्तरसहस्रकलशाभिषेकमोदां सुरहिताम्

◇ ◇ ◇ ◇ ◇

361 shrI kAlahastIsha

श्रीकालहस्तीश

रागं: हुशानि (२२) ताळं: झम्प

पल्लवि

श्रीकालहस्तीश श्रितजनावनसमीराकार

मां पाहि राजमौळे एहि

अनुपल्लवि

पाकारिविधिहरिप्राणमयकोशानिलाकाश-

भूमिसलिलाग्निप्रकाश शिव

चरणम्

ज्ञानप्रसूनाम्बिकापते भक्ताभिमान-

दक्षिणकैलासवासाभीष्टदानचतुरकराब्ज

दीनकरुणानिधे सूनशरसूदनाज्ञानहर पशुपते

ज्ञानगुरुगुहसच्चिदानन्दमयमूर्ते

हीनजातिकिरातकेन पूजितकीर्ते

◇ ◇ ◇ ◇ ◇

362 shrI k.rShANaM bhaja

श्रीकृष्णं भज मानस

रागं: तोदि (८) ताळं: आदि

पल्लवि

श्रीकृष्णं भज मानस सततं श्रितजनपरिपालं गोपालं बालम्

अनुपल्लवि

पाकशासनादिविनुतचरणं शोकमोहभयहरणं भवतरणम्

चरणम्

शङ्खचक्रगदापद्मवनमालं वेणुगानलोलं कृपालवालं
कङ्कणकेयूरमकुटमण्डितकमनीयकनकमयचेलम्
पङ्कजासनादिदेवमहितं श्रीगुरुगुहविहितं रमासहितं
पङ्कजदळनयनं वटशयनं गुरुपवनपुराधीशं लोकेशम्

◇ ◇ ◇ ◇ ◇

363 shrI k.rShNaM bhaja re

श्रीकृष्णं भज रे

रागं: रूपवति (१२) ताळं: रूपकम्

पल्लवि

श्रीकृष्णं भज रे रे मानस श्रीरूपवतीगोपस्त्रीजारम्

समष्टिचरणम्

चक्रनिवारितभास्करप्रकाशं चन्द्रशेखरगुरुगुहविश्वासं
अक्रूरवन्दितपदं अर्जुनप्रेमास्पदं
नक्रहतदन्तिवरदं नतशुकसनकनारदम्

◇ ◇ ◇ ◇ ◇

श्रीकृष्णो मां रक्षतु

रागं: नासामणि (७०) ताळं: रूपकम्

पल्लवि

श्रीकृष्णो मां रक्षतु गुरुगुहानन्दवरः

अनुपल्लवि

सकृदाराधिततोषो सकलसुरबृन्दवन्दितः

चरणम्

वसुदेवसुतो वरदो काञ्चीनगरविहारो
कंसचाणूरमर्दको कौन्तेयहितबोधको
नासामणिधरो नवनीतचोरधीरो
नवनवगोपस्त्रीरासक्रीडावेषधरो हरिः

◇ ◇ ◇ ◇ ◇

365 shrI gaNanAthaM

श्रीगणनाथं भज रे

रागं: ईशमनोहरि (२८) ताळं: रूपकम्

पल्लवि

श्रीगणनाथं भज रे चित्त पराशक्तियुतम्

अनुपल्लवि

नागयज्ञसूत्रधरं नादलयानन्दकरम्

चरणम्

आगमादिसन्नुतं अखिलदेवपूजितं
योगशालिभावितं भोगिशायिसेवितम्
रागद्वेषादिरहितरमणीयहृदयविदितं
श्रीगुरुगुहसंमुदितं चिन्मूलकमलस्थितम्

◇ ◇ ◇ ◇ ◇

श्रीगणेशात्परम्

रागं: आर्द्रदेशि (१५) ताळं: झम्प

पल्लवि

श्रीगणेशात्परं चित्त न हि रे रे

शिवादिषट्त्रिंशत्तत्वस्वरूपिणः

अनुपल्लवि

वागादिपञ्चकव्यापाररहित-

हृदायाकाशसंस्थिताद्योगिराजार्चितात्

चरणम्

मातङ्गवदनादुमारुद्रदर्शितात् भूतभौतिक-

विश्वपूजितकळेभरात् श्वेतार्कसुमधरात् स्वेतर-

विवर्जितात् पीताम्बरावृतात् ब्रह्माद्युपासितात्

भूतादिनुतपदाम्भोजाच्छिवात्मजात्

शीतांशुधरपरमशिवगुरुगुहाग्रजात्

◇ ◇ ◇ ◇ ◇

367 shrI guruguha

श्रीगुरुगुह

रागं: देवक्रिया (२८) ताळं: रूपकम्

पल्लवि

श्रीगुरुगुह तारयाशु मां शरवणभव
श्रीगुरुगुह तारयाशु मां सुरपतिश्रीपति-
रतिपतिवाक्पतिक्षितिपतिपशुपतिसेवित श्री

समष्टिचरणम्

रागादिरहितहृदयविभावितसुरमुनिपूजित
त्यागादिराजकुमार तापत्रयहर कुमार
भोगिराजविनुतपाद भूदेवक्रियामोद
योगिराजयोगभेदयुक्तमनोलयविनोद

◇ ◇ ◇ ◇ ◇

श्रीगुरुगुहमूर्ते

रागं: उदयरविचन्द्रिका (९) ताळं: रूपकम्

पल्लवि

श्रीगुरुगुहमूर्ते चिच्छक्तिस्फूर्ते
शिष्यजनावनकीर्ते सुमुहूर्ते जय

अनुपल्लवि

योगिनीहृदयप्रकाशचित्तवृत्ते
युगपद्भोगयोगप्रदाननिपुणशक्ते
आगमरहस्यतत्वानुसन्धानयुक्ते
आनन्दानुरक्ते अतिविरक्ते जय जय

चरणम्

आत्मेश्वरजीवभेदावरणनिवृत्ते
आश्रितशिष्यानुग्रहकारणप्रवृत्ते
आत्मतत्वादिशोधनसाधनसंपत्ते
आरक्तश्वेतमिश्रचरणप्रवृत्ते
आत्मकोटिभक्ते अनादिमायोत्पत्ते
अत्मानुभवसारसंतृप्ते निर्मुक्ते
आत्मोदयरविचन्द्रिकासंदीप्ते

परमात्मश्रीचिदानन्दनाथ नमस्ते जय जय

◇ ◇ ◇ ◇ ◇

श्रीगुरुगुहस्य

रागं: पूर्वि (१५) ताळं: मिश्र चापु

पल्लवि

श्रीगुरुगुहस्य दासोऽहं
नोचेत् चिद्गुरुगुह एवाहम्

अनुपल्लवि

भोगमोक्षात्मकचरणस्य भूपुरादिनवावरणस्य
योगिबृन्दान्तःकरणस्य योगपीठादिकारणस्य

चरणम्

सनकादिपूर्विकमुनिगणसन्नुतानन्दविग्रहस्य
वनजभवादिसकलसुमनोवाञ्छितार्थानुग्रहस्य
जननलयादिरूपप्रपञ्चाज्ञानकार्यनिग्रहस्य
मननध्यानसमाधिनिष्टमहानुभावहृद्गृहस्य
दिनकरकोटिविभास्वरस्य तेजोमयजगदीश्वरस्य
जनरञ्जनकरस्य वरस्य सर्वस्मात्परस्य हरस्य

◇ ◇ ◇ ◇ ◇

श्री गुरुणा पालितोऽस्मि

रागं: पाडि (१५) ताळं: रूपकम्

पल्लवि

श्री गुरुणा पालितोऽस्मि सच्चिदानन्दनाथेन

अनुपल्लवि

आगमादिसन्नुतेन अखिलविश्ववन्दितेन
त्यागराजविभातेन तापत्रयातीतेन

चरणम्

वेदान्तार्थवेद्येन विकल्परोगवैद्येन
नादामृतसुपाद्येन नवनाथेनाद्येन
सादाख्यकलाकरेण सदाशिवावतारेण
नादान्तविहारेण नवचक्राधारेण
पादाम्बुजेन परेण भेदादिविदारेण
आदिगुरुगुहवरेण कादिमतानुसारेण

◇ ◇ ◇ ◇ ◇

371 shrI tyAgarAjasya

श्रीत्यागराजस्य

रागं: रुद्रप्रिय (२२) ताळं: मिश्र चापु

पल्लवि

श्रीत्यागराजस्य भक्तो भवामि

किंचिदज्ञोऽप्यतोऽहं सर्वज्ञेवास्मि

अनुपल्लवि

कात्यायनीमोहितस्वरूपस्य कामादिवृत्तिहरणप्रतापस्य

भूत्याभरणालङ्कृतगात्रस्य बुद्धशुद्धनित्यानन्दमात्रस्य

चरणम्

अमरेशादिपूजितसायंकालस्य अतिशुद्धमद्दळादिवाद्यलीलस्य

नवनन्द्यादिभक्तजनपालस्य नतसुरासुरसंहतिजालस्य

कमलकल्हारमालस्य काञ्चनमणिमयचेलस्य

कमनीयगुरुगुहमूलस्य कमलपुरकृतलीलस्य

विमलरुद्रगणिकानर्तनविनोदभेदमोदकरस्य

कमलविडम्बनकरस्य शङ्करस्य पुरहरस्य हरस्य

◇ ◇ ◇ ◇ ◇

श्रीदक्षिणामूर्तिमीशम्

रागं: फेनद्युति (२) ताळं: आदि

पल्लवि

श्रीदक्षिणामूर्तिमीशं चित्प्रकाशं प्रणौमि

अनुपल्लवि

वेदान्तवेद्यं न्यग्रोधवृक्षमूलवासिनं
वल्लकीनादानुभवमोदममृतफेनद्युतिमन्दस्मितमुखाम्बुजम्

चरणम्

जननादिखेदभञ्जनचतुरं जगदिन्द्रजालचमत्कृतिकरं
मुनिजनादिनिखिलसंशयहरं मुद्राकरं गुरुगुहाकरम्
अनाद्यविद्यातमोभास्करं आचार्यशेखरं सुन्दरं
मनोवागगोचरं शशिधरं मौनिनं मदनहरं शङ्करम्

◇ ◇ ◇ ◇ ◇

373 shrI dakShiNAmUrtim

श्रीदक्षिणामूर्तिम्

रागं: अठाण (२८) ताळं: खण्ड एकम्

पल्लवि

श्रीदक्षिणामूर्तिं सदा चिन्तयेऽहं
सदानन्दविद्याप्रदगुरुगुहकीर्तिम्

समष्टिचरणम्

वेदान्तबोधकं विजयचिन्मुद्राङ्कं
नादान्तवेदितं निजसनकादिनुतम्
वदनारविन्दवह्निरविशशिलोचनं
वासुदेवकुमारमारहरनन्दनम्

◇ ◇ ◇ ◇ ◇

श्रीदुंदुर्गे

रागं: श्रीरञ्जनि (२२) ताळं: एकम्

पल्लवि

श्रीदुंदुर्गे शिवसंसर्गे चिद्रसवर्गे
स्थिरेहापवर्गे श्रीवनदुर्गे

अनुपल्लवि

दुन्दुभिवाद्यभेदनादविनोदिनि मोदिनि
वीणावादिनि संवेदिनि अभेदिनि
सुन्दरि श्रीरञ्जनि निरञ्जनि जय जननि

चरणम्

करुणारसालये कलिकल्मषविलये
करविधृतकुवलये काननिलये
चरणकिसलये चामीकरवलये
स्वरसङ्गीतलये सुरुचिरमलये
गुरुगुहोदये सदये विजये अभये
सरसमये षट्समये समये कलये

◇ ◇ ◇ ◇ ◇

375 shrI nAdasodarIm

श्रीनाथसोदरीम्

रागं: नभोमणि (४०) ताळं: रूपकम्

पल्लवि

श्रीनाथसोदरीं तिरस्करिणीं नमामि

अनुपल्लवि

पानपात्रधारिणीं परदेवताराधिनीम्

चरणम्

दीनदेवरक्षिणीं दिव्यरथसञ्चारिणीं
धनधान्यप्रदायिनीं दृढसेनादिभञ्जनीम्
उन्नतवाग्विलासिनीं ऊर्ध्वाम्नायतोषिणीं
गानामृतानन्दिनीं गुरुगुहनुतनभोमणीम्

◇ ◇ ◇ ◇ ◇

श्रीनाथादिगुरुगुहो

रागं: मायामाळवगौळ (१५) ताळं: आदि

पल्लवि

श्रीनाथादिगुरुगुहो जयति जयति
श्रीचिदानन्दनाथोऽहमिति सन्ततं हृदिनि भज

अनुपल्लवि

नानाप्रपञ्चविचित्रकरो नामरूपपञ्चभूताकरो
अज्ञानध्वान्तप्रचण्डभास्करो ज्ञानप्रदायको महेश्वरो
दीनावनोद्युक्तदिव्यतरो दिव्यौघादिसकलदेहधरो
मानसानन्दकरचतुरतरो मद्गुरुवरो मङ्गळं करोतु

चरणम्

मायामयविश्वाधिष्टानो मात्मककादिमदानुष्टानो
मालिनीमण्डलान्तविधानो मन्त्राद्यजपाहंसध्यानो
मायाकार्यकलनाहीनो मामकसहस्रकमलासीनो
माधुर्यगानामृतपानो माधवाद्यभयवरप्रदानो
मायाशबळितब्रह्मरूपो मारकोटिसुन्दरस्वरूपो
मतिमतां हृदयगोपुरदीपो मत्तशूरादिजयप्रतापो
मायामाळवगौळादिदेशमहीपतिपूजितपदप्रदेश

माधवाद्यमरबृन्दप्रकाशमहेशस्य महार्थोपदेशः

◇ ◇ ◇ ◇ ◇

377 shrI nIlotpalanAyike

श्रीनीलोत्पलनायिके

रागं: नारीरीतिगौळ (२०) ताळं: रूपकम्

पल्लवि

श्रीनीलोत्पलनायिके जगदम्बिके
श्रीनगरनायिके मामव वरदायिके

अनुपल्लवि

दीनजनार्तिप्रभञ्जनरीतिगौरवे
देशिकप्रदर्शितचिद्रूपिणि नतभैरवे
आनन्दात्मानुभवे अद्रिराजसमुद्भवे
सूनशरारिवैभवे ज्ञानसुधार्णवे शिवे

चरणम्

संकल्पविकल्पात्मकचित्तवृत्तिजाले
साधुजनाराधितसद्गुरुकटाक्षमूले
संकटहरधुरीणतरगुरुगुहानुकूले
सामस्तविश्वोत्पत्तिस्थितिलयादिकाले
विटङ्कत्यागराजमोहितविचित्रलीले
शङ्करि कृपालवाले हाटकमयचेले
पङ्कजनयनविशाले पद्मरागमणिमाले

◇ ◇ ◇ ◇ ◇

378 shrI pArthasArathinA

श्री पार्थसारथिना

रागं: शुद्धधन्याशि (२२) ताळं: रूपकम्

पल्लवि

श्री पार्थसारथिना पालितोऽस्म्यहं सदा

समष्टिचरणम्

गोपस्त्रीमोहितवेणुगानेन श्रीरुक्मिणीमनोल्लासकरणेन

प्रपञ्चादिहरदाननिपुणवैकुण्ठस्थितेन

तुम्बुरुनारदनुतेन गुरुगुहसंमोदितेन

◇ ◇ ◇ ◇ ◇

379 shrI pArvatIparameshvarau

श्रीपार्वतीपरमेश्वरौ

रागं: बौळि (१५) ताळं: आदि

पल्लवि

श्रीपार्वतीपरमेश्वरौ वन्दे
चिद्बिम्बौ लीलाविग्रहौ ममाभीष्टसिद्धये

समष्टिचरणम्

आपादमस्तकालङ्कारौ आदिमध्यान्तरहिताकारौ
सोपानमार्गमुख्याधारौ सुखप्रदौ गन्धरसाधरौ
लोपामुद्रेशार्चितचरणौ लोभमोहादिवारणकरणौ
पापापहपण्डिततरगुरुगुहकरणौ भयहरणौ भवतरणौ

◇ ◇ ◇ ◇ ◇

श्रीबालसुब्रह्मण्य

रागं: बिलहरि (२९) ताळं: मिश्र चापु

पल्लवि

श्रीबालसुब्रह्मण्यागच्छाग्रगण्य श्रीचिदानन्दनाथ वरेण्य

अनुपल्लवि

आबालगोपालविदित दीनशरण्य आत्मप्रकाशलावण्यकारुण्य

चरणम्

सनकादिसन्नुत स्वामिनाथ स्वामिशैलस्थित सोमतात
कनकवल्लीदेवसेनोपेत कैवल्यदातस्सकृद्विभातः
वनजवदन पदपङ्केरुह वरदाश्रितकल्पमहीरुह
मनसिजसनकादिसेवित कुमार धीरतर हर गुरुगुह

◇ ◇ ◇ ◇ ◇

381 shrI bhArgavI

श्री भार्गवी

रागं: मङ्गळकैशिकी (१५) ताळं: चापु

पल्लवि

श्रीभार्गवी भद्रं मे दिशतु श्रीरङ्गधामेश्वरी

अनुपल्लवि

सौभाग्यलक्ष्मी सततं मामवतु
सकललोकजननी विष्णुमोहिनी

चरणम्

मदनगुरुमानिनी मम मनसि तिष्ठतु
मधुकरविजयमङ्गळकैशिका निवसतु
सदनमध्ये महालक्ष्मी सदा विहरतु
सामजहेमकुम्भस्नापिता विजयतु
पदनयनाननकरनलिनी परमपुरुषहरिप्रणयिनी
वदनकमलगुरुगुहधरणीश्वरनुतरङ्गनाथरमणी

◇ ◇ ◇ ◇ ◇

श्रीमङ्गळाम्बिकाम्

रागं: घण्ट (२०) ताळं: झम्प

पल्लवि

श्रीमङ्गळाम्बिकां चिद्गगनचन्द्रिकां
चिन्तयेऽहं सदाशिवनायिकाम्

अनुपल्लवि

नामरूपात्मिकां नवरत्नमालिकां
हेमवर्णशुकां हिमशैलबालिकाम्

चरणम्

कनककलशसुशंखघण्टादि-
पूजोपकरणामरुणकिरणकान्तियुतचरणां
मनुचन्द्रवैश्रवणमदनाद्युपासितां
महदादिकुम्भेशमानसोल्लासिताम्
मननध्याननिरतमहापुरुषगुरुगुहविनुतां
विधिविहितां वीरादिसेवितां
वनजासनप्रभृतिवाञ्छितफलप्रदां
वनमालिसोदरीं वरत्रिपुरसुन्दरीम्

◇ ◇ ◇ ◇ ◇

383 shrI ma”ngaLAmbike

श्रीमङ्गळामिबिके

रागं: कल्याणि (६५) ताळं: अट

पल्लवि

श्री मङ्गळामिबिके श्रीवाञ्छीशनायिके
चिन्तितार्थदायिके श्रीशिवे संरक्ष मम्

समष्टिचरणम्

सोमविडम्बनसुन्दरवदने सुरनरमुनिगणसुखकरनयने
कोमळतरगुरुगुहनुतचरणे कोटिसूर्यप्रकाशकोटीराद्याभरणे
श्यामळकोलवदनादिशक्तिसंयुतचक्रभरणे
कामेश्वरि कचविजितघने कल्याणि चिदानन्तघने
कामकले कम्बुजयुगळे करकमले सकलनिष्कले

◇ ◇ ◇ ◇ ◇

384 shrI madhurApurivihAriNi

श्रीमधुरापुरिविहारिणि

रागं: बिलहरि (२९) ताळं: रूपकम्

पल्लवि

श्रीमधुरापुरिविहारिणि श्रीराजमातङ्गि मां पाहि

अनुपल्लवि

पामरजनपालिनि कामदहनमोहिनि

नामरूपविमर्शिनि नटेश्वरि जगज्जननि

चरणम्

पाण्ड्यराजपूजितब्जपदयुगळे

ओड्याणपीठस्थितसकलकळे

पाटलीकुसुमप्रिये पद्मरागसमप्रभे

सोमसुन्दरेश्वरप्रिये गुरुगुहसमुद्भवे

◇ ◇ ◇ ◇ ◇

385 shrI madhurAMbikayA

श्रीमधुराम्बिकया

रागं: अठाण (२८) ताळं: चापु

पल्लवि

श्रीमधुराम्बिकया रक्षितोऽहं सदानन्दकर्या

अनुपल्लवि

सोमसुन्दरेश्वरमनोल्लासकर्या

कामसञ्जीवनौषधकर्या सामगानसुखकर्या

चरणम्

नामरूपविवर्जितया नामपारायणप्रियया

समयाचारप्रवृत्तया शङ्करगुरुगुहमोदितया

◇ ◇ ◇ ◇ ◇

श्रीमधुराम्बिके

रागं: कल्याणि (६५) ताळं: खण्ड चापु

पल्लवि

श्रीमधुराम्बिके श्रीशिवेऽवाव

अनुपल्लवि

सोमसुन्दरेश्वरहृदयविलासिनि
कामगिरिपीठादिवासिनि कल्याणि

चरणम्

कादिहादिसादिमन्त्ररूपिणि कौळिनि
कैवल्यदायिनि गुरुगुहजननि
कदम्बकाननविलासिनि कात्यायनि
मधुरवाणि शुकपाणि अळिवेणि

◇ ◇ ◇ ◇ ◇

387 shrI mahAgaNapatiravatu

श्रीमहागणपतिरवतु माम्

रागं: गौळ (१५) ताळं: तिस्र त्रिपुट

पल्लवि

श्रीमहागणपतिरवतु मां
सिद्धिविनायको मातङ्गमुखः श्री

अनुपल्लवि

कामजनकविधीन्द्रसन्नुतकमलालयतटनिवासो
कोमळतरपल्लवपदकरगुरुगुहाग्रजः शिवात्मजः

चरणम्

सुवर्णाकर्षणविघ्नराजो पादाम्बुजो गौरवर्णवसनधरो फालचन्द्रो
नरादिविनुतलम्बोदरो कुवलयस्वविषाणपाशाङ्कुश-
मोदकप्रकाशकरो भवजलधिनावो
मूलप्रकृतिस्वभावस्सुखतरो
रविसहस्रसन्निभदेहो कविजननुत मूषिकवाहो
अवनतदेवतासमूहो अविनाशिकैवल्यगेहो श्री

◇ ◇ ◇ ◇ ◇

श्रीमहाराज्ञि

रागं: कर्णाटक कापि (२२) ताळं: खण्ड एकम्

पल्लवि

श्रीमहाराज्ञि शिवगुरुगुहन् ताये मामव

अनुपल्लवि

कामेश्वरवामाङ्गस्ते करुणानिधे

पामरजनुलनु पालनं चेय्किर ललिते

चरणम्

विधविधशक्तिकळुटन् वेडलियुद्धरङ्गमुलो

प्रदमुसेयु दैत्यादिहत निपुणधीरे

◇ ◇ ◇ ◇ ◇

389 shrI mAtaH shivavAmA"nke

श्रीमातः शिववामाङ्के

रागं: बेगड (२९) ताळं: आदि

पल्लवि

श्रीमातः शिववामाङ्के श्रीचक्ररूपताटङ्के मामव

अनुपल्लवि

श्रीमहाराज्ञि वदनशशाङ्के चित्प्रतिबिम्बे गळजितशङ्खे
मामव वरप्रदायिके कुसुमसायके अखिलाण्डनयिके

चरणम्

रमाभारतीरतिशचीशाराधितपदयुगळे बगळे
ममाभीष्टफलदानचतुरकोमळश्यामळे सकलनिष्कळे
प्रमातृप्रमाणप्रमेयप्रपञ्चप्रकाशकरतरविरळे
समानाधिकरहिते स्वपूजितसाधुजनानामतिसरळे
यमाद्यष्टाङ्गयोगनिरतसंयमिध्येयहृत्कमले विमले
हिमाद्रिजामातृजम्बूपतिसहिते कुशले गुरुगुहवत्सले श्री

◇ ◇ ◇ ◇ ◇

श्रीमातृभूतम्

रागं: कन्नड (२८) ताळं: मिश्र चापु

पल्लवि

श्रीमातृभूतं त्रिशिरगिरिनाथं हृदि चिन्तये
सुगन्धिकुन्तळाम्बासमेतम्

अनुपल्लवि

सोमसखं नतशुकसनकं नळकामादिविजयकमनीयाङ्गं
सोमं शिरोधृतसूर्यगङ्गं कोमलकरधृतकुरङ्गं
गुरुगुहान्तरङ्गलिङ्गम्

चरणम्

वासवादिदेववन्दितचरणं वैश्यजातिस्त्रीवेषधरणं
वासुदेवमहितं भवतरणं वासनादिरहितान्तःकरणम्
दरहासत्रिपुरादिहरणं वासुकिप्रमुखाभरणं
भासमाननवावरणं दासजनसन्तोषकरणम्
सुवासितनवजवन्तिपुष्पविकासप्रियहृदयं सदयं
मासवर्षपक्षोत्सवविभवम् सदाशिवं परमशिवम्

◇ ◇ ◇ ◇ ◇

391 shrI mInAmbikAyAH

श्रीमीनाम्बिकायाः

रागं: देवगान्धारि (२९) ताळं: रूपकम्

पल्लवि

श्रीमीनाम्बिकायाः परं नहि रे रे चित्त

नित्यकामेश्वर्याराधितपरदेव्याः

अनुपल्लवि

सोमसुन्दरेश्वरमोहिन्याः

मलयध्वजपाण्ड्यराजप्रणतशरण्यायाः

नामरूपपारायणप्रियराजयोगिन्याः

चरणम्

नादबिन्दुकलास्पदरूपिण्याः नवरत्नवीणावादिन्याः

श्रीदेवगान्धारपूजिताम्बुजासिन्याः

कदम्बवनविलासिन्याः गुरुगुहजनन्याः

◇ ◇ ◇ ◇ ◇

श्रीमीनाक्षि गौरि

रागं: गौरि (१५) ताळं: रूपकम्

पल्लवि

श्रीमीनाक्षि गौरि राजश्यामळे
आश्रितरक्षणधुरीणतरलघुश्यामळे सकले
शृङ्गारकामकले श्रियं देहि मां पाहि

समष्टिचरणम्

भूमिजलाग्न्यनिलगगनभूतपञ्चकाधारे
स्वामिनि सोमसुन्दरेश्वरमोहिताकारे
कामितफलप्रदायककदम्बविपिनागारे
भूमिपालनुतगुरुगुहपूजितमुक्ताहारे
कोमलतरपदयुगले गुच्छजयस्तनयुगले
तामरसचरणयुगले तत्वंपदार्थयुगले

◇ ◇ ◇ ◇ ◇

393 shrI mUlAdhAra

श्रीमूलाधारचक्रविनायक

रागं: श्री (२२) ताळं: आदि

पल्लवि

श्रीमूलाधारचक्रविनायक अमूल्यवरप्रदायक

अनुपल्लवि

मूलाज्ञानशोकविनाशक मूलकन्दमुक्तिप्रदायक

चरणम्

सकळीकृतदेवादिदेव शबळीकृतसर्वज्ञस्वभाव
प्रकटीकृतवैखरीस्वभाव पराभव प्रसिद्धगजग्रीव
विकट षट्शतश्वासाधिकार विचित्राकार भक्तोपकार
अकळङ्कविभास्वर विघ्नेश्वर हरगुरुगुहसोदर लम्बोदर

◇ ◇ ◇ ◇ ◇

श्रीरङ्गनाथाय

रागं: धन्याशि (२०) ताळं: रूपकम्

पल्लवि

श्रीरङ्गनाथाय नमस्ते नमस्ते

समष्टिचरणम्

श्रीरङ्गपुरिविलसितश्रीरमान्तरङ्गाय
श्रीरङ्गनायकीसमेताय गुरुगुहनुताय

◇ ◇ ◇ ◇ ◇

395 shrI ramAsarasvatI

श्री रमासरस्वती

रागं: नासामणि (७०) ताळं: आदि

पल्लवि

श्रीरमासरस्वतीसेवितां श्री ललिताम्बां भावये

अनुपल्लवि

तारसदृशनासामणीविराजितां संपत्करीसेवितां
तारामन्त्रिण्यादिपरिवृतां धीरगुगुहविनतां शिवयुताम्

◇ ◇ ◇ ◇ ◇

श्रीराजगोपाल

रागं: सावेरि (१५) ताळं: आदि

पल्लवि

श्रीराजगोपाल बाल शृङ्गारलील श्रितजनपाल

अनुपल्लवि

धीराग्रगण्य दीनशरण्य चारुचम्पकारण्य
दक्षिणद्वारकापुरिनिलय विशिष्टाद्वैताद्वैतालय मां पालय

चरणम्

स्मेरानन सेवकचतुरानन नारायण
तारकदिव्यनामपारायणकृतनारदादिनुत सारसपद
सदामोद नारीवेषधर वामभाग मुरारे श्रीविद्याराज हरे
श्रीरुक्मिणीसत्यभामश्रितपार्श्वयुगळ कम्बुजयगल
नीरसंपूर्णहरिद्रानदीतीरमहोत्सववैभव माधव मारजनक
नतशुकसनकजनक वीर गुरुगुहमहित रमासहित

◇ ◇ ◇ ◇ ◇

397 shrI rAjarAjeshvari

श्रीराजराजेश्वरि

रागं: पूर्णचन्द्रिक (२९) ताळं: आदि

पल्लवि

श्री राजराजेश्वरि त्रिपुरसुन्दरि शिवे पाहि मां वरदे

अनुपल्लवि

नीरजासनादिपूजितपरे निखिलसंशयहरणनिपुणतरे

चरणम्

शौरिविरिञ्चादिविनुते सकळे शङ्करप्राणवल्लभे कमले
निरतिशयसुखप्रदे निष्कळे पूर्णचन्द्रिकाशीतले विमले
परमाद्वैतबोधिते ललिते प्रपञ्चातीतगुरुगुहमहिते
सुरुचिरनवरत्नपीठस्थे सुखतरप्रवृत्ते सुमनस्थे

◇ ◇ ◇ ◇ ◇

श्रीराजराजेश्वरीम्

रागं: मध्यमावति (२२) ताळं: रूपकम्

पल्लवि

श्रीराजराजेश्वरीं महात्रिपुरसुन्दरीं
ललिताभट्टारिकां भजेऽहं भजे
विदेहकैवल्यं आशु एहि देहि मां पाहि

समष्टिचरणम्

आराधयामि सततं गं गणपतिं सौः शरवणं
अं आं सौः त्रैलोक्यं ऐं क्लीं सौः सर्वाशां
ह्रीं क्लीं सौः संक्षोभणं हैं ह्स्क्लीं ह्सौः सौभाग्यं
ह्सैं ह्स्क्लीं ह्सौः सर्वार्थं ह्रीं क्लीं ब्लें सर्वरक्षां
ह्रीं श्रीं सौः रोगहरं ह्स्रैं ह्स्क्लीं ह्स्रौः सर्वसिद्धिं
क ए इ ल ह्रीं ह स क ह ल ह्रीं सकल ह्रीं श्रीं सर्वानन्दं
श्रीनाथानन्दगुरुगुहपादुकां पूजये सदा
चिदानदनाथोऽहं कामेश्वराङ्कनिलयां
वैश्रवणविनुतधनिनीं गणपतिगुरुगुहजननीं
निरतिशयशुभमङ्गळां मङ्गळां जय मङ्गळां श्री

◇ ◇ ◇ ◇ ◇

399 shrI rAmacandro

श्रीरामचन्द्रो

रागं: श्रीरञ्जनि (२२) ताळं: चापु

पल्लवि

श्रीरामचन्द्रो रक्षतु मां राक्षसादिहरो रघुवरः

अनुपल्लवि

भरताग्रजः कौशिकयागरक्षकः ताटकान्तकः

चरणम्

मिथिलानगरप्रवेशमहेश्वरधनुर्भेदको
सीताकल्याणमहोत्सववैभवयुतचित्रवेषको
माधुर्यगानामृतपानप्रियगुरुगुहविश्वासो
महादेवीभक्तपरशुरामगर्वहरोल्लासः

◇ ◇ ◇ ◇ ◇

श्रीरामं रविकुलाब्धिसोमम्

रागं: नारायणगौळ (२८) ताळं: आदि

पल्लवि

श्रीरामं रविकुलाब्धिसोमं श्रितकल्पभूरुहं भजेऽहम्

अनुपल्लवि

धीराग्रगण्यं वरेण्यं दीनजनाधारं रघुवीरं
नारदादिसन्नुतरामायणपारायणमुदितनारायणम्

चरणम्

दशरथात्मजं लक्ष्मणाग्रजं दानवकुलभीकरं श्रीकरं
कुशलवतातं सीतोपेतं कुवलयनयनं सुदर्भशयनम्
सुशरचापपाणिं सुधीमणिं सूनृतभाषं गुरुगुहतोषं
दशवदनभञ्जनं निरञ्जनं दाननिधिं दयारसजलनिधिम्

◇ ◇ ◇ ◇ ◇

401 shrI lakShmIvarAham

श्रीलक्ष्मीवराहम्

रागं: आभोगि (२२) ताळं: आदि

पल्लवि

श्रीलक्ष्मीवराहं भजेऽहं श्रीलक्ष्मीसहितं श्रितजनशुभप्रदम्

अनुपल्लवि

नीलमेघजयश्यामळगात्रं नीळाभूदेवीस्तुतिपात्रं
नीलकण्ठशिवगुरुगुहमित्रं निखिलभक्तजनभयार्तिदात्रम्

चरणम्

मङ्गळालयाभोगिनुतपदं पुङ्गवबुधजननतं वेदनुतं
शङ्करप्रियकरं कुबेरप्रतिष्ठितं शङ्खचक्रधरं कृपाकरम्
पङ्कजासनप्रमुखसेवितं पङ्कजमुखभार्गवीभावितं
भङ्गहरताम्रपर्णीतीरस्थं सङ्कटहरसदानन्दसहितम्

◇ ◇ ◇ ◇ ◇

श्रीवटुकनाथ

रागं: देवक्रिय (२८) ताळं: मिश्र चापु

पल्लवि

श्रीवटुकनाथ शिवसंजात जीवदयाकर डमरुभास्वर देव

अनुपल्लवि

देवदेवक्रियाशक्तिसहित भक्तविहित

भूवलयरक्षणविचक्षण भूतवेताळादिरक्षण

चरणम्

कालकालभैरव ब्रह्मकपालशूलधर

फालनयन क्षेत्रपाल सद्गुणशील भयंकर

ज्वालामुखहालाहलमूलाशनकोलाहल

नीलकण्ठ सुबालगुरुगुहलोल लीलाजाल पालय

◇ ◇ ◇ ◇ ◇

403 shrI varalakShmi

श्री वरलक्ष्मि नमस्तुभ्यम्

रागं: श्री (२२) ताळं: रूपकम्

पल्लवि

श्री वरलक्ष्मि नमस्तुभ्यं वसुप्रदे
श्रीसारसपदे रसपदे सपदे पदे

अनुपल्लवि

भावजजनकप्राणवल्लभे सुवर्णाभे
भानुकोटिसमानप्रभे भक्तसुलभे
सेवकजनपालिन्यै श्रितपङ्कजमालिन्यै
केवलगुणशालिन्यै केशवहृत्खेलिन्यै

चरणम्

श्रावणपौर्णमीपूर्वस्थशुक्रवारे
चारुमतीप्रभृतिभिः पूजिताकारे
देवादिगुरुगुहसमर्पितमणिमयहारे
दीनजनसंरक्षणनिपुणकनकधारे
भावनाभेदचतुरे भारतीसन्नुतवरे
कैवल्यवितरणपरे काङ्क्षितफलप्रदकरे

◇ ◇ ◇ ◇ ◇

श्रीवल्मीकलिङ्गम्

रागं: काम्भोजि (२८) ताळं: अट

पल्लवि

श्रीवल्मीकलिङ्गं चिन्तये शिवार्धाङ्गं चिन्तये

अनुपल्लवि

श्रीवरदायकं श्रीपुरनायकं
देवतादिविनुतदिव्यवीथीविटङ्गम्

चरणम्

कुरुक्षेत्रविरिञ्चियज्ञोद्भवकार्मुकधरमुररिपु-
हतहरिहयाद्यखिलासुरभयोपद्रवहरणचणतरं
शङ्करं सोमकुलाम्बिकाम्भोजमधुकरम्
गुरुगुहजनकं नतजनकं कुबेरसखं चर्मांशुकं
सुरुचिरशिरोधृतशशाङ्कं स्वयंप्रकाशकं तारकम्

◇ ◇ ◇ ◇ ◇

405 shrI vAñchanAtham

श्रीवाञ्छनाथम्

रागं: सुरटि (२८) ताळं: अदि

पल्लवि

श्रीवाञ्छनाथं भजेऽहं श्रीमङ्गळाम्बिकासमेतम्

अनुपल्लवि

श्रीवाणीशादिपूजितपदं श्रीकरकाश्याधिकफलप्रदं
जीवेशजगद्भेदापहं जीवन्मुक्तिविदेहमुक्तिदम्

चरणम्

शीतकिरणरविपावकनेत्रं श्रीगन्धारण्यक्षेत्रं
विभूतिरुद्राक्षाभरणगात्रं भूकैलासस्थितिपात्रम्
निर्धूतपापासीनभैरवं धूर्जटिमादित्यवारोत्सवं
वीतिहोत्रमृगधरं परशिवं विघ्नेश्वरगुरुगुहसमुद्भवम्
भूतपतिं भवसागरनावं भूसुरटीकादीडितभावं
पातकहरणनिपुणमुनितीर्थप्रभावं प्रकृतिस्वभावम्

◇ ◇ ◇ ◇ ◇

श्रीविद्याराजगोपालम्

रागं: जगन्मोहनम् (३८) ताळं: तिश्र एकम्

पल्लवि

श्रीविद्याराजगोपालं भजेऽहं

श्रीरुक्मिणीसत्यभामासहितदिव्यदेहम्

समष्टिचरणम्

जीवेशजगन्मोहिनीरूपं नतगोपं श्रितमन्दारं

धात्रंशस्वरूपावतारं गोविन्दमिन्दुवदनं

गुरुगुहनुतमृदुगदनं देवकीनन्दनं वसुदेवहृदयचन्दनम्

◇ ◇ ◇ ◇ ◇

407 shrI vishvanAthaM bhajeham

श्री विश्वनथं भजेऽहम्
चतुर्दश रागमालिका ताळं: आदि

पल्लवि

श्री रागः

श्री विश्वनाथं भजेऽहं चतुर्दशभुवनरूप-

रागमालिकाभरणधरणान्तःकरणम्

चरणानि

अरभि रागः

श्रितजनसंसारभीत्यापहं आध्यात्मिकादि-

तापत्रय मनोभीत्यापहम्

गौरि रागः

श्री विशालाक्षीगौरीशं सकलनिष्कळरूप-

सच्चिदानन्दमयगौरीशम्

नाट रागः

चित्रविश्वनाटकप्रकाशं जगत्प्रकाशक

भास्करशशाङ्कोटिकोटिप्रकाशम्

गौळ रागः

विजयभसितोद्धूळितगौळाङ्गम्

मोहन रागः

गुरुगुहसंमोहनकरलिङ्गं पञ्चीकृतपञ्चमहाभूत-

प्रपञ्चादिमोहनकरलिङ्गम्

विलोमम्

मोहन रागः

विरिञ्चिविष्णुरुद्रमूर्तिमयं

गौळ रागः

विषयपञ्चकरहितमभयं

नाट रागः

निरतिशयसुखदनिपुणतरं

गौरि रागः

निगमसारमीश्वरममरं

आरभि रागः

स्मरहरं परमशिवमतुलं

श्री रागः

सरससदयहृदयनिलयमनिशं

श्री विश्वनाथं भजेऽहम्

साम रागः

सदाशिवं सामगानविनुतं प्रकृत्यादिसप्तरूप-

सामगानविनुतम्

ललित रागः

सन्मात्रं ललितहृदयविदितं कामक्रोधादिरहित-

ललितहृदयविदितम्

भैरव रागः

चिदाकाशभैरवं पुरहरं विधिकपाल-

त्रिशूलधरभैरवं पुरहरम्

सारङ्ग रागः

चित्सभेश्वरं सारङ्गधरं दारुकावनतपोधन-

कल्पितसारङ्गधरम्

शङ्कराभरण रागः

सदाश्रयामि शङ्कराभरणं चिन्तितार्थवितरण-

धुरीणतरमाणिक्यमयशङ्कराभरणम्

काम्भोजि रागः

सद्गतिदायकाम्भोजचरणं धर्मार्थादिनिखिल-

पुरुषार्थप्रदसमर्थतराम्भोजचरणम्

देवक्रिय रागः

वदान्यदेवक्रियाखेलनं सृष्टिस्थितिविलय-

भूपाळ रागः

वैद्यलिङ्गभूपालपालनं श्रीपुरनिऋतिभाग-

गर्ततीरस्थिरतरभूपालपालनम्

विलोमम्

भूपाळ रागः

गुरुगणेशसुरनरेशमनिशं

देवक्रिय रागः

कुजबुधादिग्रहगतिविहितं

काम्भोजि रागः

वरदमनलरविशशिनयनं

शङ्कराभरण रागः

वनजचन्द्रसन्निभवदनं

सारङ्ग रागः

परमहम्सानन्दनर्तनं

भैरव रागः

पतितपावनकरणमघहरणं

ललिता रागः

परतरं परममनोलयजयं

साम रागः

परादिवाक्प्रकाशानन्दमयं

मोहन रागः

विरिञ्चिविष्णुरुद्रमूर्तिमयं

गौळ रागः

विषयपञ्चकरहितमभयं

नाट रागः

निरतिशयसुखदनिपुणतरं

गौरि रागः

निगमसारमीश्वरममरं

आरभि रागः

स्मरहरं परमशिवमतुलं

श्री रागः

सरससदयहृदयनिलयमनिशं

श्री विश्वनाथं भजेऽहम्

◇ ◇ ◇ ◇ ◇

श्रीवेङ्कटगिरीशम्

रागं: सुरटि (२८) ताळं: आदि

पल्लवि

श्रीवेङ्कटगिरीशमालोकये विनायकतुरगारूढम्

अनुपल्लवि

देवेशपूजितभगवन्तं दिनकरकोटिप्रकाशवन्तं
गोविन्दं नतभूसुरबृन्दं गुरुगुहानन्दं मुकुन्दम्

चरणम्

अलमेलुमङ्गासमेतं अनन्तपद्मनाभमतीतं
कलियुगप्रत्यक्षविभातं कञ्जजादिदेवोपेतम्
जलधरसन्निभसुन्दरगात्रं जलरुहमित्राब्जशत्रुनेत्रं
कलुषापहगोकर्णक्षेत्रं करुणारसपात्रं चिन्मात्रम्

◇ ◇ ◇ ◇ ◇

409 shrI veNugopAla

श्रीवेणुगोपाल

रागं: कुरञ्जि (२९) ताळं: झम्प

पल्लवि

श्रीवेणुगोपाल श्रीरुक्मिणीलोल
देवनायक श्रियं देहि देहि मधुमुरहर

अनुपल्लवि

देवकीसुकुमार दीनजनमन्दार
गोवर्धनोद्धार गोपयुवतीजार

चरणम्

गोकुलाम्बुधिसोम गोविन्द नतभौम
श्रीकुरञ्जितकाम श्रितसत्यभाम
कोकनदपदसोम गुरुगुहहित श्याम
श्रीकरतपहोम श्रीजयन्तीनाम
प्राकव्यरणभीम पालितार्जुनभीम
पाकरिपुनुतनाम भक्तयोगक्षेम

◇ ◇ ◇ ◇ ◇

श्री वेणुगोपालम्

रागं: शङ्कराभरणम् (२९) ताळं: रूपकम्

पल्लवि

श्री वेणुगोपालं भज मानस सततं
देवेन्द्रपूजितं दिव्यरत्नभूषितम्

अनुपल्लवि

वेदागमघोषितं विधिगुरुगुहमहितं
नन्दगोपकुमारं नवनीतचोरम्

चरणम्

गोवर्धनगिरिधरं गोपस्त्रीजारं
मन्दहासवदनं मुकुन्दं मधुसूदनं
देवकीनन्दनं मृदुचरणं नीरजनयनम्

◇ ◇ ◇ ◇ ◇

411 shrI vaidyanAtham

श्रीवैद्यनाथम्

रागं: अठाण (२८) ताळं: आदि

पल्लवि

श्रीवैद्यनाथं भजामि श्रितजनवन्दितबालाम्बिकेशम्

अनुपल्लवि

धवळितवैद्यनाथक्षेत्रं दयासुधासागरं त्रिनेत्रं

अविनाशकैवल्यादिप्रदं आनन्दकरमूलादिप्रदम्

चरणम्

देवराजादिपूजितपदं दिव्याम्बरधरगुरुगुहमुदं

कविजनादिनुतसोमास्कन्दं कमनीयनादबिन्दुकलास्पदम्

◇ ◇ ◇ ◇ ◇

श्री शुक्रभगवन्तम्

रागं: परजु (१५) ताळं: अट

पल्लवि

श्रीशुक्रभगवन्तं चिन्तयामि सन्ततं सकलतत्त्वज्ञम्

अनुपल्लवि

हे शुक्रभगवन् मां आशु पालय वृषतुलाधीश दैत्यहितोपदेश
केशवकटाक्षैकनेत्रं किरीटधरं धवलगात्रम्

चरणम्

विंशतिवत्सरोड्डदशाविभागमष्टवर्गं
कविं कळत्रकारकं रविनिर्जरगुरुवैरिणं
नवांशहोरादे्रक्काणादिवर्गोत्तमावसरसमये
वक्रोच्चनीचस्वक्षेत्रवरकेन्द्रमूलत्रिकोणे
त्रिंशांशषष्ट्यांशैरावतांशपारिजातांशगोपुरांश-
राजयोगकारकं राज्यप्रदं गुरुगुहमुदम्

◇ ◇ ◇ ◇ ◇

413 shrI shUlinIm

श्री शूलिनीम्

रागं: शैलदेसाक्षि (३५) ताळं: आदि

पल्लवि

श्री शूलिनीं श्रितपालिनीं जीवैश्वर्यैक्यशालिनीं स्मर
चित्त ब्रह्मकपालिनीं शिवचिन्मालिनीं भवखेलिनीम्

समष्टिचरणम्

पाशिनीं शरभेश्वरहृदयावेशिनीं अज्ञानध्वान्तविनाशिनीं
रविचन्द्रतेजःप्रकाशिनीं विन्ध्यानिवासिनीम्
ईशगुरुगुहविश्वासिनीं ईश्वरीं भक्तमनोल्लासिनीं
श्रीशनुतां भवभयध्वंसिनीं सिंहवाहिनीं जगन्मोहिनीम्

◇ ◇ ◇ ◇ ◇

414 shrI satyanArAyaNam

श्रीसत्यनारायणम्

रागं: शिवपन्तुवराळि (४५) ताळं: रूपकम्

पल्लवि

श्रीसत्यनारायणमुपास्महे नित्यं
सत्यज्ञानानन्दमयं सर्वं विष्णुमयम्

अनुपल्लवि

वासवादिपूजितं वरमुनिगणभावितं
दासजनपरिपालं भासमानबदरीस्थितम्

चरणम्

वैश्यजातिकारणं वटुवेषधारिणं
कलियुगप्रसन्नं वसुप्रदाननिपुणम्
मत्स्यकूर्मवराहादिदशावतारप्रभावं
शङ्खचक्राब्जहस्तं गुरुगुहनुतप्रसिद्धम्

◇ ◇ ◇ ◇ ◇

415 shrI sarasvati namostute

श्रीसरस्वति नमोऽस्तु ते

रागं: आरभि (२९) ताळं: रूपकम्

पल्लवि

श्रीसरस्वति नमोऽस्तु ते वरदे परदेवते
श्रीपतिगौरीपतिगुरुगुहविनुते विधियुवते

समष्टिचरणम्

वासनात्रयविवर्जितवरमुनिभावितमूर्ते
वासवाद्यखिलनिर्जरवरवितरणबहुकीर्ते दर-
हासयुतमुखाम्बुरुहे अद्भुतचरणाम्बुरुहे
संसारभीत्यापहे सकलमन्त्राक्षरगुहे

◇ ◇ ◇ ◇ ◇

416 shrI sarasvati hite

श्री सरस्वति हिते

रागं: माञ्झि (२०) ताळं: आदि

पल्लवि

श्री सरस्वति हिते शिवे चिदानन्दे शिवसहिते

अनुपल्लवि

वासवादिमहिते वासनादिरहिते

चरणम्

कामकोटिनिलये करधृतमणिवलये

कोमळतरह्रदये गुरुगुहोदये मामव सदये

◇ ◇ ◇ ◇ ◇

417 shrI sAmbashivam

श्री साम्बशिवम्

रागं: बिलहरि (२९) ताळं: आदि

पल्लवि

श्री साम्बशिवं चिन्तयाम्यहं गणेशवरगुरुगुहादिवन्दित

समष्टिचरणम्

भूसुरादिपूजितमृदुचरणं भागवतप्रमुखादिरक्षणं
वसुप्रदं वरदाभयनिपुणं वासुदेवकुबेरादिभरणम्

◇ ◇ ◇ ◇ ◇

श्रीसुगन्धिकुन्तलाम्बिके

रागं: कुन्तलम् (६१) ताळं: रूपकम्

पल्लवि

श्रीसुगन्धिकुन्तलाम्बिके जगदम्बिके
हृदि चिन्तयेऽहमनिशं त्वाम्

समष्टिचरणम्

भूसुराद्यखिलजनसंपूजितपङ्कजचरणे
वासुदेवश्रीगुरुगुहवरदराजराजेश्वरि
वासुकिकार्कोटकादिवलयमातृभूतेश्वरि

◇ ◇ ◇ ◇ ◇

419 shrI sundararAjam

श्रीसुन्दरराजम्

रागं: काशीरामक्रिय (५१) ताळं: आदि

पल्लवि

श्रीसुन्दरराजं भजेऽहं श्रितकल्पमहीरुहं मुखाम्भोरुहम्

अनुपल्लवि

भूसुरादिनिखिलजनसेवितं बुद्धशुद्धसत्वहृज्ञावितं
वासुदेवमानन्दस्फूर्तिं वाञ्छितार्थफलदायकबहुकीर्तिम्

चरणम्

सोमास्कन्दविमानस्थं मधुसूदनं वृषभाचलसदनं
कामजनकमत्यद्भुतमण्डूकागममहोत्सवविभवम्
कामितफलदायकं नूपुरगङ्गातीर्थप्रभावमाधवं
श्यामं जारचोरशिखामणिं शङ्खचक्रगदाखड्गपाणिम्
सोमसूर्यनेत्रं शुभगात्रं सुन्दरगुरुगुहसन्नुतिपात्रम्
पामरत्ववारणसुचरित्रं पद्मनाभमिन्दिराकळत्रम्

◇ ◇ ◇ ◇ ◇

श्रीसुब्रह्मण्याय

रागं: काम्भोजि (२८) ताळं: रूपकम्

पल्लवि

श्रीसुब्रह्मण्याय नमस्ते नमस्ते
मनसिजकोटिकोटिलावण्याय दीनशरण्याय

अनुपल्लवि

भूसुरादिसमस्तजनपूजिताब्जचरणाय
वासुकितक्षकादिसर्पस्वरूपधरणाय
वासवादिसकलदेववन्दिताय वरेण्याय
दासजनाभीष्टप्रददक्षतराग्रण्याय

चरणम्

तारकसिंहमुखशूरपद्मासुरसंहर्त्रे
तापत्रयहरणनिपुणतत्वोपदेशकर्त्रे
वीरनुतगुरुगुहायाज्ञानध्वान्तसवित्रे
विजयवल्लीभर्त्रे शक्त्यायुधधर्त्रे
धीराय नतविधात्रे देवराजजामात्रे
भूरादिभुवनभोक्त्रे भोगमोक्षप्रदात्रे

◇ ◇ ◇ ◇ ◇

421 shrI subrahmaNyo mAm

श्रीसुब्रह्मण्यो माम्

रागं: तोडि (८) ताळं: आदि

पल्लवि

श्रीसुब्रह्मण्यो माम् रक्षतु षण्मुखावतारः शक्तिरूपः

अनुपल्लवि

भासमानवल्लीदेवसेनो भारतीशादितत्वबोधनो
वासवादिवन्दितशुभचरणो पत्रविभूतिप्रदाननिपुणः

चरणम्

शतकोटिभास्करशोभाकरः शिष्टशितिकण्ठात्मजशिवंकरः
प्रतापतारकादिहृतधीरः प्रबलगणेशानुजषडक्षरः
शतायुःप्रदभक्तमन्दारः शङ्काभिषेकाद्युपचारः
क्षितीशपूजितदिव्याम्बरः नववीरानन्दवरगुरुगुहः

◇ ◇ ◇ ◇ ◇

422 shrI svAminAthAya

श्री स्वामिनाथाय

रागं: खमास् (२८) ताळं: खण्ड चापु

पल्लवि

श्री स्वामिनाथाय नमस्ते नमस्ते

अनुपल्लवि

शाश्वतशिवसुताय सर्वदेवसमूहाय
स्वामिशैलस्थिताय वरदाय

चरणम्

गजाम्बारमणाय गणपतिसोदराय
गुणत्रयातीताय गुह्याकाराय
अजेन्द्रपूजिताय आश्रितफलप्रदाय
वरशिखिवाहनाय गुरुगुहस्वरूपाय

◇ ◇ ◇ ◇ ◇

423 shvetagaNapatim

श्वेतगणपतिम्

रागं: रागचूडामणि (३२) ताळं: त्रिपुट

पल्लवि

श्वेतगणपतिं वन्दे वामदेवप्रतिपाद्यमनाद्यम्

समष्टिचरणम्

भूतगणादिसंसेवितं बुद्धगुरुगुहसंभावितं
मातङ्गमुखं वल्लभासमेतं विरागचूडामणिम्

◇ ◇ ◇ ◇ ◇

श्वेतारण्येश्वरम्

रागं: आरभि (२९) ताळं: आदि

पल्लवि

श्वेतारण्येश्वरं भजेऽहं सदा ब्रह्मविद्यानायकीसहितम्

अनुपल्लवि

वेदागमविनुतवैभवं विधिगुरुगुहसन्नुतप्रभावम्

चरणम्

श्वेतारण्यक्षेत्रविलसितं श्वेताम्बरादिधरं सुरनतं
भूतादिसेवितं शङ्करं शशिधरं भिक्षाटनवेषधरम्

◇ ◇ ◇ ◇ ◇

425 ShaDAnane

षडानने

रागं: खमास् (२८) ताळं: आदि

पल्लवि

षडानने सकलं अर्पयामि सदा त्वत्पादभक्तिं यामि

समष्टिचरणम्

षडाधारादिशक्त्यात्मके षट्त्रिंशत्तत्वकलात्मके
षडङ्गश्रुतिविचित्रात्मके षट्कोणमध्यस्थितात्मके
ईड्यमानारिनाशात्मके ईश्वरादिनुतगुरुगुहात्मके
ढुण्ढिगणेशानन्दात्मके डमरुशूलादिधरकरात्मके

◇ ◇ ◇ ◇ ◇

सकलसुरविनुत

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

सकलसुरविनुत शंभो स्वामिन्
विकटगुरुगुह विजय त्रिपुरहर
एकाम्रपते करुणामूर्ते एकानेकविभूते
एकान्तहृदय एकभोगदायकानन्दकर विभो ॥

◇ ◇ ◇ ◇ ◇

427 saccidAnandamaya

सच्चिदानन्दमय

रागं: कुम्बिनि (४१) ताळं: आदि

पल्लवि

सच्चिदानन्दमयविजृम्भिणीं

स्मराम्यहं स्तनकनककुम्भिनीम्

समष्टिचरणम्

मच्चित्ताम्भोरुहविहारिणीं मणिहारिणीं बृहन्नायकीं

विचित्रात्मकजगद्व्यापिनीं श्रीगुरुगुहचित्तस्वरूपिणीम्

◇ ◇ ◇ ◇ ◇

सदाचलेश्वरम्

रागं: भूपाळम् (९) ताळं: आदि

पल्लवि

सदाचलेश्वरं भावयेऽहं चमत्कारपुरगेहं गिरिजामोहम्

अनुपल्लवि

सदाश्रितकल्पवृक्षसमूहं शरणागतदेवतासमूहं
उदाज्यकृतनामधेयवाहं चिदानन्दामृतप्रवाहम्

चरणम्

चमत्कारभूपालादिप्रसादकरणनिपुणमहालिङ्गं
छायारहितदीपप्रकाशगर्भगृहमध्यरङ्गम्
समस्तदुःखादिहेतुभूतसंसारसागरभयभङ्गं
शमदमोपवृत्त्यादिसंयुक्तसाधुजनहृदयसरसिजभृङ्गम्
कमलविजयकरविधृतकुरङ्गं करुणारससुधार्णवतरङ्गं
कमलेशविनुतवृषभतुरङ्गं कमलवदनगुरुगुहान्तरङ्गम्

◇ ◇ ◇ ◇ ◇

429 sadAvinatasAdare

सदाविनतसादरे

रागं: रेवगुप्ति (१५) ताळं: रूपकम्

पल्लवि

सदाविनतसादरे सरसिजनयनसोदरे
पदारविन्दे त्वामहं वन्दे

समष्टिचरणम्

निदाघजडभरतनुते निखिलनिर्जरसेविते
सदाशिवानुग्रहदेवते सच्चिदानन्दास्पदे
मुदाब्जरेवगुप्तिरागमोदितहृदये सदये
चिदानन्दमये गुरुगुहशिवजीवोदये शिवे

◇ ◇ ◇ ◇ ◇

सदशिवजाये

रागम्: शङ्कराभरणम् ताळम्: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

सदाशिवजाये विजये सरसिजपदयुगळे सकळे
वदनकराम्भोजे तारय शिववामाङ्के वरकरविधृतशुके
सदये गुरुगुहसेविते शशिशेखरसम्भाविते
सुधार्णवमध्यगतेऽतिललिते शुभकरसुरसुतमुरहरमुदिते ॥

◇ ◇ ◇ ◇ ◇

431 sadAshivamupAsmahe

सदाशिवमुपास्महे

रागं: शङ्कराभरणम् (२९) ताळं: आदि

पल्लवि

सदाशिवमुपास्महे शं मुदा चिदानन्दरूपं सदा मुदा

अनुपल्लवि

निदाघदत्तात्रेयकपिलवामदेव-

व्यासशुकादिवन्दितपदाम्भोजयुगळं

वराभयप्रदानकुशलं भक्तवत्सलम्

चरणम्

चराचरात्मकप्रपञ्चगेहं सुरासुरसेवितवृषभवाहं

मुरारिप्रभृतिदेवसमूहं पराशक्तिसम्मेळनमोहम्

पुराणपुरुषं पुरान्तकं शङ्कराभरणभासमानदेहं

निरामयं निखिलशोकापहं परात्परं परमगुरुगुहमहम्

◇ ◇ ◇ ◇ ◇

सदाशिवेन

रागं: सिन्दुरामक्रिय (४५) ताळं: आदि

पल्लवि

सदाशिवेन शङ्करेण संरक्षितोऽहं हरिब्रह्मेन्द्रादिपूजितेन

अनुपल्लवि

सदाचारप्रवृतात्मकेन सनकादिसंशयहरणेन श्री

चरणम्

हिमाद्रिराजात्मजारमणेन हिरण्यकुण्डलालंकृतेन
हीनजातिकिरातपूजितेन हंसोल्लासानन्दनटनेन
कामितफलप्रदगुरुगुहात्मजेन कलशोद्भवमुनिबृन्दनुतेन
सद्योजातादिपञ्चमुखेन सिन्दुरामक्रियारागनुतेन

◇ ◇ ◇ ◇ ◇

433 sadAshraye

सदाश्रये

रागं: चामरम् (५६) ताळं: रूपकम्

पल्लवि

सदाश्रये अभयाम्बिके सन्निधेहि
सदाश्रये त्वामम्बिके भद्रं देहि

अनुपल्लवि

चिदाश्रये चिदम्बरचन्द्रिके एहि
चिदाश्रये शिवमञ्चके नतवाराहि
मुदाश्रये भुक्तिमुक्तिप्रदमार्गं ब्रूहि
मुदाश्रये मायाधीनं दीनं मां पाहि

चरणम्

गौरी मायूरनाथमोहनकरशक्ते
शौरीशविधीन्द्रादिसन्नुतपराशक्ते
नारीमण्याद्यर्चितनादबिन्दुयुक्ते
शारीरकादिविद्यासिद्धान्तयुक्ते
भेरीमद्दळवीणावादनानुरक्ते
सूरिजनोपासितचरणनलिनयुक्ते
वाणीमाकरधृतचामरसेवासक्ते

वारीशादिलोकपालनुतगुरुगुहभक्ते
दारिद्र्यदुःखभञ्जनकरशङ्करविभक्ते
शुकसनकादिदेवतासेविते परदेवते
वारिजमुखि वरदाभयहस्ते नमो नमस्ते

◇ ◇ ◇ ◇ ◇

सन्ततं गोविन्दराजम्

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

सन्ततं गोविन्दराजं सदा वन्दितनारदमुनिबृन्दं
सन्तानकृष्णं आनन्दकन्दं चिन्तितं चिदानन्दकन्दम्
रुक्मिणीसत्यभामासमेतम् नीलमेघजितसुन्दरगात्रं
शङ्खचक्रधरं शान्तपङ्कजपादं पद्मकरं परशुरामसेवितम्
गुरुगुहमुदं सार्वभौमनन्दगोपालं
गिरिधरं वेणुगानलोलं स्मराम्यहम् ॥

◇ ◇ ◇ ◇ ◇

435 santataM pAhi mAM

सन्ततं पाहि माम्

रागं: शङ्कराभरणम् (२९) ताळं: तिश्र एकम्

नोट्टुस्वर साहित्यम्

सन्ततं पाहि मां सङ्गीतश्यामळे
सर्वाधारे जननि रे जननि
चिन्तितार्थप्रदे चिद्रूपिणि शिवे
श्रीगुरुगुहसेविते शिवमोहाकारे ॥

◇ ◇ ◇ ◇ ◇

सन्तानगोपालकृष्णम्

रागं: खमाश् (२८) ताळं: रूपकम्

पल्लवि

सन्तानगोपालकृष्णमुपास्महे श्री

अनुपल्लवि

सन्तानसौभाग्यवितरणनिपुणतरं

सन्ततं सद्गुरुगुहसन्नुतं सारसकरम्

चरणम्

श्रीरुक्मिणीसत्यभामासमेतं

अर्जुनप्रेमास्पदं आश्रितजनफलदम्

नर्तनमुरलीधरं नतशुकसनकनारदं

नीरजासनादिनुतं नीलमेघजितगात्रम्

◇ ◇ ◇ ◇ ◇

437 santAmanañjarI

सन्तानमञ्जरी शङ्करी

रागं: सन्तानमञ्जरि (६७) ताळं: आदि

पल्लवि

सन्तानमञ्जरी शङ्करी सन्ततं पातु मां बृहदीश्वरी

समष्टिचरणम्

चिन्तामणिसदना शशिवदना चिदानन्दघना मृदुगदना
चिन्तितार्थदायकी श्रीकरी श्रीगुरुगुहगणनायकजननी

◇ ◇ ◇ ◇ ◇

सन्तानरामस्वामिनम्

रागं: हिन्दोलवसन्तम् (२०) ताळं: आदि

पल्लवि

सन्तानरामस्वामिनं सगुणनिर्गुणरूपं भज रे

अनुपल्लवि

सन्ततं यमुनाम्बापुरिनिवसन्तं नतसन्तं हिन्दोल-
वसन्तमाधवं जानकीधवं सच्चिदानन्दवैभवं शिवम्

चरणम्

सन्तानसौभाग्यवितरणं साधुजनहृदयसरसिजचरणं
चिन्तामण्यालङ्कृतगात्रं चिन्मात्रं सूर्यचन्द्रनेत्रं
अन्तरङ्गगुरुगुहसंवेद्यं अनृतजडदुःखरहितमनाद्यम्

◇ ◇ ◇ ◇ ◇

439 santAnasaubhAgya

सन्तानसौभाग्य

रागं: शङ्करभरणम् (२९) ताळं: तिश्र एकम्

नोट्टुस्वर साहित्यम्

सन्तानसौभाग्यलक्ष्मीकलत्रं
सङ्गीतसाहित्यामोदं पवित्रम्
कुन्तीसुताप्तं कोटीरदीप्तं
शान्तं भजेऽनन्दमानन्दकन्द-
मुकुन्दं दयासागरं पादपद्मम् ॥

◇ ◇ ◇ ◇ ◇

440 sandhyAdevIm

सन्ध्यादेवीम्

रागं: देवक्रिय (२८) ताळं: आदि

पल्लवि

सन्ध्यादेवीं सावित्रीं वरगायत्रीं सरस्वतीं भजेऽहम्

अनुपल्लवि

विन्ध्याचलनिवसितविशालिनीं
विधिगुरुगुहसन्नुतवरदायिनीम्

चरणम्

गुप्ततरमार्गकुलयोगिनीं गुणिनीं गोविन्दजननीं नलिनीम्
सत्यसङ्कल्पतमोपहारिणीं सकाररूपिणीं संप्रदायिनीम्
सप्तस्वरमातृकारूपिणीं संसारदुःखशमनीं धनिनीम्
तत्पदलक्ष्यार्थरूपिणीं समयाचारप्रवर्त्तिनीम्

◇ ◇ ◇ ◇ ◇

441 sarasa sauvIra

सरससौवीर

रागं: सौवीरम् (४७) ताळं: आदि

पल्लवि

सरससौवीररसनादिकरणसमस्ततरपुष्पवनाधिपते

समष्टिचरणम्

हरिब्रह्मेन्द्राद्याराधितहालास्यसुन्दरेश्वरमूर्त्ते
गुरुगुहभवतरबहुतरमूर्त्ते गुणत्रयहितशक्तिस्फूर्त्ते

◇ ◇ ◇ ◇ ◇

सरसिजनाभसोदरि

रागं: नागगान्धारि (२०) ताळं: रूपकम्

पल्लवि

सरसिजनाभसोदरि शङ्करि पाहि माम्

अनुपल्लवि

वरदाभयकरकमले शरणागतवत्सले

चरणम्

परन्धामप्रकीर्तिते पशुपाशविमोचिते
पन्नगाभरणयुते नागगान्धारीपूजिताब्जपदे
सदानन्दिते संपदे वरगुरुगुहजननि मदशमनि
महिषासुरमर्दनि मन्दगमनि मङ्गळप्रदायिनि

◇ ◇ ◇ ◇ ◇

443 sarasvatI chAyAtara"ngiNi

सरस्वती छायातरङ्गिणी

रागं: छायातरङ्गिणि (२८) ताळं: आदि

पल्लवि

सरस्वती छायातरङ्गिणी सकलकलास्वरूपिणी
रक्षतु मां सकलदुरितभञ्जनी विधिरञ्जनी निरञ्जनी

समष्टिचरणम्

पुरन्दरादिपूजिताब्जमुखी बुधजनोपाश्रितसच्चित्सुखी
गरुडवृषतुरगहरिहरकरिमुखगुरुगुहमुखमतिवितरणगुणिनी

◇ ◇ ◇ ◇ ◇

सरस्वती मनोहरि

रागं: सरस्वतिमनोहरि (२९) ताळं: आदि

पल्लवि

सरस्वती मनोहरि शङ्करि सदानन्दलहरि गौरि शङ्करि

अनुपल्लवि

सरसीरुहाक्षि सदाशिवसाक्षि करुणाकटाक्षि पाहि कामाक्षि
मुरहरसोदरि मुख्यकौमारि मूकवाक्प्रदानकरि मोदकरि

चरणम्

अकाराद्यक्षरस्वरूपिणि अन्त:करणरूपेक्षुचापिनि
प्रकाशपरमाद्वैतरूपिणि परे त्रिपुरसुन्दरि तापिनि
प्रकल्पितप्रपञ्चप्रकाशिनि प्रसिद्धगुरुगुहजननि पाशिनि
विकल्पजाटिलविश्वविश्वासिनि विजयकाञ्चीनगरनिवासिनि

◇ ◇ ◇ ◇ ◇

445 sarasvati vidhiyuvati

सरस्वती विधियुवती

रागं: हिन्दोळम् (२०) ताळं: रूपकम्

पल्लवि

सरस्वती विधियुवती संरक्षतु मां श्री

समष्टिचरणम्

मुरळीवीणागानविनोदिनी संवेदिनी

चारुचन्द्रहासिनी सरसीरुहलोचनी

मुरारिगुरुगुहमोदिनी शब्दार्थस्वरूपिणी

हंसिनी ब्रह्माणी आरक्तवर्णरूपिणी

◇ ◇ ◇ ◇ ◇

सरस्वत्या भगवत्या

रागं: छायागौळ (१५) ताळं: मिश्र चापु

पल्लवि

सरस्वत्या भगवत्या संरक्षितोऽहं

छायागौरतरया वरया श्री

अनुपल्लवि

विरिञ्चिप्राणनायिकया वीणावादनोत्सुकया

सरससङ्गीतसाहित्यस्तनद्वयया पराद्वयया

चरणम्

चतु:षष्टिकलात्मिकया समस्तवर्णात्मिकया

श्रितजनपालकया सेवकभूपालकया

श्रुतिप्रतिपादितया शुभ्रवस्त्रावृतया

नतेन्द्राद्यखिलदेवतया आनन्दगुरुगुहसुसेवितया

रतिरमागिरिजार्चितया रत्नाभरणालंकृतया

मतिमज्जिह्वाग्रस्थितया मङ्गलप्रदया सदयया

◇ ◇ ◇ ◇ ◇

447 sAdhujanacitta

साधुजनचित्त

रागं: पूर्णपञ्चमम् (१५) ताळं: त्रिपुट

पल्लवि

साधुजनचित्तसरसिजोदयं सकलं ब्रह्ममयमाश्रये

अनुपल्लवि

बोधं शिवसङ्कल्पविकल्पं बुद्धशुद्धनित्यनिर्विकल्पम्

चरणम्

सकलनिष्कळरूपमाद्यं सच्चिदानन्दमनाद्यं
सगुणनिर्गुणवेद्यमनाद्यं संसाररोगमाद्यमक्ळेद्यम्
प्रकटमायाचित्रचोद्यं प्रसिद्धाम्नायान्तवेद्यं
शुकरहस्यप्रतिपाद्यं शुभकरं हरिहराराध्यम्
स्वकल्पितविद्याविद्यं सुरुचिरं भेद्याभेद्यं
शुकवामदेवादिचिन्त्यं सुखतरं गुरुगुहमचिन्त्यम्

◇ ◇ ◇ ◇ ◇

साधुजनविनुतम्

रागं: गीतप्रिया (६३) ताळं: त्रिपुट

पल्लवि

साधुजनविनुतं गुरुगुहं सङ्गीतप्रियं भजेऽहम्

समष्टिचरणम्

माधुर्यरसादिभक्षणं मत्तशूरादिशिक्षणं
माधवादिदेवरक्षणं मारकोटिविजयलक्षणम्

◇ ◇ ◇ ◇ ◇

449 sAmagAnapriye

सामगानप्रिये

रागं: शङ्करभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

सामगानप्रिये कामकोटिनिलये
शङ्करि सुन्दरि सारतरलहरि
चण्डिके निर्मले कामिनि मोदिनि पाहि गुरुगुहजननि ॥

◇ ◇ ◇ ◇ ◇

450 sAmbasadAshivAya

साम्बसदाशिवाय

रागं: काम्भोजि (२८) ताळं: अदि

पल्लवि

साम्बसदाशिवाय नमस्ते सदानन्दाय सोमास्कन्दाय

अनुपल्लवि

शाम्भविहिताय शशिशेखराय सद्गतिप्रदायकाम्भोजपदाय

चरणम्

साधुजनावनाय शङ्कराय सद्गुरुगुहात्मजाय
वरदाय सकलागमसन्नुतवराय
श्रीधरपुरन्दरादिदिक्पालसनन्दनादिसकलदेवनुताय
माधुर्यसुधाधाराय मार्कण्डेयायुष्पदनिपुणतराय

◇ ◇ ◇ ◇ ◇

451 sAra”ngArAgapriye

सारङ्गरागप्रिये

रागं: सारङ्ग (६५) ताळं: मिश्र चापु

पल्लवि

सारङ्गरागप्रिये सन्ततं चिन्तयेऽहम्

समष्टिचरणम्

मारजनकसोदरि महिषासुरमर्दिनि

सारसपदयुगळे तत्वंपदार्थयुगळे

सच्चिदानन्दगुरुगुहोदये संपदे सदये विजये

◇ ◇ ◇ ◇ ◇

452 sArasadalanayana

सारसदळनयन

रागं: खमास् (२८) ताळं: त्रिपुट

पल्लवि

सारसदळनयन सङ्कटहरण हरे गोविन्द मं पाहि

अनुपल्लवि

नीरजासनादिपूजिताङ्घ्र श्रीरमान्तरङ्ग शुभाङ्ग
मुरहर अभयप्रद मुकुन्द यादवकुलभूषण माधव

चरणम्

माघमहोत्सवप्रभाव मानितगुरुगुहवन्दित भव
गोकुलजनपाल गोपिकामनोहर गोवर्धनधर

◇ ◇ ◇ ◇ ◇

453 siddhivinAyakam

सिद्धिविनायकम्

रागं: चामरम् (५६) ताळं: रूपकम्

पल्लवि

सिद्धिविनायकं अनिशं चिन्तयाम्यहं प्र-
सिद्धगणनायकं विशिष्टार्थदायकं वरम्

अनुपल्लवि

सिद्धयक्षकिन्नरादिसेवितं अखिलजगत्
प्रसिद्धं मूलपङ्कजमध्यस्थं मोदकहस्तम्

चरणम्

भाद्रपदमासचतुर्थ्यां ब्रह्मणादिपूजितं
पाशाङ्कुशधरं छत्रचामरपरिवीजितम्
रौद्रभावरहितं दासजनहृदयविराजितं
रौहिणेयानुजार्चितं ईहनावर्जितम्
अद्रिराजसुतात्मजं अनन्तगुरुगुहाग्रजं
भद्रप्रदपदाम्बुजं भासमानचतुर्भुजम्

◇ ◇ ◇ ◇ ◇

454 siddhIshvarAya

सिद्धीश्वराय

रागं: नीलाम्बरि (२९) ताळं: मिश्र चापु

पल्लवि

सिद्धीश्वराय नमस्ते जगत्प्रसिद्धेश्वराय नमस्ते

अनुपल्लवि

बुद्धेश्वराय पराय वराय भुक्तिमुक्तिप्रदचतुरतरकराय
विशुद्धसत्वगुणाकराय विशुद्धचक्रनिलयाय
नित्यसुखतरकराय शङ्कराय

चरणम्

निर्मलहृदयविहाराय हराय नीलाम्बराकाराय श्रीकराय
चर्माम्बरधराय चन्द्रशेखराय शब्दादिपञ्चतन्मात्राधाराय
धर्माद्यखिलपुरुषार्थप्रदायकगुरुगुहकुमाराय
कर्मज्ञानयोगसाक्षात्काराय विदलितमाराय

◇ ◇ ◇ ◇ ◇

455 siMhasanasthite

सिंहासनस्थिते

वेदरागमालिका ताळं: रूपकम्

सौराष्ट्र रागः

सिंहासनस्थिते सुन्दरगुरुगुहनुतललिते
चिदानन्दनाथोऽहं वन्देऽहं वन्देऽहम्

वसन्त रागः

ब्रह्मादिसकलदेवताराधितपदयुगळे
परशुरामभागवतप्रमुखोपासितबगळे

सुरटि रागः

कमलेशनुतमङ्गळे कविजननतमङ्गळे
मन्त्रिणीदण्डिनीसमूहादिमङ्गळे

मध्यमावति रागः

हयग्रीवकुम्भजादिपूजितनित्यमङ्गळे
निरतिशयशुभमङ्गळे नवनवविधमङ्गळे

◇ ◇ ◇ ◇ ◇

456 sundaramUrtim

सुन्दरमूर्तिमाश्रयामि

रागं: टङ्का (१५) ताळं: रूपकम्

पल्लवि

सुन्दरमूर्तिमाश्रयामि शिवभूसुरकुलाब्धिचन्द्रं
करुणासान्द्रम्

समष्टिचरणम्

कन्दर्पविडम्बनविग्रहकान्तिं कामक्रोधादिरहितोपशान्तिं
मन्दस्मितमृदुगदनं माणिक्यरुचिरसदनं
कुन्दमुकुलनिभरदनं गुरुगुहमोदितगदनम्

◇ ◇ ◇ ◇ ◇

457 sundareshvarAya

सुन्दरेश्वराय नमस्ते

रागं: शङ्कराभरणम् (२९) ताळं: रूपकम्

पल्लवि

सुन्दरेश्वराय नमस्ते सदानन्दाय सोम-

अनुपल्लवि

मन्दस्मिताननाय मधुरापुरिनिलयाय

माधवाद्यमरवन्दितमङ्गळवरप्रदाय

चरणम्

भानुकोटिप्रकाशाय भासमानशशिधराय

भारतीशपूजिताय भद्रकालीसेविताय

मीनाक्षीमोहिताय मोक्षसाक्षात्काराय

महामन्त्रस्वरूपाय गणपतिगुरुगुहनुताय

◇ ◇ ◇ ◇ ◇

458 subrahmaNyena

सुब्रह्मण्येन रक्षितोऽहम्

रागं: शुद्धधन्याशि (२२) ताळं: आदि

पल्लवि

सुब्रह्मण्येन रक्षितोऽहं अष्टादशलोचनाखण्डेन

अनुपल्लवि

प्रब्रवामादिपूजितपदेन पुरन्दरमनोल्लासकरणेन

चरणम्

कङ्कशैलविहारेण वरेण वल्लीदेवसेनारमणेन
अकारवृत्तेन सानन्देन भोगमोक्षदानेन नित्येन
वेङ्कटेश्वरसुपूजितेन विचित्रविशाखामहोत्सवेन
शुकरहस्यप्रकाशगुरुगुहेन कृत्तिकासुतशुद्धधन्येन

◇ ◇ ◇ ◇ ◇

459 subrahmaNyam

सुब्रह्मण्यम्

रागं: शङ्कराभरणम् (२९) ताळं: चतुरश्र एकम्

नोट्टस्वर साहित्यम्

सुब्रह्मण्यं सुरसेव्याब्जपदं सुन्दरवदनं सुकुमारविनुतलावण्यं
शुभगात्रं शुभकरनेत्रं सोमात्मकमाश्रितकल्पभूमिरुहं
सूरिगुरुगुहं सुरराजविधिविनुतसर्वज्ञं
सुमते चिन्तय गुरुनाथं
स्वाज्ञानविदारणपण्डितसाधुजनं सूनृतवचनम्

◇ ◇ ◇ ◇ ◇

460 sUryamUrte

सूर्यमूर्ते

रागं: सौराष्ट्रम् (१५) ताळं: ध्रुवम्

पल्लवि

सूर्यमूर्ते नमोऽस्तु ते सुन्दरच्छायाधिपते

अनुपल्लवि

कार्यकारणात्मकजगत्प्रकाशकसिंहाराश्यधिपते
आर्यविनुततेजःस्फूर्ते आरोग्यादिफलदकीर्ते

चरणम्

सारसमित्र मित्र भानो सहस्रकिरण कर्णसूनो
क्रूरपापहर कृशानो गुरुगुहमोदितस्वभानो
सूरिजनेडितसुदिनमणे सोमादिग्रहशिखामणे
धीरार्चितकर्मसाक्षिणे दिव्यतरसप्ताश्वरथिने
सौराष्ट्रार्णमन्त्रात्मने सौवर्णस्वरूपात्मने
भारतीशहरिहरात्मने भुक्तिमुक्तिवितरणात्मने

◇ ◇ ◇ ◇ ◇

461 senApate

सेनापते

रागं: काशीरामक्रिया (५१) ताळं: आदि

पल्लवि

सेनापते पालय मां सन्मुनिगणादिपूजितानन्दकर

अनुपल्लवि

कनककुण्डलशोभित सुन्दर श्रीनवनन्दनादियुत धीर
प्रणवोपदेशगुरुगुहाकार माणिक्यमकुटधर करुणाकर

चरणम्

वल्लीदेवसेनानन्दकर वाञ्छितार्थप्रदचतुरतरकर
वेलायुधधर कुक्कुटध्वजधर कालहरत्रिपुरहरशङ्करपुत्र

◇ ◇ ◇ ◇ ◇

462 saindhavIrAgapriye

सैन्धवीरागप्रिये

रागं: सैन्धवि (२२) ताळं: आदि

पल्लवि

सैन्धवीरागप्रिये शङ्करि सन्ततं पाहि मां बृहदीश्वरि

समष्टिचरणम्

साधुजनावनसन्तोषकरि सद्गुरुगुहजननि सर्वेश्वरि
माधवसोदरि महाराजराजेश्वरि मङ्गळवरदानकरि

◇ ◇ ◇ ◇ ◇

463 somasundareshvaram

सोमसुन्दरेश्वरम्

रागं: शुद्धवसन्तम् (२९) ताळं: आदि

पल्लवि

सोमसुन्दरेश्वरं भजेऽहं सोमास्कन्दं
नित्यशुद्धवसन्तोत्सवविभवम्

अनुपल्लवि

हिमाद्रिजारमणं भवतरणं वामदेवादिवन्दितचरणम्

चरणम्

करुणामृतरसजलेश्वरं वरं कदम्बवनस्थितकपालेश्वरं
मधुरापुरिविलसितमहेश्वरं चिदानदगङ्गाधरेश्वरं
वरगुरुगुहेश्वरं परमेश्वरं वाञ्छितार्थफलदायकचतुरम्

◇ ◇ ◇ ◇ ◇

सोमास्कन्दम्

रागं: शङ्करभरणम् (२९) ताळं: तिश्र एकम्

नोट्टुस्वर साहित्यम्

सोमास्कन्दं स्वानन्दकन्दं कामाक्षीशं कल्याणवेषं
सोमास्कन्दं स्वानन्दकन्दं सुन्दराङ्गमाश्रयामि
गङ्गाधरं तं गौरीसमेतं शृङ्गाररूपं श्रीसोमसुन्दरं
गङ्गाधरं तं गौरीसमेतं गुरुगुहरूपमाश्रयामि ॥

◇ ◇ ◇ ◇ ◇

465 soundararAjam

सौन्दरराजम्

रागं: बृन्दावनि (२२) ताळं: रूपकम्

पल्लवि

सौन्दरराजमश्रये गजबृन्दावनसारङ्गवरदराजम्

अनुपल्लवि

नन्दनन्दनराजं नागपत्तनराजं
सुन्दरीरमाराजं सुरविनुतमहिराजम्
मन्दस्मितमुखम्बुजं मन्दरधरकराम्बुजं
नन्दकरनयनाम्बुजं सुन्दरतरपदाम्बुजम्

चरणम्

शम्भरवैरिजनकं सन्नुतशुकशौनकं
अम्बरीषादिविदितं अनादिगुरुगुहमुदितम्
अम्बुजासनादिनुतं अमरेशादिसन्नुतं
अम्बुधिगर्वनिग्रहं अनृतजडदुःखापहम्
कम्बुविडम्बनकण्ठं खण्डीकृतदशकण्ठं
तुम्बुरुनुतश्रीकण्ठं दुरितापहवैकुण्ठम्

◇ ◇ ◇ ◇ ◇

सौरसेनेशम्

रागं: सौरसेन (२७) ताळं: आदि

पल्लवि

सौरसेनेशं वल्लीशं सुब्रह्मण्यं भजेऽहमनिशम्

समष्टिचरणम्

गौरीशनुतं गजाननयुतं गर्वितशूरहरं सुकुमारं
नीरजपदं निरुपमानन्दं वारिजभववन्दितं गुरुगुहम्

◇ ◇ ◇ ◇ ◇

467 stavarAjAdi

स्तवराजादि

रागं: स्तवराजम् (४६) ताळं: मिश्र चापु

पल्लवि

स्तवराजादिनुतबृहदीश तारयाशु मां दयानिधे

समष्टिचरणम्

भवपाशमोचननिपुणतर पार्वतीश भक्तप्रियकर
भव गुरुगुहजनक त्रिपुरहर भुक्तिमुक्तिवितरणचतुर

◇ ◇ ◇ ◇ ◇

468 smarAmyahaM sadA rAhum

स्मराम्यहं सदा राहुम्

रागं: रमामनोहरि (५२) ताळं: रूपकम्

पल्लवि

स्मराम्यहं सदा राहुं सूर्यचन्द्रवीक्ष्यं विकृतदेहम्

अनुपल्लवि

सुरासुरं रोगहरं सर्पादिभीतिहरं
शूर्पासनसुखकरं शूलायुधधरकरम्

चरणम्

कराळवदनं कठिनं कयानार्णकरुणार्द्रापाङ्गं
चतुर्भुजं खड्गखेटादिधरणं चर्मादिनीलवस्त्रं
गोमेदकाभरणं शनिशुक्रमित्रगुरुगुहसन्तोषकरणम्

◇ ◇ ◇ ◇ ◇

469 svAminAtha

स्वामिनाथ

रागं: चलनाट (३६) ताळं: आदि

पल्लवि

स्वामिनाथ परिपालयाशु मां

स्वप्रकाश वल्लीश गुरुगुह देवसेनेश

समष्टिचरणम्

कामजनकभारतीशसेवित कार्तिकेय नारदादिभावित

वामदेवपार्वतीसुकुमार वारिजास्त्रसम्मोहिताकार

कामितार्थवितरणनिपुणचरण काव्यनाटकालङ्कारभरण

भूमिजलाग्निवायुगगनकिरण बोधरूपनित्यानन्दकरण

◇ ◇ ◇ ◇ ◇

470 svAminAthena

स्वामिनाथेन

रागं: बृन्दावनि (२२) ताळं: आदि

पल्लवि

स्वामिनाथेन संरक्षितोऽहं

सच्चिदानन्दनाथात्मना श्री

अनुपल्लवि

सोमतातेन वल्लीदेवसेनोपेतवरगुरुगुहेन

चरणम्

प्रणवार्थतत्वोपदेशेन मणिमन्त्रौषधप्रदनिपुणेन

सनकादिसन्नुतप्रभावेन दिनकरशशितेजःप्रकाशेन

माणिक्यमकुटकुण्डलशोभितमरकतमणिमयवज्रायुधेन

नवनन्दनाद्युपासितशरवणमन्त्रस्वरूपेण वरेण श्री

◇ ◇ ◇ ◇ ◇

471 hariyuvatIm

हरियुवतीम्

रागं: देशिसिंहारवम् (५८) ताळं: रूपकम्

पल्लवि

हरियुवतीं हैमवतीमाराधयामि

सततं अखिललोकजननीं श्री

समष्टिचरणम्

नरहरिहृदयनिवासिनि नामरूपप्रकाशिनि

गुरुगुहमानसरञ्जनि गुणिजननुते निरञ्जनि

◇ ◇ ◇ ◇ ◇

हरिहरपुत्रम्

रागं: वसन्त (१५) ताळं: खण्ड एकम्

पल्लवि

हरिहरपुत्रं शासारम् सदा भजेऽहं
मायकार्यम् त्यजेऽहम्

अनुपल्लवि

मुरहरादिमोदितशौरिगिरिविहारम्
मुरळीभेरीवाद्यादिप्रियकरं
प्रार्थितपुत्रपदं वसन्तनतबृन्दं
दीर्घायुःप्रदं दीनजनफलप्रदम्

चरणम्

फाल्गुनमासपौर्णिमावतारं
पाण्ड्यकेरळादिदेशप्रभाकरं
पुष्पशरेक्षुकार्मुखधरं
फुल्लकल्हारदण्डधरकरं
कलियुगप्रत्यक्षम् गर्वितदक्षशिक्षं
वरगुरुगुहान्तरङ्गम् रथगजतुरङ्गम्

◇ ◇ ◇ ◇ ◇

473 hastivadanAya

हस्तिवदनाय

रागं: नवरोज् (२९) ताळं: मिश्र चापु

पल्लवि

हस्तिवदनाय नमस्तुभ्यं
हाटकमयमण्डपे सिंहासनस्थिताय

अनुपल्लवि

हस्तिकृत्तिवसनधरार्चित महागणपाय तत्वस्वरूपाय
समस्तभक्तानुग्रहाय मायालिङ्गितविग्रहाय

चरणम्

कमलोत्पलपाशशङ्खचक्रेक्षुकार्मुकव्रीह्याग्रागदानिजविषाण-
मातुलङ्गरत्नकलशधरण कराम्बुजाय पदपङ्कजाय विमलाय
विश्वोत्पत्तिस्थितिविलयाय करुणालयाय
हिमाद्रितनयाननपङ्कजहिरण्यगर्भाय सुमनसे
उमारमणकुमारगुरुगुहसमानवरौजसे महसे

◇ ◇ ◇ ◇ ◇

हाटकेश्वर

रागं: बिलहरि (२९) ताळं: रूपकम्

पल्लवि

हाटकेश्वर संरक्ष मां तप्तहाटकमयलिङ्गमूर्ते त्रयात्मक

अनुपल्लवि

पाटलीपादपमूलप्रकाश पातालबिलहरिहयाद्यमरनुत
हाटकक्षेत्रनिवास हंसरूपचिद्विलास
कोटिकोटिचिताभास गुरुगुहमानसोल्लास

चरणम्

दारुकावनस्थ तपोधनात्युग्रतपःप्रभावसंभवमूर्ते
मेरुशृङ्गमध्यस्थितश्रीनगरविहारपराशक्तिसहितकीर्ते
मारुतिनन्द्यर्जुनादिभरताचार्यरवेदितनर्तनस्फूर्ते
चारुस्मितमुखाम्भोजशशिधर सरसीरुहपद विदलितभक्तार्ते
गौरीपते पशुपते गङ्गाधर जगत्पते
शौरिविनुत भूतपते शङ्कर कैलासपते

◇ ◇ ◇ ◇ ◇

475 hAlAsyanAtham

हालास्यनाथम्

रागं: दर्बार् (२२) ताळं: आदि

पल्लवि

हालास्यनाथं स्मरामि कोलाहलमीनाक्षीसमेतम्

अनुपल्लवि

मूलादिनवाधारनायकं मुनिजनादिभक्तवरदायकं
मलयध्वजपुरमण्डपस्थितं महागणेशगुरुगुहादियुतम्

चरणम्

नवनीतकाळीपूजितं नन्दिरूपाञ्जनेयादिनुतं
नावाद्याषाढमहोत्सवं नतसुरासुरदेवप्रभावम्

◇ ◇ ◇ ◇ ◇

476 himagirikumAri

हिमगिरिकुमारि

रागं: अमृतवर्षिणि (६६) ताळं: आदि

पल्लवि

हिमगिरिकुमारि ईशप्रियकरि

हेमाम्बरि पाहि मां ईश्वरि

समष्टिचरणम्

उमामहेश्वरि कुमारगुरुगुहजननि शङ्करि सदाशिवकरि

वाममार्गप्रियकरि सुखकरि वरदाभयकरि परमेश्वरि श्री

◇ ◇ ◇ ◇ ◇

477 himagirikumAri Ishvari

हिमगिरिकुमारि ईश्वरि

रागं: रविक्रिया (४२) ताळं: आदि

पल्लवि

हिमगिरिकुमारि ईश्वरि हेमाम्बरि हरिसोदरि सुन्दरि

समष्टिचरणम्

कमलभवादिविनुतबृहदीश्वरि कमनीयतरगुरुगुहविभास्वरि
विमलहृदयकमलविकासकरि विधुवह्निरविक्रियाशक्तिकरि

◇ ◇ ◇ ◇ ◇

हिमाचलकुमारीम्

रागं: झङ्कारभ्रमरि (१९) ताळं: रूपकम्

पल्लवि

हिमाचलकुमारीं भजे त्रिपुरसुन्दरीं
ह्रीङ्कारसरसीरुहझङ्कारभ्रमरीम्

समष्टिचरणम्

रमाभारतीनयनां राजीवचन्द्रवदनां
कुमारगुरुगुहजननीं उमामहेश्वरीं धनिनीं
नमामि शम्भुरञ्जनीं भ्रमात्मकविश्वजननीम्

◇ ◇ ◇ ◇ ◇

479 hiraNmayIM lakShmIm

हिरण्मयीं लक्ष्मीम्

रागं: ललित (१५) ताळं: रूपकम्

पल्लवि

हिरण्मयीं लक्ष्मीं सदा भजामि

हीनमानवाश्रयं त्यजामि

अनुपल्लवि

चिरतरसंपत्प्रदां क्षीराम्बुधितनयां

हरिवक्षःस्थलालयां हरिणीं चरणकिसलयां

करकमलधृतकुवलयां मरकतमणिमयवलयाम्

चरणम्

श्वेतद्वीपवासिनीं श्रीकमलाम्बिकां परं

भूतभव्यविलासिनीं भूसुरपूजितां वराम्

मातरमब्जमालिनीं माणिक्याभरणधरां

गीतवाद्यविनोदिनीं गिरिजां तामिन्दिराम्

शीतकिरणनिभवदनां श्रितचिन्तामणिसदनां

पीतवसनां गुरुगुहमातुलकान्तां ललिताम्

◇ ◇ ◇ ◇ ◇

480 he mAye

हे माये

रागं: शङ्करभरणम् (२९) ताळं: तिश्र एकम्

नोट्टस्वर साहित्यम्

हे माये मां बाधितुं का हि त्वं का हि त्वं पाहि याहि
कामाक्षि काञ्चीपुरनायिके रक्षितुं एहि एहि
कामकोटीश्वरि कामितार्थप्रदैकाम्रनाथेश्वरि पाहि पाहि
कामसञ्जीविनि सेवितश्रीगुरो कौळिनि मे मुदं देहि देहि ॥

◇ ◇ ◇ ◇ ◇

481 herambAya

हेरम्बाय

रागं: अठाण (२८) ताळं: रूपकम्

पल्लवि

हेरम्बाय नमस्ते हरिब्रह्मेन्द्रादिसेविताय शिवकुमाराय

अनुपल्लवि

वीरगणादिमुदिताय वीरादिवरप्रदाय

चरणम्

सूरिजनोपासिताय सुरगुरुगुहसेविताय
परमेश्वरकुमाराय पञ्चहस्ताय पाशाङ्कुशधराय
प्रसिद्धगणनाथाय विनायकाय

◇ ◇ ◇ ◇ ◇